MSS No. 217 Subject Relegion

Name of MSS पंचशती

Author - -

Period Folios 85

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios 3, 22, 82, 83

...नस्य

किंच चेतनस्याचेतनस्य वा साक्षित्वमाद्येऽमुक्तस्यान्तस्य वा नाद्य इत्याह। कूटस्थ इति॥ कूटस्थः साक्षित्वं जडस्ये
न युज्यते साक्ष्यापर्यासनिसंबन्धात्॥ पक्षान्तरं प्रत्याह। तस्मिन्न सत्यपि नाचित्तेः॥ साक्षात्संबन्धे चि-
नस्य साक्षित्वं घटवदित्यर्थः॥ अज्ञस्येति पदद्वयमङ्गीकरोति॥ तस्मात्परस्य साक्षित्वं स्वस्य साहाध्यस्ता
न॥ कथं परस्य स्वबोधस्याभासद्वारा साक्षित्वमर्थात्सम्बन्धात्तत्राह। कार्यकारणसम्बन्धे ... सम्ब
सङ्गतेः॥ पारतन्त्र्यात्कार्यादेरेव सम्बन्धस्तत्राभासानुप्रवेशाद्द्वात्मा साक्षीत्यर्थः। मात्रादि देस्सा
वेद्यत्वमुक्त्वा तदभावस्यापि तदाह॥ प्रमात्राद्यभिसम्बन्धोऽयथा न ... असिद्धिकः॥ तथे ... आदेस्सा
सिद्धो नुभवमात्रवत्तः॥ अभिसम्बन्धोभावस्साक्षित्वमनुर्यामित्वं कारणत्वं चनाविर्हि मात्रादे
रुतमिस्यात्तत्राह॥ अननन्यहेतुकं तावत्त्रयमेतद्यत्पश्यता ...॥ परस्य धर्मादृष्टस्य प्रधान
त्वकृतं तच्चेत्तिविधं तर्हि कुत्र धर्मादेरूपयोगस्तत्राह॥ प्रमा ... पदार्थस्य धर्मा ... ध्यानेन मा
अर्थधर्मादीत्यादिपदरागादिग्रहार्थं॥ मात्रादेरूपादानमज्ञानं निमित्तं ... धर्मादीत्यर्थः। प्र. दृष्टिरिति द्वि
स्यात्त्वमेव व्याख्या विधर्मादिकृतत्वेन सत्त्वेऽपि सकदाचित्तपा ... व्यस्यापि
देहादिसम्बन्ध ... जनमनेवाचिदा न नाम ... तस्य ... दा वि

तस्यास्कुतव्याचेघटादेर्नमानाभानव्यवस्थेत्याशंक्याह॥ चट[illegible] ...विव... ...बोधन

बुध्यादेर्घटादिसंगतिरागंतुकीहेतुमपेक्षतेसत्यां तस्यां सुखादिदृष्टे[illegible]मितितद

सौगतास्तान्प्रतिदृष्टिरितिदैर्घेत्यादिनाव्यंतत्रलौकिकींदृष्टिंव्याचष्टे॥ [illegible]त्वदृष्टिरेव

कपरमार्थदृष्ट्योर्मध्येसाभासबुद्धिपरिणामोलौकिकीदृष्टिरित्यर्थः साचात्मानंनवि

विषयान्तरेलाचरितार्थत्वादित्याह॥ [illegible]थाव्वलेष्वनी॥ पारमार्थिकदृष्टितोल

यतोविशेषमुक्त्वाहेतुतोव्याह॥ भूरिसाधनसापेक्षा॥ फलंतोविशेषमाह॥ सुख

स्वरूपतोव्याह॥ नतावस्त्वंसिनीचेयंतद्धेतोर्भंगरत्वतं॥ तद्वत्लौकिकदृष्टेर्हेतुविषय

धान्तरेणवैलक्षण्यमाह॥ प्रतिदेहंविभिन्नाच॥ पारमार्थिकदृष्ट्योर्नेदमस्तीतिवक्तुं

हेतुः॥ त्वसाधारणकारणात्॥ प्रत्येकंचैत्रादिकृतधर्मादिजन्यत्वस्वीकाराद्वीत्यर्थः विशेष

क्रियाकारकरूपैव॥ क्रियाहिदृष्टिश्चक्षुरादिनिर्निरूप्यत्वत्वर्थः पारमार्थिकीदृष्टिर्नक्रियाकृत

नाशित्वतेर्धृतिद्वितीयांदृष्टिंव्याकरोति॥ साक्रियाकारकातीतना॥ तर्हिदृष्टिद्वयेचेद्वैतहानि

हा॥ तावन्मात्रैकमायात्मातेयाव्याप्तेवजायते॥ परमार्थदृष्टिरेवलौकिकदृष्टिरेवास्तवंस्व

217

व्यतिरेकेणाकर्त्रादेः सिद्धेर्नात्मत्वं न स्यात् ततः॥ ७ प्रतस्मात्साक्षित्वा इति प्रतिपद्य गुरूक्तेः प्रतीचः साक्षित्वेऽ

न्मो तमाह॥

तिसर्वविषय इत्यर्थः प्रसंगान्मानफलस्वरूपमाह॥ संविन्मनोहधीवृत्तिशरीरादिविशेषणं

मोक्तरीह यदाभाति तत्त्वमाराक्फलं स्मृतं॥ चैतन्यं स्फुरतीत्यादिना चैतन्यादिविशेषितं

यया दात्मनि स्फुरणं भाति तत्फलितमित्यर्थः उक्तचतुष्टयस्यानित्यानुभवसिद्धतामाह॥

कर्तृत्वं करणत्वं च कर्मत्वं चात्मसाक्षितः॥ एकश्चकारः फलसमुच्चयार्थः ७ आभातीति पूर्वेणान्व

यः मात्रादेस्साक्षित्वे फलितमाह॥ साक्षित्वेनात्मनः सिद्धिर्मात्रादिव्यतिरेकतः॥ मात्रादेस्सा

क्ष्याद्भेदेन प्रतीचस्साक्षित्वात्तस्यात्माभावाना सिद्धिः ततः साक्षितापन्नमात्मतेत्यर्थः मात्रादेस्सा

क्ष्यत्वफलमुपसंहरति॥ न कर्तृता प्रमात्रादेः साक्ष्यत्वेनैव नश्यतः॥ नात्मतेत्यर्थः तर्हि मात्रादे

कस्य साक्षीचान्यकूटस्थदृष्टिरपरेति भेदः स्यात्तत्राह॥ प्रत्यग्ज्ञोहजत्वबुद्ध्यादिजडरूपप्रधान

तः॥ कर्तृत्वमात्मनो युक्तं चित्प्राधान्यात्त्वभोक्तृता॥ ७ आत्मनस्स्वाज्ञानोत्थबुद्ध्यादिप्राधान्येन मा

तृत्वादिसाभासप्राधान्येन साक्षितास्वतस्तु कूटस्थतेति न वास्तवो भेद इत्यर्थः दृष्टिरिति दृ

श्चिनु ह्यात्मनस्सिद्धिप्रकारमाह॥ संविन्नोहचिद्धुं स्वेप्रात्पसंकर्तृरूपिता॥ चैतन्यतदा
त्मसा ज्ञानैरापरो स्वं मातुरित्यर्थः॥ को सौ माता तत्राह॥ स्मरति निश्चिनोति संशीरागा
दिह स्त्राममु॥ अहं रूपेण दो॥ चेति स प्रमाता॥ ज्ञानादिवस्थाश्रयो मातेत्यर्थः॥ अवि
ष्टः स्यात्प्रमातैव पापदोषादिवर्जित इति व्याख्येनाह॥ परो मतः॥ किं तर्हि ज्ञानं तदाह॥
स्मरणादि विभागेन ज्ञानं तेषां कत्रयत्यपृथक्॥ अपते॥ स्वरूपेणापृथग्भूतं विषयतो पि तदस्मी
त्याह॥ अनेकरूपानन्तज्ञान॥ तत्रानुभवं प्रमाणायति॥ प्रत्यन इति॥ एकत्रज्ञातरि याज्ञानस्य
तिस्मा ज्ञात्रंतरे पितत्व्येतिसूचयति॥ ज्ञातृकर्तृकम्॥ अर्थविशेषितं प्रकाशरूपं कर्तृनिरू
ज्ञानमिति समुदायार्थः॥ कीदृशो विषयस्तत्राह॥ विनिद्रो॥ ज्ञानादि बाध्य स्यार्थ॥ बहिरवभाति
त्रित्रत्वमाधयति॥ ज्ञातिरूपक्रियादिमान्॥ भिन्नो ज्ञातीत्यक्तव्यनक्ति॥ विभिन्नोनुभवादेव॥
मास्यनुभवं व्यावर्त्तयति॥ ज्ञातुर्ज्ञानात्समगोचरा॥ ज्ञातृक्रियारूपज्ञानाद्योज्ञातादेरन्यामा

मानसंगतिमाश्रावन्॥ मेयत्वलक्षणं तेनान्यद्यन्नेत्युक्तं द्विधा द्वयमप्याद्यतिशब्दे न कार्यैक
देशवाचिना कारणमपि लक्ष्यते कार्यकारणान्यतरकोटिव्यतिरेकेण संवित्स्वत्वे
मानाभावात्कथमकार्यकारणत्वेनेत्यत आह॥ हेतोः कार्यसमुत्पत्तेः सिद्धेः प्रागपि
संविदः॥ कार्यकारणतासीनात स्यात्संवित्स्वतीयतां॥ हेतुहेतुमद्विभागात्पुरापि स्थापादौ सं
विदस्सिद्धेस्तस्याधिकायाद्वयव्याहिर्भावादजडाभानिष्ठितेत्यर्थः॥ अन्यवादिनस्तु नाश्रेवन
सहते न कैरप्येनस्याहेत्वादिराहित्यमतोऽन्याह॥ नान्यस्याविहिस्मृन्यत्वेन सादित्वमतीयते॥
यद्यपि सर्वप्रमाणाप्रत्यक्षस्मगानुमन्यं नाम संभवति तथापि तस्याभ्युपगमे तस्य सादित्वे सादि
साधर्मनन्तरेण तदसिद्धेरित्यर्थः॥ ननु तत्साधकत्वेन साक्षीत्वेष्यते तत्विनापि तत्प्रकाशसं
भवान्नेत्याह स्वप्रकाशनवेति विकल्प्याद्यं प्रत्याह॥ असाक्षिकं चेत्स्यात्तत्साक्षिवत्स्यात्
साक्षिक॥ साक्षिणां विनान्यप्रकाशते चेत् नहि स्वप्रकाशनवेति विकल्प्याद्यं प्रत्या)

ऐ स्मादिमांद्यव्यवस्थायोक्तेर्दोनार्थी यन्यायस्मानुग्राहकतत्त्वमाह॥ अत्राप्यरूपेन व्याकरतो
यदुक्तं सर्वमेवानतः॥ अनुसंधेयमत्रापि चवक्तलेनत्वोविशुद्धये॥ वस्तुतत्त्वं वस्तुस्वाभाव्या
दिनामार्थमसाविशुद्धिर्नि द्वीद तान दृर्यानिति या चेत् तत्रोक्तमेव बुद्धिमांकर्यार्थं
स्मारयति॥ स्व मोह न्मानसंसिद्धी स्वबतोन वगमात्मकम्॥ भावाभावौ नेतित्युत्वा स्वा
तेयद्यात्मनाय नेतावज्जेद्द स्वर्तासिद्धाति तद्उत्वान्नदेवचजन्मविनाशावद्रूपे तेन प्रत्यगवस्तु
यस्मात्तेन तादृमेयनिरस्तात तस्माद्कूटस्थं तदित्यर्थः॥ अनात्मन्येव जन्मादि चेदेकं यमात्म
नद्दीरित्याज्ञकोपाधिवशात्पाह॥ तस्मादजायमानेव जायमाने वलक्ष्यते॥ स्वविविस्नाद
स बोधहेतुत्यानात्मजन्मनाांतद्धिनाशोपि तत्स्मा दयाद्धिनं श्यंपती वलक्ष्यते॥ चिदात्म
नो जन्मादेर्निष्यात्वे प्रतिपादितमाह॥ यतो ततः कार्यतो तस्यानेश्वरोपि प्रसाधयेत॥
विद्वपस्मात्मनो कायवेपिज्ञेयवाजाज्ञ ततत्र्य करता हो स्याज्ञाकमाह॥ अज्ञानेन्मामग

दाः साक्षिकत्वेनेष्टं परेष्टं साक्षिवत्स्वप्रकाशं स्यान्नतोऽप्याविविप्रतिपत्तिरित्यर्थः कल्पां
तरं निरस्यति॥ ॥साक्ष्ये साक्ष्यपि संसिद्धौ स्वार्थद्योतनतुभून्यता॥ पाराख्यांत्स्याप्यवि
रहेषप्रमोत्वरवद्भवेत॥ प्रस्मादिष्टं साक्षी साक्षिनिरपेक्षो विसिद्ध्यति स्वप्रकाशत्वे
नस्वेतरत्त्वान्नत्वदिप्वानुभूत्यतातप्यातस्याजाड्येनाजडसाधकावेदत्वादतस्स्वते
त्रसाधकाभावेऽप्यनुभूत्येवानुभूत्यस्यादिति सदेककरसाकूटस्था संविदास्येयेत्यर्थः यथो
क्तमर्थं स्वैष्टैपिकं पांतदेकरस्यमित्याशंक्य तद्व्यापवादार्थं स्वैचैपंचधातदवस्थान
माह॥ देहान्तः प्रत्यगात्मायं पंचधागम्यतेमितेः॥ स्थूलदेहमारभ्याव्याकृतपर्यंतं जगन्मध्ये योऽसिप्रत्य
ग्धातुस्सोऽयं पंचधानुमीयतइतियावत्॥ मितिरनुमेवतदेवपंचधात्वंप्रकटयति॥ एककारता साक्षि
त्वकर्तृदुःखित्वतुरूपतः॥ तत्रैक्यवा[illegible]वमितदावि[illegible]मितितिविभागः नकारताच्चप्रत्यगात्मनस्यपर
स्ययुक्तं वादिविप्रतिपन्नेदितिचेन्नेत्याह॥ श्रुतितोलिंगतः साक्षात्कार्यकारतासंगतिः॥
मतोनुमीयतेतस्मात्कारताप्रसिद्ध परा[illegible]मनः॥ पंचम्योऽपमानाधिकरतो लिंगं ज्ञापकं कार्यमा

काश्यादिजगत्कारणभूतं ब्रह्मेति ब्रह्मजगतोस्संबंधश्रुतेर्ब्रह्मैव कारणमित्यर्थः तथापि क
थं सादित्वं मातारं विना तदप्रतीतेरत आह ।। अन्यथा कार्यान्वयव्यतिरेकेणानाभावोपि प्रसिध्यति ।।
किमत्राबोजगत्यस्मिन् ।। मातृभावाभावसाक्षीमात्रव्यतिरिक्तस्य सिद्धतीत्यर्थः मातृवत्साक्षि
तितापि प्रसाधकान्तराभावे तथा न वस्थेत्याशंक्याह ।। या साक्षी चानन्यमिति द्विकः ।। नहि साक्षी माता
वेति द्वे न प्रसक्तिरित्याशंक्य प्रतीचस्तस्याविद्याकृतमानकर्तृत्वमाह ।। यथोक्तानुभवारूढो
वेध्यनोपि प्रसिध्यति ।। मातृता ।। कारणत्वादिदृष्टान्तार्थो विशदः ।। नस्य वाविद्यया दुःखित्वे
वेकुं पातनिकामाह ।। मातृतेरिति ।। अनुभवारूढत्वमात्रे तु च शब्दः ।। दुःखित्वस्यापलेदातत्वे
मुपेत्य श्रेयापेक्षो स्वरूपमाह ।। सुखी गौरो धनी मोमान् बालमे ग्रममातृमात्र ।। पं च यथास्थि
तिमुपसंहरति ।। प्रमाताऽनुमीयते वैतदुक्तं सर्वं प्रसिध्यति ।। तत्र स्वकार्यतात्वाद्याविद्यवस्तुचा
द्वयं तथापि व्यवहारकाले मात्रादिस्वेनात्सिद्धावपि स्वापादौ न तत्सिद्धिर्मानाभावा
त्तत्राह ।। प्राक् प्रमात्रादिसंभूतेः यत्प्रमात्रादिकारणं ।। अनन्यानुभवात्मानं तत्र मातास

त्रा वं च मा ना
भेदाः प्रसिद्धा
तो ।। ५

दाहृत्वोः॥ स्वापाद्यवस्थास्वपि अज्ञानं स्फुरत्यस्य चेत्स्यन्तरस्य नावेदितमिति परा
मर्शो योगात्तस्मादज्ञानमपि ह्यनुपपन्नमित्याशंक्य साधकमात्मानं तामनुसाधयति स्थायीत्यर्थः॥ अ
ग्रहणीयमपि त्वात्मनि मानं चेत्तत्र मात्रादिनानात्वं नेत्याह। मेयमानप्रमात्रादिविभागमात्रेण
नैक्यं तेन तत्र हेतुः॥ प्रत्यक्षबोधैकरूपाद्यस्य चैतन्यमात्रोपरोधतः॥ ओं तत्तानानात्वमनिष्फलं
मिथ्या नवाद्यमानादिविभागोपगमोऽपि दितीये मनस्यासिद्धिरित्याशंक्याह॥ इहैव फलं
चात्र मानमेयादिकल्पनया॥ रज्जुसर्पादि सदृशं कल्पनिकमिति यद्वत्तत्तथेति किं मि
तत्त्वोक्तिः॥ वस्तुतो विभागाभावे हेतुः॥ कुतोऽनेकविकल्पाः स्यादद्वैतैकप्रमात्मनि॥
आत्मा प्रमास्वभाव एवास्य स्वयमेव स्वात्मज्ञाने मुद्देत्किं कार्यमितरेण मानेनेत्याह। प्रमा
तोऽवर्तमानायातमिदं मोहापनुत्तये॥ अद्वयचैतन्यमिदमपरामृष्टं मदीदृग्रूप
तो मोहमनुदत्तं न तद्दोषपत्तिप्रदामारभ्य सिद्धस्यापि योनिवर्त्यभावे फल्यादित्याह

वस्तुत्वेनेनैवात्मभ्रमस्यानारम्भशङ्कितः किंच सर्वव्यवहारस्यानुभवाधीनत्वात्
स्वस्वरूपेणाज्ञानादिसाधकत्वाभावेनैव विमानस्तद्वैमित्तेत्याह। उक्तार्थोपपादनायेत्ल
तदज्ञानेजभ्रमिषु॥ व्यवहारः प्रमात्राद्यैः स्वप्नमायेन्द्रजालवत्॥ संविदात्मा प्रत्यगा
त्मा कोर्थः तन्मात्रेणास्वाज्ञानानिरासेनेति यावत्॥ यद्यपि स्वप्नादिषु मात्राद्धिकृतो
व्यवहारस्तावद्धृतिनिमित्तो हेयस्तथापि स्वाविद्यास्य मात्रादिव्यवहारस्तदधीनो
युक्तस्तद्याचेर्थेतीच स्वाज्ञानादि साधकस्यानस्वस्यैतनाद्वैमित्तेत्यर्थः दृष्टान्तवै
षम्यमात्राचाह॥ अविचारितसंसिद्धिसमात्वत्स्यात्तदद्वयं कृत्स्नं जगत्॥ कार्यकार
णात्मकद्वैतस्य कल्पितत्वफलमाह॥ इत्तामोहध्वस्तौ ध्वस्तत्वमवोद्विमितिः॥ वाक्यात्स्वा
द्वयाकारधीवृत्तेस्तस्यहेतुबन्धध्वंसौ चिन्मात्रमवशिष्टमित्यर्थः। अज्ञानध्वस्ते
रूर्ध्वं तदवशेषबन्धस्त्वपूर्वमन्यथा तरस्यापि समत्वाद्विवदद्वैतासिद्धिरित्याशंक्याह॥

भिन्नमानमात्रादौ कार्यकारणाद्यस्मानि॥ अभिन्नमानात्मानादिरात्मैवैकोऽद्वयस्वतः॥
स्वतस्सिद्धतोऽद्वयत्वनन्निरूप्यते कदाचिदात्यर्थः चिदात्मा स्वप्रसिद्धौ देशाद्यपेक्षातेन
वाद्यो घटादिवत् सद्वयत्वद्वितीयेनियतमानानुपपत्तिरित्याशंक्याह॥ नदेशका
लावस्थाद्यपेक्षोऽस्यात्मनः॥ तत्रहेतुः॥ स्वतःऽनन्यापेक्षसंसिद्धेः॥ आ
त्मनोदेशादिसत्तास्फूर्तिहेतुत्वान्न तदपेक्षेत्याह॥ देशाद्यपेक्षोनः॥ किंतर्हि
तत्स्वापेक्षेतदाह॥ देशकालनिमित्तादिव्यपेक्षो वस्तुमप्रवेत्॥ तदेवतदपेक्षेणास्या
त्मनस्तु देशादिसिद्धिदम्॥ तार्हि किंचिद्देशाद्यपेक्षः किंचिन्नेति द्वैतापत्तिरित्याह॥ का
रकादिवशाद्यावत्किंचिद्वस्तूपलभ्यते॥ क्रियाकारकत्वेन तद्विशेषयमनपेक्षितत्त्वकस्य
कार्यस्यसर्वस्यरज्जुसर्पवत्कल्पिततत्वान्नद्वैतं वस्तुतोऽस्तीत्यर्थः॥ क्रियाकारक

योऽविद्यातत्कार्यस्याकल्पितत्वं किं न स्यादित्याशंक्याह ॥ वस्त्वधीना यतो विद्या कर्तृ
धीना क्रियाऽथवा ॥ कर्त्रादि चात्ममोहोत्थं वस्तुसिद्धं यतोऽद्वयं ॥ विद्याया वस्त्वनु
सारित्वात्क्रियाकारकयोरप्यविद्यात्वाद्विद्यायास्तद्दृष्टेस्तत्कार्यं क्रियादिध्वस्तेरा
त्मवस्तु कूटस्थं स्वतोऽद्वयं स्यादित्यर्थः ॥ विद्यायाऽविद्यानिरूप्यात्तत्कार्यकार
कादिलिंगत्रितं दृष्टान्तेन स्पष्टयति ॥ कारकात्प्रपन्ने ज्ञानि विद्या बुद्धिनिष्ठो व्यवहारे
तत्कारणतोपपन्नादित्वा ॥ विद्या वस्तुत्वेन नैव न भावमभावं वा करोति तत्कार्यंम
ताज्ञानादि निवर्तयतीत्याशंक्याह ॥ जन्मनैव न कारकं ॥ सा हि स्वोत्पत्तिमात्रेणावस्तु
स्फुटयन्ती तदज्ञानं नान्तरीयकतया निवर्तयतीत्य(नु शंक्याह) न व्यापारान्तरेणेत्य
र्थः ॥ तथा ज्ञानादिध्वंसापि विज्ञानमात्माश्रयमित्यात्मनस्सविशेषतां तत्राह ॥

प्रमातृपरतंत्रत्वात्प्रमासिद्धिः प्रमातारं ॥ प्रमासिद्धिस्संविदेति संबन्धः ज्ञानस्य फ
लत्वलिंगानुमेयत्वान्न साक्षिवेद्यतेति केचित्तान्प्रत्याह ॥ ज्ञाततया अर्थव्यवधानेन संविदे
वनव्यवहितेः ॥ स्वाभाविकमतेष्वकरणत्वेन तज्ज्ञानं च नित्यानुमेयसिद्धं नित्यमर्थः मा स्वतो
त योर्भेयत्वेनावसाधयति ॥ मात्रंतरव्यपेक्षायां मातुर्मानान्तरे स्थितेः ॥ दुर्वारत्वात्प्र
मगस्स ह्यनवस्थाप्रसज्यते ॥ मातुर्मात्रंतरे मानस्य च मानान्तरे व्यपेक्षायां तत्र तत्र प्रसंग
स्य दुर्वारत्वात् द्विविधानवस्थेत्यर्थः फलस्य फलांतरापेक्षायामपि तुल्यानवस्थेति
वक्तुं हि शब्दः वस्तुस्वाभाव्यादित्याह ॥ दिङ्नाम्ना योगाचार्योपयोगित्वेनाव्याकृतप्रक्रियोक्ताम
नुस्मार्य संप्रति वस्तुस्वाभाव्येनैवाक्षिप्यते तद्द्वैतमविद्याकृतं रूपं व्याख्यानं तद्व्यवहा
रदशायां प्रमाणप्रक्रियामाह ॥ प्रमात्रंतिशयेनैव कारतां स्यात्प्रमात्रपि ॥ विज्ञानातिशयं

नुप
गुप

सिद्धे मानेन निश्चयपदत्पथा ॥ साभासमनन्तिष्ठरता प्रमाणज्ञानं प्रतिकारता त्वापत्तिक
ल्पितान्यथाभावाख्यातिशनैव तस्याकारतामनतिशयोत्यस्यतरं तदेव प्रमाणज्ञानाख्याति
शापविशिष्टं सिद्धमिति ततो ज्ञानत्वाद्विलं मानं विषयनिश्चयफलासिरस्कमवतीत्यर्थः ॥ अ
पि वस्तुभारतो तथेति क्रियानुरूप्यते निश्चयस्याकारोक्तिपूर्वकं तेन न तुल्याकारत्वं ज्ञान
स्याह ॥ मेयसाधारणतमोत्यरूपवान्निश्चयो यथा ॥ बालमेवायप्रधानत्वे सत्यसाधारणार्थ
धीः ॥ घटादेमेयस्यासाधारतो नात्ममानिश्चयत्वाकारविशिष्टो यथा मानफलभूतो निश्च
यस्तथा ज्ञानस्य घटादिप्रधानेकत्वापरत्वे सति घटोयं घटोयमिति घटाद्यसाधारणा
कारैवधीरूढेनोति मानतत्फलयोस्तुल्याकारतेत्यर्थः कदाचित् विषयस्याप्राधान्ये मानादे
श्चोपसर्जनत्वं तदाह ॥ मानव्यापारकालेस्या ह्यामेयोपसर्जना ॥ आभासादिप्रमाणानां

श्री

महिष्टफलोद्भावितैः ॥ यदा ज्ञानस्य फलं विषयमुत्पादयितुं व्याप्रियते तदा ज्ञानं न तत्क
र्तीतद्गुणतास्यास्य प्रत्येतव्य घटादिप्रधानीकृत्य तद्गुणतया ज्ञानस्य वर्णनं भवति घटादिवि
ज्ञप्तित्वेन फलोत्पत्तेरिष्टत्वादित्यर्थः ॥ कदाचिद्विषयस्य प्राधान्यं बुद्धेश्च प्राधान्यं तदा
ह ॥ प्रमाणस्याप्रतेस्तेर्थवासनाधानकारित्वात् ॥ प्रयोपसर्जना बुद्धिः सत्यासा साप्रती
यत्राप्रमाणं स्वफलनिष्पत्यजननव्यापारानन्तरं कृतार्थतया निवर्तमानं स्वाश्रये मातरि
वासनामाधाय तद्रूपेतानि ष्पत्ति तस्य तदात्मना प्रियत महदादिवि रूढाधितं सत्ति रू
पेतोन्यद्यातेस्य रता काले मेयमुपसर्जनीकृत्य बुद्धिर्भवतीति तत्प्राधान्यमेयस्या
घगुणता इत्यर्थः कदाचिज्ज्ञेयस्य ज्ञानस्य च कदाचित्प्राधान्यं चेत्तदा कथमेकमेव वस्तु
प्रधानमिति स्वमतसिद्धिस्तत्राह ॥ साक्षात्कुर्वन्त्व मात्मानं यदा लिङ्गेन तावगतो कार्य
कारणरूपस्य तदेवात्मबोधेन मतम् ॥ सर्वत्र कर्तृत्वकरणमात्मा संप्रमाता ज्ञाप्रितं स्वविष

यस्मा सोत्कारं कूटस्थचैतन्यतादात्म्यारोपादापादादृय घटकूटस्थापरोक्षचैतन्यमा
श्रयत्वेन स्वीकृत्यापि तत्तो गच्छतीति तदेव यत्पोक्तं चैतन्यं कार्यकारणप्रपंचस्यनिर्दे
ति रज्जुरिव सर्पादेरधिष्ठानं तस्मात्तदविद्याविलसितत्वान्न स्यादेकमेव प्रधान
मिति पक्षस्य न क्षतिरित्यर्थः अनेक प्रधानोपगमकृतदोषाभावेपि मेयोपमर्द ना
बुद्धिरिति वदतास्मृतेर्मेयागीकारादनालिंगितबाह्यार्थास्मृतिरिति स्वमतेत्प
कृमिति चेन्नेत्याह ॥ पूर्वोपलंभसंस्कारसमुत्थस्मृतिविभ्रमानां ॥ वस्तुतोवज्ञाति
वेद्यविषयव्यापारः सा तु लौकिकः ॥ सविषयानुभवजन्यसंस्कारोत्थास्मृतिर्यास्यास
विषयेव भासत तस्सर्वः स्मा तौ व्यवहारो वस्तु तौ न वस्तुस्वरूपानुसारीति न सिद्धान्त
हानिरित्यर्थः स्मृतेर्वाह्यार्थाश्रयत्वे ज्ञानत्वाविशेषाज्ज्ञानमपि तद्धीनं स्यादित्या
शंक्याह ॥ मेयाभिसंगतेः पूर्वं ज्ञानं ज्ञानं समाश्रयम् ॥ ज्ञातत्वासिद्धये ज्ञानं ज्ञातत्व

त्व

तत्कृतं यतः॥ ७ प्रत्यये गात्मवं तादृगतज्ज्ञातृंसिद्ध्यर्थं ज्ञातारमाश्रित्य ज्ञानं तिष्ठति ज्ञा
तृत्वस्य तत्कृतत्वात्॥ न चार्थसंबंधं ज्ञानमेव नास्त्युपादानमनाशतो विशेषेणाव्यक्त्यमो
नस्य तत्संबंधेऽधात्म न चार्थव्यवहारस्यादयोगं विनाज्ञानकृतसिद्धान्तीति बाह्या
र्थतानस्यति भावः तर्हि स्मृतेरपि बाह्यार्थता ज्ञानत्वादनुमानवदन्यथा तस्मात्स्याद
र्थत्वविरोधस्तत्राह॥ वासनाचलतः स्यर्धंशोपवर्तिचिदिहेष्यते॥ मात्रमानाश्र
य बाह्यर्थहान्मतोष्यते॥ नात्र नागोचरं ज्ञानं बोधस्वभावलनेयव्यप्रज्ञानमनुभवा
ख्यस्व काले बाह्यविषयमुत्पन्नं तत्स्वकृतसंस्कारात्तदनाकारेतानुबुद्धौ ष्यत महद्दृष्टा
द्युद्बोधकानुरोधेन स्मरणमुद्बुद्धसंस्कृतिरूपेणजायमानं पूर्वानुभूतार्थसंस्कारद्गोच
रं बहिर्विषयमिव नवत्यतो वस्तुतोऽर्थाभावादनालिंगितबाह्यार्थत्वादेरविरो
धाद्बाह्यवासनावशात्त्वर्थवत्वं थीसिद्धेर्न किंचिद्दोषस्य पामित्यर्थः॥ ७ प्रचिद्याकालेमा

नोपपद्यतेति मुख्यावस्थास्वाभाव्यमुपसंहरति ॥ अपेक्षोवृत्ते वस्तु यावत्किंचिदिहोत्पद्यते ॥
मात्रे मात्राश्रयं तत्स्यान्न स्वतः सिद्धिनिष्ठितम् ॥ सर्वमपि सावेद्यजडं जगन्मातुर्मा
तासाक्षीतन्मात्राश्रयं सिद्धमिति ननु तत्रा उत्पादेव स्वतंत्रस्ते द्धमर्हत्यतश्चिन्मात्रमद्व
यमवेद्यमपारमार्थिकं सर्वमितरन्मायिकमित्यर्थः वस्तुस्वाभाव्यादित्यादि पारमा
र्थिकी चेत्यंतं भाष्यं व्याख्याय तत्रेत्यादि विभजते ॥ अन्तःकरणवृत्तिर्याचक्षुरादिस
माश्रया ॥ रूपादिविषयाभासा लौकिकी दृष्टिरिष्यते ॥ बुद्धिपरिणामश्चक्षुरादिकरण
को रूपादिविषयो लौकिकदृष्टिरित्यर्थः ॥ साक्रियत इत्यादि भाष्यार्थमाह ॥ तस्याश्चक्रि
यमाणत्वाज्जन्मनाशादिसंगतिः ॥ यन्नित्यादि भाष्यं व्याकरोति ॥ आत्मदृष्टिस्त्वियं स
त्याच्चिन्मात्रा जन्मनाशादिवर्जिता ॥ पूर्वस्या दृष्टेरस्या विशेषार्थस्तु शब्दः नित्यत्व
हेतौ जन्मादिराहित्ये हेतुमाह ॥ कार्यकारणयोस्तत्त्वं प्रत्यगात्मचितिर्यतः ॥ अथसा

न नित्या दृष्टिरिति बुद्ध्यादिगतदृष्टिवदन्यथा घटादिगतापि नित्या स्यादत आह ॥ तस्मान्नित्यच्छिदाभासो
बुद्धौ तत्प्रत्ययेषु च ॥ बुद्ध्यादिस्थापि सा दृष्टिर्यदलक्षिता नित्यैवेति साध्यं चैवं कल्प्यं नो चेद् घटादि
स्थदृष्टेर्नित्यत्वप्रसंगो बाधः ऽ एतावद्बाधकाभावात्तु कदाचिन्न बुध्यते दृष्टेर्नित्या दृष्टित्वस्थापि तद्वा
च्यत्वे हेत्वसिद्धेस्तल्लक्षितत्वे साधनवैकल्यादेव प्रसंगोपि प्रतिपन्नव्यस्तस्मात्किंचित्स्वकाशास्य चैतन्य
त्य एवेत्यर्थः आत्मदृष्टेर्नित्यत्वोपलक्षितं किं लौकिकी दृष्टिरनित्येति विशेषणाद्दृश्यंतरस्यानित्यत्वप्राप्तिरि
त्याशंक्याह ॥ प्रत्यक्चेत्परत्वाया बुद्धौ धर्मादिहेतुकः ॥ आकारो जायते नित्यो दुःखशब्दादिलक्षणः ॥
दृष्टिर्महत्याम्योपलक्षितात्वाद्बुद्धिवृत्तिसंसर्वी नित्येत्यर्थः बुद्धेः शब्दाद्याकारपरिणाम एव च्चिदुपरागो
पि धर्मादिकृतस्स्यादित्याशंक्योक्तमेव व्यनक्ति स्यात्तोप्रत्यक्चिदाकारे बुद्धौ धर्मादिहेतुकः ॥ आकारो
जायते बुद्धेरागमापायधर्मवान् ॥ लौकिक्या दृष्टेरनित्यत्वेपि पारमार्थिकी दृष्टिः आत्मा नैवं त्वयुक्तदृष्टेस्तुतत्वे
दव्यपदेशस्यायोगप्रसंगादित्याशंक्य मेत्यादिभाष्यार्थमाह ॥ नयाधिभूतया दृष्ट्या हानोपादानभूतया रूपया
एकाश्रयत्वतः स्यात्स्वसंसृष्टेर्वोपजायते ॥ एकाश्रयत्वं दृष्टेरेकबुद्धिस्थत्वं सादृश्यं धीतद्वृत्तिस्थं कर्तृ
त्वं क्रियात्वं चारोपान्नित्यदृश्यरूपमवाप्यते तेन व्यपदेशादित्यादिति शेषः नित्यदृष्टेस्तु कथं पश्यति न पश्यति
जायते नश्यतीत्यादिव्यपदेशस्ता

बुद्धितद्वृत्तिसाक्षित्वाद्बुद्धितः प्रत्ययैरजः। गृह्यतेऽविद्ययाभिन्नो मलिनीयद्वदुपाश्रये॥ यथोपाधिभिः
स्फटिकस्तत्तदाकारः क्रियते तद्वदभिन्नोप्यात्मा स्वाविद्यया बुद्ध्यादिसाक्षित्वात्तद्वशाद्दृष्ट्रादिवि
क्रियावानिवालीव्यवह्रियतेऽस्य ध्यः कस्मादात्मदृष्टेरनित्यदृष्टियोगादनित्यत्वेनावच्छिन्नयतयास्वतएव
विकिं न स्यादित्याशंकायां वाच्यतंत्लदृपत्वं चाह हेतुरिति विकल्प्याद्यं दूषयति॥ कर्तृकार्याद्यवभासित्वा
त्कर्तृकार्याभिधायिभिः॥ लक्ष्यत्वेनात्मभिः साक्षी साक्षात्त्वं नाभिधीयते॥ द्वितीयं निराह॥ तद्व्यामना
ऽभासित्वादज्ञो नात्मा स्वयंप्रभः॥ जायते नलक्ष्यतीत्येवं तत्साक्ष्यप्यभिधीयते॥ लक्ष्यत्वेऽपि नवस्तु
तोऽज्ञत्वादिसिद्धिस्तदृष्टेरौपाधिकत्वात्त्वेरित्यभिप्रायः॥ एतेन दृष्टित्वहेतुर्निरस्तः न दृष्टेरित्यादिवा
क्यतात्पर्यमनूक्तान दर्शनव्याचष्टे॥ दृष्टेर्दृष्टस्वभावायाः परव्याप्यायाः स्वतःस्थितम्॥ न परत्वेपप्रत्य
गात्मानं कथं परत्वप्रसिद्धिस्ततः॥ दृश्यविलक्षणत्वाच्च तस्य तयाविषयीकरणानुपपत्तेरित्याह॥ दिदृ
क्षितपरिच्छिन्नपराग्रूपाद्यपेक्षया॥ तद्विरुद्धं कथं परत्वेदृष्टात तत्कर्मभूतया॥ दृष्टिविषयाभावे
प्रत्यक्तत्त्वमाह॥ दृष्टिर्हि व्यापृतिर्दृष्टेर्दृष्टे रूपादिकर्मणि॥ नात्यां प्रत्यगात्मानं दृष्टेर्दृश्यप्यानया॥ क्रिया

कूटस्थं चैतन्यमुदासीनत्वान्नद्रष्टृ दृश्यमेतत्तस्य कारकत्व
मस्तीत्यर्थः तर्हि वास्तवं कर्तृत्वं नेत्याह ॥ कारकत्वमतोऽविद्या
कूटस्थस्यात्मनः कुतः ॥ ३
यां कर्तुरित्यास्कत्वं तस्याविषये फलाधायकं कर्तुः क्रियाफलभूतस्य न क्रियाव्याप्यत्वं नहि ब्रा
तीच स्वतः सिद्धतो दृग्व्याप्यत्वमित्यर्थः नन्वेवं सर्वसम्मतो द्योतको हि शब्दः आत्मा नित्यस्पष्टा दृष्ट्यादि
साक्षीत्युक्तमिदानीं तत्कर्तृत्वमपि तस्यैवेत्याशंक्याह ॥ नाकारकसमीक्षेत दृग्दृ दर्शनगोचरान् ॥ यथैका
त्म्यमारोपितकर्तृत्वेन द्रष्ट्रादिकमीक्षेत तथाकारकं भूत्वा स्वपरदृष्टिं न करोत्यविद्यासंबंधस्यापि व
स्तुतोऽभावादित्यर्थः तत्र हेतुः ॥ कारकत्वमतोऽविद्याकूटस्थस्यात्मनः कुतः ॥ कर्तृत्वस्याविद्यत्वेऽपि
तत्संबंधकृतं स्वपरदृष्टित्वं वास्तवमित्याशंक्याह ॥ कारकसत्त्वेकोऽस्य न कथं पन वीक्षते ॥ अविद्यान
न्वेयात् ॥ यथैकात्म्यमारोपितकर्तृत्वेन द्रष्ट्रादिकमीक्षते तथाकारकं भूत्वा स्वपरदृष्टिं न करोत्यविद्यासं
बंधस्यापि वस्तुतोऽभावादित्यर्थः तत्र हेतुः ॥ नास्त्यतत्त्वस्य ज्योतिःस्वतत्त्वतः ॥ प्रतिबंधविधुरस्फुर
त्तामात्रत्वादित्यर्थः ॥ न दृश्येरति ॥ प्रत्यर्थे प्रत्यगन्तरं संवादयति ॥ येन चक्षुरिदं दृश्यं चक्षुषा यन्न पश्य
ति ॥ ब्रह्मविद्धि तदेव त्वं न तु तदिदमुपासते ॥ बाह्येन्द्रियाविषयत्वेऽपि मनोविषयता स्यादित्याशंक्य न मे
तरत्वादोऽस्यान्तरसमतिमाह ॥ मनसा मनुते येन येन चाहुर्मनो मतम् ॥ ब्रह्मविद्धि तदेव त्वं नेदं

यदुपासते॥ कृत्यन्तरसंवादं निगमयति॥ इत्येवमादिव्यवाक्यानि मयो ह्यार्थसमर्थनोऽस्मोतानि
शातशास्त्राणि॥ यथोक्तार्थसमर्थन इत्यस्यैव व्याख्या॥ दृगमेयत्वे सिद्धे ऽप्रात्मनोऽस्मै यत्वे श्रुतिमु
क्त्वा युक्तिमनुचिनोति॥ एतन्मोहसमुत्पत्त्वात्प्रमात्रादेर्न नागपि॥ नैकात्म्यं शांकनेऽइत्युक्तं तहेतोर्व्याध
या॥ दृङ्मे मात्रादि तस्य हेतुरज्ञानं तस्याबाधया कृत्वा तत्त्वं मात्रादिनानन्तोऽतु शाकमज्ञानादि प्रतिबन्ध्या
न्ने पेते ज्ञाने तदुत्य मात्राद्यभायान्तन्ने न सुज्ञानं तदभेय प्रत्यग्वत्स इत्यर्थः॥ नरहेरि त्यादि श्लोकानुसारेणाव्या
ख्यायमर्थं पूर्वं च व्याख्यामनुवदति॥ दृष्टेनेदमकृत्वैव दृष्टेरित्यादिकां श्रुतिं॥ केचिद्याचयत्ते धीराः प्रसा
दात्प्रान्तवेदसौ॥ कथं तद्व्याख्येत्याशंकनेत्यादि श्रुत्यक्षरार्थं तादृगमाह॥ दृष्टेः कर्तारमात्मानं न पश्येः क्रि
यमाणायाद्दृष्ट्या॥ दृष्टेहि चक्षुर्द्वारजाता धीवृत्तिरूपं गोचरयति तस्या दृष्टुर्दृश्यत्वान शक्योऽविषयीकर्तुमि
ति हेतुमाह॥ रूपानुपातिन्या॥ किंच न सा विषयीकरोति तत्र क्रियात्वात् अतिरिच्यगन्तारमित्याह॥ न क्रिया
कर्तृकर्मिका॥ एवं व्याकुर्वताममभिप्रायमाह॥ दृष्टेरिति च षष्ठी य॥ कर्मणि पेच षष्ठी त्यत्र दृष्टेरात्मनानिष्पा
द्यत्वं हेतुमाह॥ क्रियमाणत्वहेतुतः कर्मण्येव तु विज्ञेया॥ सकर्मिकायां क्रियायां कर्मेति रंगत्वं गमयितुत

तः

त्राद्ध्रः एवकारार्थमाह॥ नासाववर्धीतदेयथा॥ क्रियमाणाया दृष्टेः नृोषरूपस्यार्थान्तरस्यव्यवहरंगत्वादित्या
यतः॥ षष्ठीमाख्यायद्धितीयांव्याचष्टे॥ दृष्टिकर्तृत्वमाचष्टे तज्जं तेन महात्मनः॥ तत्कषष्ठ्यर्थं दृष्टान्त
यितुं तथेत्युक्तं। अस्य कर्म दृष्टिर्द्रष्टा च कर्त्री किं ततो जातं तदाह॥ यतोऽतः कर्मदृष्ट्यानात्मद्रष्टा रूपैनानुपपद्यन्ते
कर्मत्वं दृष्टेस्स्यपद्यते॥ कर्मणि तत्तमरूपं दृष्टेः कार्यत्वहेतुतः॥ यथाहुः दृष्टिः क्रियातस्या यद्रूपं तत्कर्मत
दुर्ग्रपितमिति। आत्मनस्तु कर्मचेत्किं करणमित्युक्तेः चक्षुर्मनो बुद्धिरिति करणानीति तद्दृष्टमनुसन्धत्या
ह॥ चक्षुर्मनो वा बुद्धिर्वा कर्तृकरणमिष्यते॥ जीवः परो वा द्रष्टेति संदिहानं प्रत्याह॥ विज्ञानात्मा तु कर्तात्र
दृष्टिसम्पादने॥ तत्र हेतुः॥ स्वातन्त्र्यात्सर्वकर्मसु॥ कारकान्तराप्रयोज्यस्वतन्त्रयोक्तं स्वस्यातन्त्र्यं तदस्ति जीवस्य
सर्वासु क्रियास्वितियुक्ता दृष्टिकर्तृतेत्यर्थः॥ विज्ञानात्मनि वर्त्तमाया दृष्टिक्रियायाः फलरूपोपलब्धिरिति तद
न्यां तद्दृष्टिफलमाह॥ फलरूपोपलब्धिश्च कर्तुर्दृष्यवसानजा॥ इत्यस्य व्यास्यायां द्रष्टृदृश्यविषयत्वस्यपी
कर्तृकर्तृत्वभागुणत्वेन दृष्टेः पर्यवसानमाचष्टे॥ साधनत्वेन कर्तात्र दृष्ट्यवपविसर्गतः॥ तत्कं तदाह॥ क्रियासा
धनत्वेन विनियुक्त इति क्रियायाः कर्तृत्वे गुणत्वमुक्त्वा फलत्वेन प्राधान्यमाह॥ क्रियासिद्धावनेकाले फलेकस्यापि

चेष्यते॥ उक्तं हि॥ क्रियासिद्ध्युत्तरकाले फलं तस्यापि न व्याप्यतीति किंशब्दार्थं प्रकटयति॥ स्वामिनो यदि उ वान्यस्य
स्वामीजीवान्यस्तादुपाधिमीतासामा सद्बुद्धास्यस्तयोरयोरन्यतरस्य रूपाद्युपलब्धिः फलमित्यर्थः॥ फलव
त्क्रियापि रूपस्यात्मनो वेति विकल्प्यतामित्याशंक्याह॥ कर्मत्वे सेवा च क्रिया॥ क्रियाहीप्सिततमकर्मत्वप्रमि
मुखीभूते त्सुकृत्वाज्ञानसंवेदनफलकक्रियासारूप्यादिविषयानात्मविषयेत्यर्थः तदेस्फोरयति॥ कर्मदर्शि
यितमस्यादृष्ट्या दृशानदृक्रूपता॥ यथाद्रु॥ तद्दर्शयेव्यक्तेति उक्तारीत्यास्यिते विभागेन पालितमुपसंहर
ति॥ तन्नैवं सति तदृष्टेर्दृशारकर्मत्वसया॥ दृष्ट्या पन्नेय स्वमात्मानं न वक्ष्यत्व न कर्तृत्वः॥ उक्तं परस्यासंख्या
त्रस्याख्यातुं प्रक्रमते॥ व्याख्यानमेतन्महतां न साधु प्रतिभाति नः॥ न्यायाक्षरानुपातित्वात्तथा तदभिधीयते॥ तन्न
कृत्यसेरानुपातित्वमुपपादयति॥ यथा श्रुत्यभिमतवस्त्रत्युक्तिर्नोपपद्यते॥ दृष्टिकर्तारमधिकृत्य प्रवृत्तानदृष्टे
रित्यादिप्रत्युक्तिर्यत्साक्षादित्यादिश्रुत्यनुसारिणीने त्यत्राह तु माह॥ यतो दृष्ट्वा संभाव्य कृत्स्नं प्रश्नविशेषणम्॥
प्रश्नवाक्यस्य विशेषणजातस्य दृष्टिकर्तरि कथम् संभवश्चेत्यत्राह॥ साक्षादित्यादिकं यस्मान्नमनागपि युज्यते
विशेषणं यथोक्तं तत्कारके दृष्टिकारणे॥ यथोक्तं सर्वांतरत्वं तस्मान्न प्रश्नानुपपत्तिस्तत्राह॥ नेत्तपरमात्मा

ष्टो॥ नापि पृथग्भेदे विवक्षितौ॥ तत्र हेतुः॥ ऐकार्थ्ययोगाद्वाक्यस्यैकोक्तेः स्याद्व्यपेक्षिता॥ ऐकार्थ्यैक
त्वादेकवाक्यमिति न्यायादित्यर्थः यत्तु दृष्टेरिति षष्ठी कर्मणि तस्याश्च क्रियमाणत्वेन कर्मत्वं दृष्टे
रादिष्टं तन्निराकुर्वन्नस्य व्याख्यानस्यानुपपत्तिमाह॥ न चेप्सिततमत्वं स्याद्दृष्टेर्दृष्टेरसंभवात
दृष्ट्यन्तरस्य॥ दृष्टेरिष्टेराप्तिन कर्मत्वं दृष्टिविषयदृष्टेरसंभवादित्यर्थः दृष्टान्तं साधयति॥
दृष्टेश्चानवस्थापत्तेरनवस्था॥ तत्र तदाशंकेति कोक्तिः उभयत्र दृष्ट्यन्तराभ्युपगमे को दोषस्तत्राह॥ तद
भ्युपगमे च स्यादनवस्थाऽनिवारणा॥ तस्मान्मूलक्षयकरीत्येव दूषणत्वात्तत्कल्पयितुमनिवारणत्वे
ति विशेषणतात्पर्यमाह॥ दृष्टयन्तरेणानवस्थापत्तिर्नात्र दृष्टेः कर्मत्वं॥ दृष्ट्यन्तरेणानवस्थापि दृष्टं स्यादृष्टेरि
त्यपि दृष्टेरुपलक्षणं यत्तु दृष्टेः कर्तृत्वमित्यादि तन्निराह॥ तथा दृष्टेर्ग्रहीत्ये च कामितार्थसमाप्ति
तः॥ नेरर्थ्यकामिदं च स्यात् दृष्टेरिति यदुच्यते॥ यथा दृष्टेरिति षष्ठी न कर्मणि तथा दृष्टेस्तस्य
कर्तृत्वेन संभवतीतियावत दृष्टारमिति दृष्टेः कर्तृत्वविवक्षायामिष्टेर्यो दृष्टेः कर्तृत्वं तस्य दृष्टपदेनैव
सिद्धे दृष्टेरित्यनर्थकमित्यर्थः॥ अवधारणाप्रकारः परपक्षे दृष्टिविशेषणतामधिकमित्यत्र हे
त्वंतरमाह॥ मदेवाव्यभिचारित्वाद्दृष्टिदृष्ट्रोः परस्परमविशेषणताविशेष्यत्वव्यभिचारे सतीष्यतो॥

नो लो त्पलयोर्मिथो व्यभिचारे सत्युत्पलस्य नीलेन विशेष्यत्वं दृष्टं न तथा द्रष्टृदृश्ययोरन्योन्यं व्यभिचा
रो नहि द्रष्टा दृष्टिं व्यभिचरति तं वा दृष्टिरतो दृष्टेरित्यनर्थकमित्यर्थः । सत्यमनर्थकमपि प्रमादात्पठि
तमित्याशंक्याह ॥ न च प्रमादपाठो यं सर्वेषामविगानतः ॥ सर्वेषां मित्यनयेषां शाखिनामित्यर्थः । अ
र्थवादत्वेन तर्हीदमुपात्तं नेत्याह ॥ विध्यशेषत्वतो नापि चार्थवादत्वमिष्यते ॥ यत्तु कर्मद्रष्टृयित
व्यं न कर्त्रेति तत्राह ॥ न ह्यतद् दृश्याधिगम्यत्वमपि द्रष्टुरिष्यते ॥ द्रष्टुरहंधीधी धीवेद्यत्वे लौकिक
परीक्षकसंमतेपि न दृष्टेरित्यादिश्रुतौ तस्य दृष्टिविषयत्वं निरस्यते तु न्यायमित्याशंक्याह ॥ अस्य समावि
रुद्धत्वतथाचोक्तेः प्रसज्यते ॥ ॥ परस्परप्रमाणान्या यविरोधमुक्तस्यो क्तविरोधमाह ॥ मेयमानप्र
मातृणां प्रात्यस्ते प्राशमीरितम ॥ आख्यान्य रोधितेनेयं दृष्टेरित्स्य न यावृता ॥ दृष्टेरहंधीरगम्य
त्व यथेदानीमुक्तं तथेत्यपेरर्थः । इरितं मतं ग्रथं चेरितिविशेषः । न दृष्टेरित्यादि वाक्यस्य प
व्या रकीयं व्याख्यानिरस्य स्व व्याख्यानव्य व स्थाप्य मतो स्य दानैमित्यस्यार्थमाह ॥ यथोक्तात्म
नोन्यद्यत्कार्यकारणरूपकर्मप्रांत्तविनाशितत्तु त्वम ॥ कारणसंसर्गरूपं नाशितं निवर्त
यति ॥ तुच्छमिति ॥ अपासिद्धांतं परिहरति ॥ श्रुतिकारजनादिवत ॥ नाक्यार्थमुक्त्वाथिकमा

श्रीमाह॥ एतदेकमनार्त्तं स्या स्वतः सिद्धं तत्त्वकारणात्॥ स दैवानुदितालुप्तत्वस्य गृहस्यैतत्त्वकं॥ न कोहि॥ एत
देवैकमनार्त्तमनार्त्तमविनाशि कूटस्थमिति॥ अतः शुद्धमनेद्यापि तदमाद्यार्थं तरमाह॥ हेतुं किर
य चातः स्या॥ हेतुरूपं षष्ठमंत्र्येवमनादि॥ दुःखवेसत्स्वभावतः नदन्यभावाभासमिद्धेरा हीनं वहेतुमीद्ववे
पंच मस्याध्यायस्य चतुर्थं व्याख्यानाम्॥ ॥ साक्षात्वादिविशेषता वतो वस्तुतः सर्वत्र प्रत्यक्षेन स्वभावत्वा
दैवं न दुद्धिक्तस्य सत्वासिद्धेरर्थाहरत्येभासमानेसर्वं तुच्छमेवस्यादेवमनात्मप्रपंचस्यानित्वमतः
श्लोको हेतुसहितमुपपन्नमित्यर्थः॥ का॥ त्पस्तव्याख्यानाम्॥ सर्गाणित्व कूटस्थ नमनुद्भवति॥ अवाद
वानिर्दिष्टमसर्वबंधनसप्रयोजकं॥ अस्तित्वभाति दिक्तत्वे बद्धस्य च विनिवृत्ते॥ व्याख्यानं अत्रपेण
कर्मादिप्रयोजकसहितस्य संसारं रक्तः॥ चतुर्थेन कूटस्थबोधः प्रत्यगात्मा मुमुक्षुर्भिज्ञित इत्यर्थः॥ अत्र
रव्याख्यानतात्पर्यमाह॥ संसारानर्थसंप्राप्तिहेतोर्विध्वस्तोऽपधुना॥ संन्यासेन कस्य हानि यान्या त्यक्ता
न मुच्यते॥ सहेतुसंर्धश्च नन्ध्वंसि ससंन्यासस्य स्यज्ञानं व कुं पंचमं व्याख्यानामित्यर्थः॥ ननु आ

१५

नमेव वाच्यं तस्याज्ञानध्वंसित्वान्न संन्यासस्तस्य ज्ञानात्प्रागूर्ध्वं चानुपयोगाच्चात्राह। अत्यन्तस
म्यक्कृतानस्य संन्यासो लक्षणं यतः॥ साधनं च तदुत्पत्तौ संन्यासोऽतोऽत्र भण्यते॥ साधनं च जिज्ञासोर्वि
विशेषः अत्रैतत्त्रितत्कृतज्ञानप्रकरणोक्तिः तस्य तत्साधनत्वेमानमाह॥ प्रवृत्तिलक्षणो योगो ज्ञानसंन्यासल
क्षणः॥ तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान्॥ स्वाभिप्रेतां संगतिमुक्त्वा मतं प्रपंचाभिप्रेतां तावत्कु
पूर्वपक्षयति॥ नेपत्पप्रपञ्चवाक्यकरणे नापि प्रच्युतो॥ तत्किमर्थं पुनर्देष्टः एव कृतनिर्णयः
तत्रैतच्चार्थे भेदाभावे सतीति यावत् पुनरुक्तिपरिहारं चाशंकते॥ प्रष्टृभेदाद्दोषश्चेन्नैव प्रायुक्तिभेदतः
एकार्थप्रश्नवाक्यस्य हेतोः पुनरुक्तिर्निवार्यते॥ दूषयति॥ नैवमिति॥ एकार्थस्य प्रश्नस्य भिन्नकर्तृकस्यापि प्र
तिवचनमेकमेव युक्तं प्रतिवक्तृभेदाभावादिह तु न दृष्टेर्योऽत्रानायेत्यादि प्रयुक्तिभेदोऽस्य ते न प्रष्टृभे
दः पुनरुक्तिपरिहारे दिस्पर्धः॥ अस्तु तर्हि पुनरुक्तिरेव हृदयस्तेहि शास्त्रवाग्भेदे पुनर्वचनं नेत्याह॥ पुन
रुक्तेन च न्याय्यो नेकप्रवचने क्वचित्॥ प्रवचनशब्दः विषयः प्रष्टृभेदात्पुनरुक्तिपरिहारेणेनान्य

२५

हेत्वन्तरमाह॥ न चेहलौकिकोऽनुत्पन्नः अपूर्वभेदो यतोऽभवेत्॥ नहि स्मृतौ लोकवत्प्रसिद्धो जन्मोक्तियेन प्र
भूतभेदः पुनरुक्तिपरिहाराय स्यादपौरुषेयत्वाभ्यो वाक्यावस्यभेदस्यानिश्चितात्वात्लिन्नस्याकल्पितत्पु
नरुक्तिपरिहाराय नुपपद्योऽजित्यादिपूर्वपक्षः सिद्धान्तयति॥ समानशाखो तेनेभेऽस्यात्ताभिन्नार्थवाच
कौ॥ कहोलोपनस्तवस्तोक्तोऽप्रघनावितिनिर्णय॥ एकार्थत्वे पुनरुक्तिस्तत्र व्याप्यः कथं तयोनि
त्यार्थत्वं तत्राह॥ दोवेज्ञ, आत्मानं मभ्राक्षीदुवस्तोऽनपरं पदम्॥ अथाज्ञीत्परमात्मानं कहोलोपविनद्ः
खिनम्॥ यद्याहुः॥ पूर्वः प्रश्नः परमात्मविषयो यश्चिज्ञानात्मविषयान्ति यन्नि माध्यंदिनशा
खया नाम्नयोर्वाप रमुक्तेय, अस्याहि विज्ञानात्मेन्तः परमात्मस्यप्य यो वक्रस्व इति वदक्रिस्त
यारेकामिष्ट तन्नप्रश्नयोर्भिन्नार्थत्वयुक्तमित्याशङ्क्याह॥ एकदेशानुपन्यासादेकात्म्यमवसीय
ताम्॥ एकस्मिन्प्रकरणोद्धयोरुक्त्याप्राकरणिक तदेकान्तत्रोषस्तप्रकरणो याकार्थावयवोवि
ज्ञानात्मानिरुच्यते कहोलप्रकरणानुतद्भागः परस्तोयोर्भिन्नार्थत्वे युक्तमित्याशङ्क्याह॥ एकदे
शानुपन्यासादेकात्म्यमुपसीयते॥ एकस्मिन्प्रकरणोद्वयोरुक्त्याप्राकरणिकं तदेकान्तत्रोष

१८

कोत्र प्रकरणे वाक्यार्थो यः पक्षो विज्ञानात्मनि रूढ्यते कहोलप्रकरणे तु तद्भागः परस्यायोस्य समानेदेशे
नुपमासात्समानकार्यतेत्युक्तत्वादित्यर्थः । वाक्यार्थभागौ जीवपरौ प्रश्नविषयावित्ययुक्तं प्रश्नयो
र्धर्मीभेत्यामाद्येकार्थत्वदर्शेरित्याशंक्याह ॥ मिथः संकीर्णधर्मो ज्ञौ पर्यायेणाव्यवस्थितिः ॥ यद्य
पि जीवपरधर्मौ परस्परं संकीर्णाविवोच्येते तथापि यथासंभवं व्यवस्थितत्वेनैव व्याचित्येतदे

त

वदर्शयति ॥ परमात्मनेव प्रागुक्ते त्यपरात्मनि ॥ तदेकदेशाभिहतो विज्ञानात्मनि नेष्यति ॥ क
होलवाक्ये परात्मधर्मत्वेनोक्तमशनायाद्यतीतत्वं विज्ञानात्मधर्मत्वान्नेमेवपक्षगतं गमिष्यत्येकस्मिन्प्र
करणे द्वयोरुक्तत्वे तत्र तमत्र परमात्मन्युच्यमानं विज्ञानात्मनि सिद्धं भविष्यतीति तदुक्तेरित्यर्थः
परात्मधर्मदर्शितो विज्ञानात्मधर्मोपि योजयति ॥ शोकमोहाद्यतीतत्वं प्रकाशात्मकता तथा ॥ विज्ञानात्म
नि चोक्तापि परमात्मानमेष्यति ॥ यद्यपि शोकाद्यतीतत्वस्वप्रकाशत्वं च ज्योतिर्ब्राह्मणे जीवमु
क्तं तथापि तस्याचमिकं परं गमिष्यति तस्य तद्धर्मतया तथात्वेनैव संबंधाच्छोकमोहाद्यतीत
ता प्रकाशमात्ररूपता च विज्ञानात्मन्युच्यमाना परमात्मनि सिद्धा भविष्यतीति तदुक्तेरित्यर्थः

१८

प्रश्नयोर्विषयभेदमुक्त्वा पंचमश्लोषस्य कः। लप्रकरणे नैकवाक्यतामाह॥ पंचमाध्यायशेषता प
रमात्मविनिर्णीता यथा। तदुक्तं हि। पंचमाध्यायशेषेण परमात्मनो निर्णयो वक्ष्यमाण इति॥ ज्योतिर्ब्राह्म
णादेरूपस्य प्रकरणे नैकवाक्यतामाह॥ षष्ठे तु वक्ष्यते ध्याये विज्ञानात्मनि निर्णयः॥ यथाहुः॥ ष
ष्ठे न विज्ञानात्मन इति प्रश्नयोर्भिन्नार्थत्वेन गमकमाह॥ उपन्यासोद्धयो ह्यत्र विज्ञानात्मपरात्मनोः॥ व्य
ाप्यनसेकेचिन्यायमार्गसमाश्रयात्॥ तदुक्तं। अपुनरुक्तेनहाद्धृती येन प्रश्नेन न विलक्षण्यमितिपर
पक्षमुपसंहरतीति॥ इति तद्धीच नेतकोचित प्रश्नावेतौ यथा द्वितौ॥ आसराद्ध येनार्थद्ध यवि
वक्षितमित्येतदयुक्तमित्याह॥ न सम्यगेतद्व्याख्यानं यथा तदभिधीयते॥ सम्यक्त्वं न कि॥ प्र
त्युक्ते रेषत इति प्रश्नयोरुभयोरपि॥ नेत्रत्र परमात्मानो नात्रात्मनो विवक्षितो प्रत्युक्तेदिव प्रश्न
योरेकरूपत्वप्रत्यभिज्ञानाच्च न भिन्नार्थतेत्याह॥ प्रश्नोक्तिरेकरूपा च प्रत्यभिज्ञायते जसा॥ प्रश्न
प्रत्युक्त्योरेकरूपत्वे प्रफलं निगमयति॥ प्रत्युक्तिश्च तथात्मेति भिन्नार्थे वचसी कथम्॥ प्रश्नैककरू
पसमुच्चयार्थश्च कारः इतश्च वाक्ययोर्न भिन्नार्थतेत्याह॥ एकवचनसंभाव्यावात्मनो द्वौ शरीरके

मन्वेकत्र भोक्तृद्वयायोगोपि भोक्त्रभोक्त्रोर्न योगो गुहाधिकरणन्यायादुपन्यस्तं कहोलयोश्च संघात
भेदाद्धात्मभेदोत आह ॥ आत्मप्रत्यय एकार्थ ॥ आत्मेति प्रत्ययस्तावदेकविषयस्तस्य वस्तुतो भिन्न
विषयत्वे मानाभावादित्यर्थः एको देवः सर्वभूतेषु इत्यादिश्रुतिविरोधाच्च वस्तुतो नात्मभेदो श्री
स्याह ॥ न्यायश्रुतिवचांस्यपि ॥ आत्मैकसाधकानुमानाविरोधाच्च तद्भेदो नेति रहस्य चायो रूपमारयति ॥
एकात्मनः सर्वदेहविवादो विषवर्धने ॥ शरीरत्वाविशेषत्वात्स्वतिवादिशरीरवत् ॥ आत्मैकोपि
द्वेधा स्य द्वयस्यात्मद्वयविषयत्वाद्योगमुक्तमनुवदति ॥ [illegible] सामस्य [illegible] इत्यादि कस्य च ॥ ते
वाप्यात्वेष्य वाक्यस्य आत्मानो द्वौ द्विवदिते ॥ प्रश्नयोर्भिन्नार्थत्वाद्योगे हेत्वन्तरमाह ॥ प्रयोगाद्भेदबुधा
नादि चित्रे [illegible] विरोध्यता ॥ नानैकस्यात्मनो न्याय्या ॥ एतैश्चिरोधतो विशेष्यते तियावत् ॥ अनेकस्या
गोतात्पर्य [illegible] भवादिति हेतुमाह ॥ तत्त्वमस्य [illegible] भेदे दोषान्तरमाह
[illegible] विरुद्धे [illegible] भिन्नभिन्नवत्तयोः ॥ ब्रह्मात्मैकं [illegible] उपनिषदां [illegible] वस्तुतस्तद्भेदेन सार
स्मात्भिन्नयोरेकत्वा नायोगात्कल्पिते भेदे प्रश्नयोर्न भिन्नार्थते त्यर्थः किंच जीवेश्वरयोर्वस्तुतो भेदे

जीवस्य ब्रह्मत्वाद्भोगो मोक्षो न स्यात् तेन चाविद्यासंयमस्याप्यनित्यत्वस्य दोषे हेतुः भावादेवाभोगाद्दोषफले
शास्त्रमनर्थकमित्याह ॥ ७ ॥ न निर्मोक्षे धर्माधर्मक्षये दोषः परमात्मनो जीवस्य च तादात्म्यभेदाभावे हेतुमंतरमाह ॥
७ ब्रह्म स्वदृष्टिविषयो निषेधे पि न युज्यते ॥ प्रविष्टस्य न चेत्का वस्तुन्यविज्ञानात् ननु इष्यते ॥ स यो
ता एकैकमनुपास्तेन स वेदा कृत्स्नो हि स इत्यादि निषेधः ॥ ७ ॥ आत्मभेदं निरस्य प्रसंगादनात्मभेदमभ्यनु
दाति ॥ वस्तुत्वमनुरोधेन नानात्वभेदो स्ति कुत्रचित् ॥ ७ ॥ आत्मा परिच्छिन्नत्वे मतः शोध्याप्यैः च स्ताच्चेदपरि
च्छिन्नकल्पपरिच्छेदमानं तत्राह ॥ वस्तुत्वात्तननभिज्ञाना इदं स्वप्नेंद्रजालवत् ॥ ७ ॥ आत्माभेदे प्रश्नैकव
फलमाह ॥ एकएव ततः प्रश्नो न च प्रश्नद्वयानिष्पत्ते ॥ पुनरुक्तिस्तर्हि तदवस्थेति तत्राह ॥ कंचिद्वि
शेषमापेक्ष्य पृष्टो न यथापि परिच्छ्यते ॥ तमेव विशेषं दर्शयति ॥ उपदेशस्य विषयः प्रश्न प्रस्तुत वाक्यार्थः
निर्धारितपुरातस्य यथार्थात्मतत्त्वं च परिच्छ्यते ॥ पादत्रयोक्तमाद्य प्रश्नविषयं विवयदयति ॥ प्रसन्नस्याति
लोक्तस्तत्रा ही प्रश्नस्य गोचरः ॥ पोड्प्रश्नादि इति ॥ प्रमानव्यतिरिक्तस्तत्वसादी मासादि प्रश्नस्य योग्यो द्विसा ३
विषयः प्रत्यगात्मानुमनुत्तरमस्तीति पूर्ववत्प्रश्नप्रस्तुतिः सोऽनिर्धारितात्मित्यर्थः तस्य त्वादिनोक्तेव्य
नक्ति ॥ ७ ॥ प्रश्ना नायाव्याती तत्व पूर्वोक्तस्यैव वस्तुनः ॥ द्वितीयेनोच्यते तत्त्वम् ॥ तत्त्वप्रवचनफलमाह ॥

शेषः पूर्वप्रश्नार्थसंग्रहः ३

प्रसङ्गो हि निवर्तते॥ पूर्वं प्रश्नस्याविशेषजिज्ञासया प्रश्नान्तरप्रवृत्तिमुक्त्वा अकामान्तरेणात्रस्य
त्तिमाह॥ यथा प्रश्नप्रतिवचो न सम्यगुदितं पुरा॥ इति मत्वाथ वाग्वादी त्यक्त्वा पर्यं पुनर्ऋषिः॥
कथं यथा प्रश्नं प्रतिवचो नोक्तम्॥ साक्षादित्यादिनापृष्टस्य साक्षादित्यादिलक्षणाम्॥ यथा सभा मते
नेह कश्चित्प्रस्तोऽकिंचिद्दीर्यते॥ प्रसंतोषहेतुमुक्त्वा ह्यस्य फलमाह॥ प्रसंतोषात्कहोडो हि पृष्टप्रश्न
मेव लुप्त [illegible] प्राची [illegible] मुनिः॥ यथा प्रश्नं प्रतिवचो नोक्तं चेद् दुष्टस्तेनेव [illegible] यं कथमत्र पृष्टं कलितवानाह
विद्वान्॥ कहोलस्य प्रश्नस्य प्रयोजनमाह॥ याथात्म्यार्थावबुद्धये॥ प्रसक्तस्य तत्तोषस्य प्रश्नस्य
निर्णीतत्वान्नासंतोषहेतुरस्तीत्याशङ्क्याह॥ एष आत्मेति प्रस्तुतिर्यः प्राणेनेति चापरा॥ तावन्मात्रे
क्तेनासौ प्रश्नार्थोऽवधृतो भवेत्॥ तथा च पृष्टस्यार्थस्य सम्यगनिर्द्धारितत्वात् तन्निर्द्धारणेषयानुवृ
त्तेरेव प्रश्नोपपत्तिरिति विशेषः एकमेवात्मतत्वमधिकृत्य प्रश्नाविस्यत्र चोदयति॥ ननु भिषद्धती
त्वे दुःखिलचोदयातनानि॥ एकदेशकृत्रनस्यातां प्रकाशतमसी यथा॥ प्रश्नार्थौ भिन्नौ विरुद्ध
धर्मत्वात्तमःप्रकाशवद् यदि तत्र मानतो वा विरुद्धधर्मत्वं मानतो वा नाद्यो सिद्धेरित्याह॥ नैष दोषस्तदे
ज्ञानमिथ्याधीभ्रमहेतुतः॥ संसारितात्मनः [illegible] मेव नभस्तले॥ प्रत्यगज्ञानजभ्रमादा

त्मनः संसारित्वात्कल्पितेति कथं सिद्धवदुच्यते तत्राह॥ व्यवहितविचारे सम्यग्ज्ञानाभावेनाविचारितम्॥
विचारात्पूर्वं तत्र तत्र प्रसंगादेतदुक्तमेवेति वक्तुं चकारोऽपि कारैः किंच संविद्रो भत्वा निर्विशे
षत्वमनृत्याविषयविनाशोत्पत्तिप्रसंगेन न संसारित्वस्य मिथ्यात्वं मधुब्राह्मणादेर्शितमित्याह॥ विरु
द्धागमेति विषयपूर्वकप्रसंगतः॥ एतद्विचारितमिति पूर्वेणासंबंधः कल्पान्तरमप्याहापयति॥
रज्ज्वां हि त्वयो यद्वदेकस्मिन्नपि वस्तुनि॥ स्यतस्तत्त्वतो हेतुभावेन समवसद्वाक्यानि॥ मुक्तत्वसि
तत्त्वं च परस्परविरुद्धयोः धर्मयोः समवायः स्यान्न॥ सितत्वं चेत्यस्माद्द्वितीयाद्ध्याहारः॥
मुक्तत्वबद्धयोरेकत्र वस्तुतो नावेशोऽस्ति इत्यत्र वैधर्म्यदृष्टान्तः॥ नु नीलत्वोत्पलादिवत्॥ प्राति
भासिकविरुद्धधर्मत्वहेतोः साध्याभेदः कल्प्यतो कल्पितो वा नाद्यः सिद्धसाध्यत्वात् द्वितीये रज्ज्वादा
वनेकान्तमिति मत्वा दूषयति॥ एवं विरुद्धधर्मत्वेन च दोषोऽस्ति कश्चन॥ निरुपाधिकरूपेणासंसा
रित्वं सोपाधिकरूपेण संसारित्वमित्यविरोधः॥ इदानीमुपाध्युपगमे सद्वयत्वं स्यात्स एव दोषो द
नुपाधित्वद्वय इति शंकते॥ नाम स्यादिति सद्भावो दोषश्चेदिति चोद्यते॥ इहेत्यद्वैतपक्षोक्तिः॥ तेन सद्व

यत्वं किं स्यादत आह॥ नेह नानेति वचनादेकमेवावर्ततिचोक्तितः॥ उक्तितो विरोध इति शेषः। भेदा
श्रुतिरेकैव सा तद्विकाराः॥ नारायादयो नेति दृष्टान्तान्तरस्य युक्तिबलादविद्यानामरूपरचितकार्यक
रणसंघातस्याविद्यामात्रत्वात्तस्याप्यविद्याया निरासान्नेवमिति परिहरन्ति॥ नैवं परिहृते
तस्मिन्नदृष्टान्तादियुक्तिभिः॥ परिहारमेव स्फोरयति॥ प्रशस्तानां सत्त्वविपरीतानिवेद्यते॥
कुतो विपरीतानिवोच्यते सद्वयमेव तत्त्वं किं स्यादत आह॥ यथा वस्त्वीक्ष्यमाणं तु यथा वस्त्वेव वीक्ष्यते॥
अनिर्वाच्याज्ञानविलसितनामरूपकृतसंसारोतो नाद्वैतहानिरिति भावः॥ ये तु संसारस्याविद्यत्वमम
न्यन्ते तस्याद्वयमेव तत्त्वमाहुस्तान्प्रत्युक्तं स्मारयति॥ यदत्र चोद्यवक्तव्यं तत्पुरैव॥ तत्रासंगिकत्वा
दविवक्षितमित्याशंक्याह॥ प्रसक्तेति॥ संबन्धादौ तत्र तत्रोक्तस्याल्पत्वाद्बहु[illegible]सौकर्यमात्रोक्त
मिह॥ तस्याबाधं सूचयति॥ सम्यगुक्तं नेदं रिक्तमिह स्मर्तव्यमाह तेन॥ इहेति द्वैतमसत्यत्वत्रांका
परामृश्यते किं तदुक्तं समाधानमित्याकांक्षायां संक्षिपति॥ अविचारितसंसिद्धमोहोपहतचेतसां
प्रपञ्चस्य परमार्थत्वमुक्तं चेद्वयच्च प्रत्यते मृषा॥ ननु वैयर्थ्यशंकाहेतुर्द्वैताद्यद्वयं दृष्टान्तेनान्यथायात
यथाविभुहुमाकारं तनिरोपपनुतो जनः॥ संकीर्तनमिव मात्राभिश्चित्राभिरूपलक्षयेत्॥ तथेद

नमलंब्रह्मनिर्विकारंचाविद्ययाकलुषत्वमिवापन्नंतेनेदंरूपंप्रकाशते॥ मात्राभिर्मीयमानेननील
पीतादिविषयैरितियावत्एकस्यैवब्रह्मणोनानारूपताविद्ययाप्रकाशमानत्वंदृष्टान्तो
देशाह॥ तस्यैकत्वमपिचैतन्यंबहुधाप्रविभज्यते॥ अगारकितंमुत्पातेवारियारौबिंबोदकमू
ऽगारकितमगारवदाचरितंतत्प्रतिपन्नमितियावत्॥ ब्रह्मणोविद्ययाद्वयवज्ञानेवि
तस्यात्मलब्धपदार्थविद्यायोगान्नानर्थध्वस्तिरित्याशंक्याह॥ बाध्यएवात्मसंमोहो॥ नियमे
हेतुः॥ नन्वसौबाधकोयतः॥ अविद्यायस्तमोवद्बाध्यत्वनियमेज्ञानस्यप्रकाशवद्बाधक
त्वनियमःफलत्वेनीतीत्याह॥ प्रत्यग्याथात्म्यंविज्ञानेनबाध्यंबाधकंयतः॥ यतोज्ञानेन
बाध्यंमतोबाधकमेवेतियोजनानहिस्सितिनमसिससवितानोदेतितद्वद्विद्यमानायामवि
द्यायांविद्यानानवकाशातपान्चसासोदयनातरीयकत्वेनाबोधंधुन्वतीतज्जन्मपिधुनोता
तिभावः॥ अनुभवसिद्धविद्याविद्ययोर्बाध्यबाधकभावेनवैगावद्बोधयमवतारयन्नु
पातनिकामाह॥ स्वभावान्नपहासतोसंगतिःस्यात्तत्तस्तयोः॥ ततःशाब्दानुभवपर्यन्तंज्ञाना

ज्ञानयोः स्वप्नावाप्तानपव्यहारेतासंगतिरित्येतदाचिपरेदंव समालावाके नास्तीत्याशंक्याह॥ इति चेत्तत्त्विसंधा
मसर्वयोगेश्वरेश्वरः॥ मोहापनुत्तये प्राह प्रपन्नाय किरीटिने॥ बाध्यबाधकयो रूपं नैव्येतीति प्रकाराफ्रर
पुनर्भगवानाह तदाह॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मु
नेः॥ रत्नचितुषान्निशेव ब्रह्म तस्यां तत्रविद्वान् जागर्त्ति यत्राविद्यायां सर्वाणि भूतानि जाग्रति सा ब्रह्मविदो
न भाति विद्याध्वंसादित्यर्थः ज्ञानाज्ञानयोः स्वप्नावाप्नव्यवहारेतासंबंधे फलितमाह॥ ज्ञानाज्ञाने तत्तोपेत
व्यवहारो यमात्मनि॥ शास्त्रीयो लौकिकश्चापि नो विरोधोऽत्र नन्वाकायते। तयोरूपसंबंधस्ततांशब्दार्थ
ज्ञानमपेक्ष्याहं ब्रह्मेति व्यवहार इतरस्य स्वापि ज्ञानमपेक्ष्येति भेदः तद्भ्यत्येनकेनचिदपि व्यवहारे
ण विरोधोऽस्तीत्यर्थः ज्ञानिनोपि सर्वव्यवहारदर्शनेऽहं ब्रह्मेति व्यवहारादन्यो व्यवहारः कथमज्ञानक
तः प्रतिभायते तत्राह॥ उत्पन्नात्मप्रबोधानामात्मविद्यातद्वशा॥ सम्यक् ज्ञानाग्निना नित्यं दग्धमानेप्रज्ञा
यते॥ तदीयसर्वव्यवहारस्य बाधितत्वेनानुवृत्तिरसकृदक्रेति भावः ज्ञानाज्ञानाभ्यां द्विविधं व्यवहा
रंउक्त्वा प्रकारान्तरेणमुपसंहरति॥ एकात्म्यवस्तु याथात्म्य मभिप्रेत्यात निरूप्यतः सर्वमाविद्यमत्र

द्रष्टव्यादेर्नीरोगो यावद्दृष्टिभाविनी चेत्तस्य व्याप्तिरित्यर्थः लौकिकन्यायमाह येनैव देहेनेतरा हानिस्यद्दृष्टेरित्या

शंक्यानुभवतो भेदं साधयति। निःक्रियस्य चेतनः साक्षी यस्य क्रियाश्चेतनः पराः व्याप्तस्तस्य प्रमा

प्रमात्रादेः सिद्धः साक्षी सुषुप्तिगः॥ कथं सौषुप्तसाक्षी प्रमात्रादिव्याप्तो नानुभूयते न तत्रानुभवो हेत्वभावा

दिति शंकते॥ न चेदनुभवव्याप्तिः सुषुप्तस्योपपद्यते॥ अस्ति तावदुत्थितस्य नावेदिषमिति धी

स्तापरामर्शित्वात्स्वविषयानुभवमाकांक्षत्सौषुप्तनित्यानुभवानुपगमे तदसिद्धेः प्रमात्रादिव्याव

त्तः साक्षी सौषुप्तसिद्ध इत्याह। न चेदनुभवव्याप्तिः सुषुप्तस्योपपद्यते। नावेदिषं सुषुप्ते ह

मिति धीः किंबलाद्भवेत्॥ परामर्शधीना सौषुप्तधीर्बुद्ध्यादितिबन्धनैव स्यादित्याशंक्याह। बुद्ध्या

देः प्रविलीनत्वात्। न देहद्वयकृतं सौषुप्तज्ञानमित्यत्र हेत्वन्तरमाह। देहादेश्च जडत्वतः॥ अतः सौ

षुप्तनित्यानुभवाभावे परामर्शासिद्धिरिति फलितमाह॥ नैवस्यान्नीनामासिद्धमितीदृशाम्॥ नित्यानुभ

वादृते परामर्शो न्यायोगो नित्यः सुषुप्ताख्याज्ञानस्य मेयत्वमप्युपास्तमित्याह। चिदाभासैकमात्रेणास

मः सिद्धिर्न मात्रतः॥ चैतन्यतदाभासाहीने दापरोक्ष्यं मातुरित्यर्थः कौ सोमाता तत्राह। भ्यामज्ञानसि

तस्तया व्याप्तेव लौकिकी दृष्टिर्भवन्ती तस्याभन्तानवतीतिन दैतापत्तिरित्यर्थः एकत्र व्याप्यव्यापक
त्वायोगाद्भूमाग्न्योरिव दृष्ट्योर्भेदस्स्यादित्याशंक्याह। कार्य्यात्मनय त्रदूप्तिः स्या द्याप्यव्यापकव
नो नोः। व्याप्तिस्तत्रैवमुख्यास्याद्रज्जुसर्पादिवस्तुवत्॥ द्विविधा व्याप्तिर्मुख्याऽमुख्या चाद्या रज्जुसर्पयो
रिव व्याप्यव्यापकयोस्तादात्म्यरूपा साद्दृष्ट्योरेवेति नाद्दृतहानिरित्यर्थः। अमुख्यव्याप्तिस्थलमाह॥
देशकालादिभिर्भेदाद्दसाधारणतत्वयोः॥ व्याप्तिर्नघटते साक्षात्तर्हि भवति ऽन्ययोस्स्व॥ भिन्नयोर्दे
शादिभेदाद्याव्याप्तिस्सानमुख्या त्यन्तभिन्नयोस्तद्दृष्टेरतो धूमादौ व्याप्तिर्नमुख्येत्यर्थः ननुत
योरिव दृष्ट्योरपिवास्तवो भेदो न रज्जुसर्पवत्कल्पितस्तत्कथममुख्याव्याप्तिस्तत्राह॥ प्रमाश्रादिष्वपेक्षो व्या
पत्लौकिकी दृष्टिरात्मनः॥ अत्रात्मनो लौकिकी दृष्टिस्स्यापेक्षत्वात्सर्पादेरिव त्कल्पितेऽपतिनवास्त
स्तत्र भेदोऽस्तीत्यर्थः॥ तर्हि दृष्टित्वादितराऽपि कल्प्यतेतिभ्रम्यतेऽयत आह॥ तत्रत्वगात्मदृष्टिस्तु वि
ज्ञेया पारमार्थिकी॥ कल्पितत्वे नात्मत्वे प्रयोजकमिति भावः दृष्ट्योरुक्तविभागे रज्जुसर्पवन्मु
ख्याव्याप्तिर्द्वयोर्व्याप्ति स्त्रास्तितत्राद्यास्वाभाविकी द्वितीयाधर्मादिकृता तदाद्यामादर्शयति त्वा
मत्र पूर्वोक्तं निष्फलितमाह॥ परमार्थात्मदृष्ट्यं लौकिकी दृष्टिरात्मनः॥ घटावधिक्रियाभेद व्याप्तेवीकश्चाकम्नवत्॥ अन्ये तेऽपयधारा
मयक्रे लौकिकदृष्टेरस्यां व्याप्तिर्द्वाऽस्तितत्राद्यास्वाभाविकी द्वितीयाधर्मादिकृता व्याप्तिवदात्मव्याप्तेरपिनश्वरादित्याशंक्याह
धर्म्माधर्मानपेक्षत्वाद्वेतव्याभासतां प्रतिपदाद्याभासवत्तस्मान्त्राभासोऽपि नश्वरः लौकिकाद्दृष्टेरात्मव्याप्ति+२

त्ति किंचिन्नेति श्रुत्या निषेधात् स्पर्धः सदसद्रूपत्वं तु विरुद्धत्वादयुक्तमिति श्रुत्योपपादितं एवं युक्तिदृष्ट्यानिर्वच
नीयत्वं प्रदर्श्य तुच्छमिदं रूपमस्येति श्रुतिर्विद्वदनुभवेन तस्यास्तुच्छत्वं दर्शयतीत्याह विद्यादृष्ट्येति
तुच्छत्वे हेतुमाह ॥ तस्या इति ॥ १२९ ॥ उपपादितमर्थमुपसंहरति ॥ तुच्छानिर्वचनीया च २ वास्तवी चेत्य
सौ त्रिधा ॥ ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैरिति ॥ श्रौतबोधेन तुच्छा कालत्रयेऽप्यसत्त्वाद्यौक्ति
कबोधेनानिर्वचनीया लौकिकबोधेन वास्तवी चेत्येवं त्रिधा मायाज्ञेयेत्यर्थः ॥ १३० ॥ अस्य सत्त्वम
सत्त्वं च दर्शयतीति श्रुत्युक्तार्थमस्याः स्वरूपमाह ॥ अस्य सत्त्वमसत्त्वं च जगतो दर्शयत्यसौ इति ॥ एकस्या
मेव मायायाः जगत्सत्त्वासत्त्वद्वयीप्रदर्शकत्वे दृष्टान्तमाह ॥ प्रसारणाच्च संकोचाद्यथा चित्रपटस्त
थेति ॥ १३१ ॥ स्वतंत्रास्वतंत्रत्वे नेति श्रुत्या मायायाः स्वातंत्र्यास्वातंत्र्ये दर्शिते तत्रोभयत्रोपपत्तिमाह ॥ अस्वतंत्रा हि मा
या स्यादप्रतीतेर्विना चितिम् ॥ स्वतंत्रापि तथैव स्यादसंगस्यान्यथाकृतेरिति ॥ स्वचमत्कं चैतन्यं विहाय न प्रकाशा
त इत्यस्वतंत्रा असंगस्यात्मनोऽन्यथाकरणात्स्वतंत्रापीत्यर्थः ॥ १३२ ॥ अन्यथाकरणमेव स्पष्टयति ॥ कूटस्थासं
गमात्मानं जगत्त्वेन करोति सेति ॥ ३३ ॥ नन्वात्मनोऽन्यथाकरणे कूटस्थत्वहानिः स्यादित्याशंक्याह ॥ कूटस्थमनपा
जीवेशावाभासेन करोतीति श्रुत्युक्तं जीवेश्वरविभागं च करोतीत्याह ॥ चिदाभा
सस्वरूपेण जीवेशावपि निर्ममे इति ॥ ३३ ॥ २

कृत्यं करोति जगदादिकमिति॥ ननु कूटस्थत्वाविद्यानेन जगदादिरूपत्वापादनं दुर्घटमित्याशंक्य॥ माया
यादुर्घटैकविधायित्वान्नेदमाश्चर्यकारणमित्याह॥ दुर्घटैकविधायिन्यां मायायां का चमत्कृतिरिति॥
अन्यथा मायात्वमेव भज्येतेति भावः॥१३४॥ मायाया दुर्घटकारित्वस्वभावत्वे दृष्टान्तमाह॥
द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि॥ मायाया दुर्घटत्वं च स्वतः सिध्यति नान्यतः इति॥ उद
कादीनां द्रवत्वादि यथा स्वाभाविकं तद्वत्॥ मायाया दुर्घटकारित्वमित्यर्थः॥१३५॥ ननु मायाया दुर्घटकारित्वमाश्च
र्यकारणं न भवतीत्युक्तमनुपपन्नं लोके यायाश्चमत्कारहेतुत्वदर्शनादित्याशंक्य मायायां यो तु साक्षात्कारपर्यन्त
मेतस्याश्चर्यकारणत्वं नोपरिष्टादित्याह॥ न वेत्ति लोको यावत्तां साक्षात्तावच्चमत्कृतिम्॥ धत्ते मनसि पश्चात्तु माये
षेत्युपशाम्यतीति॥१३६॥ किं च जगत्सत्यत्ववादिनो नैयायिकादीन्प्रत्येवंविधानि चोद्यानि कर्तव्यानि न मायावा
दिनं प्रतीत्याह॥ प्रसरन्ति हि चोद्यानि जगद्वस्तुत्ववादिषु न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः इति॥१३७॥
मायावादिनं प्रति चोद्यकरणे इति प्रसंगमाह॥ चोद्येऽपि यदि चोद्यं स्यात्त्वच्चोद्ये चोद्यते मयेति॥ तर्हि किं कर्त
व्यमित्यत आह॥ परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यतामिति॥१३८॥ ऽत्र क्रमेवार्थं प्रपंचयति

विस्मयैकशरीराया मायायाश्चोद्यरूपतः॥ अन्वेष्यः परीहारो बुद्धिमद्भिः प्रयत्नत इति। मायात्वनिश्चयेन तत्परिहारा
न्वेषणमनुचितं सत्त्वेनेदानीं सिद्ध इति शंकते। मायात्वमेव निश्चेयमिति चेत्तर्हि निश्चिनु॥ लोकप्रसिद्धमायाया लक्ष
णाद्यन्तदीक्ष्यतामिति॥ मायाया लक्षणासद्भावान्मायात्वनिश्चीयतामित्यान्नप्रायेणाह॥ तर्हि किं लक्षणमित्यत आह लोक
प्रसिद्धेति॥१४०॥ तस्यापि किं लक्षणमित्यत आह॥ न निरूपयितुं शक्या विस्पष्टं भासते च या॥ सा मायेतीन्द्रजालादौ लोकाः
संप्रतिपेदिरे इति॥१४२॥ जगतोऽशक्यनिरूपणत्वं कथमित्याशंक्य तद्दर्शयति॥ देहेन्द्रियादयो भावा वीर्येणोत्पादिताः कथं
कथं वा तत्र चैतन्यमित्युक्ते ते किमुत्तरमिति॥१४५॥ स्वभाववादी शंकते॥ वीर्यस्यैष स्वभावश्चेत्कथं तद्विदितं त्व
या॥ अन्वयव्यतिरेकौ यौ भग्नौ तौ वन्ध्यवीर्यत इति॥ सिद्धान्ती पृच्छति कथं तद्विदितमिति॥ अन्वयव्यतिरेकाभ्यां जाना
मीत्याशंक्य व्याप्त्यभावान्नैवमित्याह॥ अन्वयेति॥१४६॥ एवं पुनः पुनः पृष्टे सति किमपि न जानामीत्येवोत्तरं देयमिति
फलितमाह॥ न जानामि किमप्येतदित्यन्ते शरणं तव॥ अत एव महान्तोऽस्य प्रवदन्तीन्द्रजालतामिति॥१४७॥ उक्तानिर्वचनीय
त्वे वृद्धसंमतं दर्शयति॥ एतस्मात्किमिवेन्द्रजालमपरं यद्गर्भवासस्थितं रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानांकुरं पर्यायेण
शिशुत्वयौवनजरावेषैरनेकैर्वृतं पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यथागच्छतीति॥१४८॥ न केवलं देहस्यैकस्यैव दुर्निरूपत्वं किं
तु वटादेरपीत्याह॥ देहवद्वटधानादौ सुविचार्य विलोक्यताम्॥ क्व धाना कुत्र वा वृक्षस्तस्मान्मायेति निश्चिनु इति॥१४९॥ न च
स्यानिर्वक्तुमशक्यत्वेऽप्युदयनादिराचार्यैर्निरूपितं इत्याशंक्याह॥ निरुक्तावभिमानं ये दधते तार्किकादयः। हर्षमिश्रादिभिस्ते तु खं

उन्मादो सुप्तिश्चेति तादृशत्तौ ॥ ४५ ॥ उक्तोर्थो सांप्रदायिकानां वाक्यं संपादयति ॥ अचिंत्याः खलु ये भावा न तांस्तर्केषु योजयेत् ॥ अचिंत्यरचनार
रूपं मनसापि जगत्खल्विति ॥ भवत्वेवं जगतोऽचिंत्यरचनात्वं मायायाः किमायातमित्यत आह ॥ अचिंत्यरचनाशक्तिबीजं मायेति निश्च
चिनोति ॥ अचिंत्यरचनाशक्तिमद्यद्बीजकारणं सैव मायेत्यर्थः ॥ नन्वेवंविधकारणसद्भावे प्रमित्यत आह ॥ मायाबीजं तदेवैकं सुषुप्ता
वनुभूयत इति ॥ ४७ ॥ कथं तस्या जगद्बीजत्वमित्यत आह ॥ जाग्रत्स्वप्नजगत्तत्र लीनं बीजे इव द्रुम इति ॥ ततः किमित्यत आह
मायाबीजं तदेवैकं सुषुप्तावनुभूयत इति ॥ ४७ ॥ कथं तस्या जगद्बीजत्वमित्यत आह ॥ तस्मादशेषजगतो वासनास्तत्र कल्पि
ता इति ॥ ४७ ॥ यतो जगत्कारणं माया ततोऽशेषजगद्वासनास्तत्र मायायामतिष्ठन्नित्यर्थः ॥ ततो लिंगं किं तत्राह ॥ या बुद्धिवासना
स्तासु चैतन्यं प्रतिबिंबितमिति ॥ ननु तासु प्रतिबिंबोऽस्ति चेत्कुतो नानुभूयत इत्यत्राह ॥ अस्पष्टत्वादित्याह ॥ मेघाकाशवदस्पष्ट
चिदाभासोऽनुमीयतामिति ॥ तर्हि कुतस्तत्संसिद्धिरित्यत आह ॥ अनुमीयतामिति ॥ ५० ॥ ननु मेघांशोदकस्याप्यस्पष्टाकाश
प्रतिबिंबवत्त्वेऽपि तज्जातीयस्य घटोदकस्य स्पष्टाकाशप्रतिबिंबवत्तः सद्भावान्मेघाकाशानुमाने घटकृते इह तथाविधदृष्टा
न्ताभावात्कथमनुमानोदय इत्याशंक्याऽत्रापि तथाविधदृष्टांतं संपादयन्नाह ॥ साभासमेव तद्बीजं धीरूपेण प्ररोहति अतो बुद्धौ
चिदाभासोऽपि विस्पष्टं प्रतिभासते इति ॥ चिदाभासविशिष्टं तदेवाज्ञानं बुद्धिरूपेण परिणममानं विस्पष्टचिदाभासवद्वर्तते
इति भावः ॥ एवं चेदमनुमानमत्र सूचितं भवति ॥ विमता बुद्धिवासनाश्च प्रतिबिंबवती भवितुमर्हति ॥ बुद्ध्यवस्थाविशेषत
त्वात् बुद्धिवृत्तिवदिति ॥ एवं जीवेश्वरयोर्मायिकत्वं प्रस्तुतं तदुपपादितमुपसंहरति ॥ मायाभासेन जीवेशौ करोतीति श्रुतौ
श्रुतमिति ॥ ननु जीवेशयोर्मायिकत्वे समाने कथमवान्तरभेदसिद्धिरित्याह ॥ मेघाकाशजलाकाशाविव तौ सुव्यवस्थिताविति
ईशस्य मेघाकाशसाम्यं स्पष्टीकरोति ॥ मेघवद्वर्तते माया मेघस्थिततुषारवत् ॥ धीवासनाश्चिदाभासास्तुषाराकाशवत् २४

ति

स्थिताइति॥ मायाप्रतिबिंबस्येश्वरत्वे किं प्रमाणमित्याशंक्य श्रुतिरेवेत्याह॥ मायाधीनश्चिदाभासः श्रुतो मायी महेश्वरः॥ न केवल
मीश्वरत्वमस्य श्रुतं॥ अपि त्वंतर्यामित्वादिकमपि धर्मजातं श्रुतमस्तीत्याह॥ अंतर्यामीति॥ अंतर्यामी च सर्वज्ञो जगद्योनिः स
एव हीति॥ ननु धीवासनाप्रतिबिंबितस्येश्वरत्वादिकं कथं श्रुतिसिद्धमित्याशंक्य तदुपपादिकां श्रुतिं दर्शयति॥ सोऽयं सुप्तमानंदमयं
प्रक्रम्यैव श्रुतिर्जगौ॥ एष सर्वेश्वर इति सोऽयं वेदोक्त ईश्वर इति॥ यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति त
त्सुषुप्तं सुषुप्तस्थान एकीभूतः प्रज्ञानघनतामित्यादिकाश्रुति एवानंदमयो ह्यानंदभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः एष सर्वे
श्वर एष सर्वज्ञ एषोंतर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां वासनाप्रतिबिंबरूपस्यानंदमयस्येश्वरत्वादिकं प्र
तिपादयतीत्यर्थः॥ नन्वानंदमयस्य सर्वज्ञत्वादिकमनुभवविरुद्धमित्याशंक्याह॥ सर्वज्ञत्वादिकं तस्य नैव विप्रतिप
द्यतां॥ श्रौतार्थस्याचिंतर्कित्वान्मायायां सर्वसंभवादिति॥ कुत इत्यत आह॥ श्रौत इति इतोऽपि न विप्रतिपत्तिः कार्येत्याह माया
यामित्याह॥ नन्वनुकूलयुक्त्यभावे श्रुतिरपि ग्लावप्लववाक्यवदर्थवादः स्यादित्याशंक्याह॥ श्रुतिप्रामाण्यसिद्धस्य सर्वेश्वरत्वा
दिकमुपपादयति॥ अयं यतः सृज्यते विश्वमस्यैवाप्यर्पितं पुमान्॥ न कोऽपि शक्रेस्ते नायं सर्वेश्वर इति श्रुत इति॥ ५ अयमानन्दम
यो यन्नामरूपादि विसृजति॥ तत्र केनाप्यन्यथा कर्तुं न शक्यते ततोऽयं सर्वेश्वर इत्यर्थः इदानीं सर्वज्ञत्वमुपपादयति॥
अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः॥ ताभिः क्रोडीकृतं सर्वं तेन सर्वज्ञ ईरित इति॥ तत्र सोऽपि सुप्ते ज्ञाने कारणभूते का
र्यभूतानां सर्वप्राणिबुद्धीनां वासनानि वसन्ति ताभिर्वासनाभिः सर्वं जगत्क्रोडीकृतं विषयीभूतं तेन सर्वबुद्धिवासनाव

यैद ज्ञानो पधिकात्मनः सर्वज्ञत्वमुच्यत इत्यर्थः। ननु यदि सर्वज्ञत्वमस्ति तर्हि तत् कुतो नानुभूयत इत्याशंक्य तदुपाधीनां वासनानां परोक्षत्वात्त्रा
नुभवे इत्याह॥ वासनानां परोक्षत्वात्सर्वज्ञत्वं न हीयत इति। कथं तर्हि तदवगम इत्याशंक्याह॥ सर्वबुद्धिषु तद्दृष्ट्वा वासनास्वनुमीय
मानमिति॥ सर्वबुद्धिनिष्ठं सर्वज्ञत्वं स्वकारणाकाभूतवासनागतसर्वज्ञत्वपुरस्सरं भवितुमर्हति कार्यनिष्ठधर्मविशेषत्वात्पटगतरू
पादिवदित्यर्थः॥ सर्वज्ञत्वमुपपाद्येशोन्तर्यामीति श्रुत्युक्तमन्तर्यामित्वमुपपादयति॥ विज्ञानमयमुख्येषु कोशेष्वप्यत्र चैवमाह॥ अन्त
स्तिष्ठन्यमयति तेनान्तर्यामिता भजेदिति॥ अन्यत्र पृथिव्यादौ तिष्ठन्यमतीयतस्तेनेत्यन्वयः। अस्मिन्नर्थेन्तर्यामिब्राह्मणं
प्रमाणमिति दर्शयतु तदेकदेशभूतं विज्ञानेति ष्ठन्नित्यादिवाक्यमर्थतोनुक्रामति॥ बुद्धौ तिष्ठन्नन्तरस्यां धियां तीन्द्यबुधी
वपुः॥ धियमन्तर्यमतीत्येवं वेदेन घोषितमिति॥ इदानीमन्तर्यामिब्राह्मणस्य प्रतिपर्यायमारव्याने ग्रन्थबाहुल्यमयाद्व्याख्यानस्य
सर्वपर्यायसंचारित्वसिद्धये यः सर्वेषु भूतेष्विति पर्यायं व्याचष्टे यो यः सर्वेषु तिष्ठन्नित्यस्यार्थः संदृश्यते माह॥ ननु पटस्थि
तो यद्वदुपादानतया तथा॥ सर्वोपादानरूपत्वात्सर्वत्रायमवस्थित इति॥ ननूपादानतया सर्वे सर्वत्रायमवस्थित अक्तिमि
ति सर्वत्रेनोपलभ्यत इत्याशंक्य सर्वान्तत्वादित्याह॥ पटो दव्यान्तरस्तन्तुस्तेतोरप्यंशान्तरः। आन्तरत्वस्य विश्रान्तिर्यत्राभावनुमीय
तामिति॥ अत्रेदमनुमानं मान्तरत्वतारतम्यं क्वचिद्विश्रान्तं तारतम्यत्वात् अणुत्वतारतम्यवदिति॥ तत्त्वान्तरत्वे परिच्छन्नत्वे वा
वादिवद्वेदं तर्यामिता दर्शनं किं न स्यादित्याशंक्य॥ तेषामिव व्यासस्याव्यास्त्वाभावान्न दर्शनं इत्यभिप्रायेणाह॥ द्वित्त्वान्तरत्वं क
दाणां दर्शनेप्यय मान्तरः न वीक्ष्यते ततो युक्तिश्रुतिभ्यामेव विनिर्णेय इति॥ कुतस्तर्हि तन्निर्णय इत्यत आह॥ आनन्तोयुक्ती
ति अचेतनस्य स्वेतनाधिष्ठानं अन्तरेण प्रवृत्तिरनुपपत्तिर्युक्तिः श्रुतिस्तूदाहृतैव॥ यस्य सर्वाणि भूतानि शरीराणीत्यस्यार्थः

माह॥ पटरूपेतासंस्थानात्पटस्तंतोर्वपुर्यथा॥ सर्वरूपेणसंस्थासर्वमस्यवपुस्तथेति॥ पटरूपेणावस्थितस्य एवमीशोऽः शा
रीरं यथा एवं सर्वरूपेणावस्थितस्य हृदं शरीरमित्यर्थः॥ यः सर्वाणि भूतान्यन्तरो यमयतीति वाक्यस्तार्थस पटः सदाह
ज्ञाकटूयेनतंतोसंकोचविस्तारेचलनादौपटो यथा॥ अत एवमेवन्तर्वर्तिनस्वातंत्र्यपटे मत्वाकु॥ तथान्तरे यांमयन्निमायथाव
सेन यथा यथा॥ विक्रियते तथावश्यं भवत्येवं नसंशयइति॥ ननु संकोचमानादिना पटसंकोचादि यथा भवति॥ एवं हि यथादि
भूपादानत्वेनावस्थितेनान्तर्यामी यथाययावसनया यथाघटादिकार्यरूपेणविक्रियते॥ तत्कार्यं जातं तथावश्यं भवती
तिभावः॥ एवमन्तर्यामिप्रतिपादिकां श्रुतिमुपन्यस्य स्मृतिमप्युपन्यस्यति॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति॥ भ्रामयन्स
सर्वभूतानि यन्त्रारूढानि माययेति॥ सर्वभूतानि पदस्यार्थमाह॥ सर्वभूतानि विज्ञानमयास्ते हृदि संस्थिताः तदुपादानभूतेषु
तत्र विक्रियते स्वत्विति॥ ते च हृदयपुंडरीके स्थिताः ननु तेषां कुतो हृद्यवस्थानमित्याशंक्य हृद्यन्तर्यामिलोविज्ञान
मयाकाशेतापरिणामादित्याह॥ तदुपादानेति यंत्रारूढानीत्यत्र यंत्रारूढत्वस्यार्थमाह॥ देहादिपञ्जरं यंत्रं तदारोहोऽभिमा
नितेति॥ भ्रामयन्निति पदे प्रकृत्यर्थमाह॥ विहितप्रतिषिद्धेषु प्रवृत्तिनिवृत्तिमन्तो भवेदिति॥ इदानीमेव च प्रत्ययमायायापदयोरर्थमा
ह॥ विज्ञानमयरूपेणान्तस्थप्रवृत्तिस्वरूपतः स्वतन्त्रोऽपि विक्रियते माययान्त्र मन्तर्हितत्वादिति॥ भ्रोतस्य यमयतीति पदस्यापि
यमेवार्थ इत्याह॥ अन्तर्यमयतीत्युक्त्वा यमेवार्थः श्रुतो स्मृत इति॥ उक्तव्याख्यानपर्यायान्तरेष्वतिदिशति प्रत्यगादिषु सर्व
त्रन्यायोऽयं योज्यसाध्ययेति॥ प्रवृत्तिर्जातस्य सर्वस्येश्वराधीनत्वे च वचनान्तरमुदाहरति॥ जानामि धर्मं न च मे प्रवृत्तिर्जा
नाम्यधर्मं न च मे निवृत्तिः॥ केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमीति॥ ननु प्रवृत्तेरीश्वराधीनत्वे पुरुषस्य

प्रयत्नो ऽवश्यं स्यादित्याशंकापुरुषप्रयत्नस्यापीश्वररूपत्वाच्चैवमिति परिहरति नार्थः पुरुषकारेणेत्येवमादिनाऽका
लापेतेः ईश्वरापुरुषकारस्य रूपेणापि प्रवर्त्ततइति॥ अर्थः प्रयोजनं पुरुषकारेण पुरुषप्रयत्नेन। ननु पुरुषप्र
यत्नस्यापीश्वरस्वरूपत्वे यमयति न्यायमयतीति प्रतिपादितमतद्योगिभिरीश्वरं लब्ध्या स्यादित्याशंक्यात्तद्बोधेन
स्वात्मसंगत्वज्ञानं लब्धेन फलस्य सत्वान्नैवमिति परिहरति॥ ईदृग्बोधेनेश्वरस्य प्रवृत्तिर्नैव जीतात्तथाप
ह्यस्य बोधेन स्वात्मसंगत्वधीर्जायत इति॥ ईदृग्बोधेनेश्वरस्य पुरुषकारादिरूपेण प्रवृत्तस्यानन्तानेन प्रवर्त्तितरं तथा
पि रूपेण प्रेरणा॥ आत्मनोऽसंगत्वज्ञाने नापि किं प्रयोजनमित्यत आह॥ तावता मुक्तिरित्याहुः श्रुतयः स्मृतय
श्चैव॥ श्रुतिस्मृत्युदितत्वस्यानतिलंघनीयत्वे स्म तद्दर्शयति श्रुतिस्मृतीममैवाज्ञे स्यपीश्वरस्याविततमिति
श्रुत्यापीश्वरस्याज्ञापि तिहेतुत्वमित्याह॥ आज्ञया प्रीतिहेतुत्वं भीषास्मादिति हि श्रुतम्॥ ईश्वरस्य प्रीतिहेतुत्वे कमर्थमनु
लेभ इत्याशंक्य सर्वेश्वरस्यान्तर्यामित्वतः पार्थिवां सिद्धये इति मत्वाह॥ सर्वेश्वरत्वमेतस्मादन्तर्यामित्वतः श्व
कीति॥ बहिरन्तश्चेश्वरः एवं नियामकः इत्यत्र श्रुतिद्वयमाह॥ एतस्याक्षरस्य प्रशासने [illegible] इति श्रुतिः॥ अतः प्रशस्य
ग्रास्तायत्त नमः इति च श्रुतिरिष्टा॥ क्रमशः प्राप्तस्य योनिरित्यस्यार्थमाह॥ जगद्योनिः सर्वदेषु प्रभवाप्ययः [illegible] त्वतः
आविर्भावतिरोभावावुत्पत्तिप्रलयौ मतौ॥ विवृत्तिप्रभवाप्यययोरुत्पत्तिप्रलयौ तत्कृतत्वाज्जगद्योनित्वं ततो पु [illegible]
त्तिप्रलयत्राद्ययोर्विवक्षातमर्थमाह॥ आविर्भावेति॥ उत्पत्तिप्रलययोर्या विर्भावतिरोभावौ मतौ ययो रमित्यस्या [illegible]
वं कारित्वसदृष्टान्तमुपपादयति॥ आविर्भावयति स्वस्मिंश्च लीनं सकलं जगत्॥ प्राणिकर्मः

कद्वन्मुसार्यं इत्त इति॥ यथा संकुचितश्चित्रपटः स्वस्यप्रसारतो स्वनिष्ठानि चित्राणि आविर्भावयति॥ एवमीशोपि स्वयं
तस्यैव प्रलयकाले तान्यदर्शयति॥ पुनस्तिरोभावयति स्वात्मन्येवाखिलं जगत॥ प्राणिकर्मनयवज्ञात्मकोचितयदा यपश्यति॥ सचपटः संकुचि
तश्चित्राणि यथा तिरोभावयति तद्वदित्यर्थः॥ आविर्भावतिरोभावयोर्दृष्टान्तान्तराणि दर्शयति॥ रात्रिघटस्य सुप्तिबोधानुभोनिर्निमीलि
ते तूष्णीभावमनोराज्येद्रव्यस्फुलिंगयादिमाविति॥ घस्रो हः॥ नन्वीश्वरस्य जगद्योनित्वं किमारंभत्वेन परिणामित्वेन वा नाद्य॥ अ
द्वितीयस्यारंभकत्वायोगाद्द्वितीय निरवयस्य परिणामासंभवादित्याशंक्य विवर्तवादाश्रयणान्नाद्यदोषद्वयमिति परिहरति॥ आ
विर्भावतिरोभावशक्तिमत्तेन हेतुना॥ आरंभपरिणामादिचोद्यानां नात्र संभव इति॥ नन्वेक एवेश्वरः कथं चेतनाचेतनजगदुपादा
नं भविष्यतीत्याशंक्य स्वप्राधान्येनोपाधिप्राधान्येन च चेतनाचेतनोपादानं भविष्यतीत्याह॥ अचेतनानां हेतुः स्यात् जाड्यांशेन ईश्वर
स्य प्राणः॥ चिदाभासांशतस्तेषां जीवानां कारणं भवेदिति॥ ननु मायाविन ईश्वरस्य जगत्कारणत्वं तत्त्वप्रतिपादने अनुपपन्नं सुरेश्व
राचार्यैः परमात्मन एव तदंशधानादित्यांकते॥ तमः प्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनां॥ परः कारणतामेति भावनाज्ञान
कर्मभिः॥ इति वार्तिके कारणजडचेतनहेतुतापरमात्मन एवोक्ता नेश्वरस्य न वेदिति॥ तमःप्रधानस्तमोगुणप्रधान मा
याधिकः क्षेत्राणां शरीरादीनां भावनाज्ञानकर्मभिः भावनासंस्कारज्ञानदेवताध्यानादि कर्मपुण्यापुण्यलक्षणं तैर्निमित्त
भूतैरित्यर्थः तेषां पर्यविरवर्तसदार्थप्यधिष्ठानारोपयोरन्योन्याध्यासस्याविवक्षितत्वान्नैवमिति परिहरति॥ अन्योन्या
ध्यासमत्रापि जीवकूटस्थयोरिव॥ ईश्वरब्रह्मणोः सिद्धं वस्तुवात्त्वपूते सुरेश्वर इति॥ ननु सुरेश्वराचार्यैरीश्वरब्रह्मणोरन्यो
न्याध्यासः सिद्धवत्कृत्य व्यवहृयत इति कुतोवगम्यत इत्याशंक्य स्पष्टं परमात्मनोचनवन्नादिति दर्शयति तु स्मृतिमर्यतः पर्गतः॥

सत्यं ज्ञानमनंतं यद्ब्रह्म तस्मात्समुत्थिताः॥ खं वाय्वग्निजलोर्व्योषध्यन्नदेहा इति श्रुतिः॥ न च त्वेषा श्रुतिरित्यनया कथमन्योन्याध्या
सो वेगतिरित्यत आह॥ आपाततो मतौ हृष्टिस्तत्र ब्रह्मणो भाति हेतुता॥ हेतोः प्रशस्त्यतात तस्मादन्योन्याध्यास इष्यत इति॥ तत्र त
स्यां श्रुतौ सत्यादिलक्षणस्य निर्गुणस्य ब्रह्मणो जगत्कारणत्वे॥ जगत्कारणस्य मायाधीनत्वाच्चिदाभासस्य च सत्यत्वमापाततः प्रतीयमान
मन्योन्याध्यासमंतरेणानुपपन्नमिति भावः एवमन्योन्याध्याससिद्धमीश्वरब्रह्मणोरेकत्वं पूर्वोदाहृतघटितपटदृष्टान्तस्मरणेन
द्रढयति॥ अन्योन्याध्यासरूपोसावन्नलिप्तः पटो यथा॥ घट्टितेनैकतामेति तद्वद्भ्रांत्यैकतां गतः॥ भ्रांत्यैकत्वापत्तौ दृष्टान्तमभि
धायापातदर्शिनां मेदाप्रतीतौ पूर्वोक्तमेव दृष्टान्तांतरं दर्शयति॥ मेघाकाशमहाकाशौ विविच्येते न पामरैः॥ तद्वद्ब्रह्मेशयोरैक्यं
पश्यंत्यापातदर्शिन इति॥ ऐक्यं पश्यन्तीत्येतदभित्यर्थः। कुतस्तर्हि भ्रान्तेत्रायो भेदावगतिरित्यत आह॥ उपक्रमादिभिर्लिंगैस्तात्पर्यस्य
विचारणात्॥ असंगं ब्रह्म मायावी सृजत्येष महेश्वर इति॥ उपक्रमोपसंहारावभ्यासोपूर्वता फलं। अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्ण
येति॥ उक्तैः षड्विधैर्लिंगैः श्रुतितात्पर्यावधारणे सति ब्रह्मासंगं मायावी सृजत्येव जगदेतत् इति बोधः क्रमात्तावुपक्रमोपसंहारैकरूप्यं प्रदर्श
नोक्तौ ब्रह्मणोऽसंगत्वं स्पष्टयति॥ सत्यज्ञानमनंतं चेत्युपक्रम्योपसंहृतं॥ यतो वाचो निवर्तन्ते इत्यसंगत्वनिर्णय इति॥ अतो ब्रह्मसं
गत्वनिर्णयमवतीति विशेषः॥ मायाविन ईश्वरस्य सृष्टृत्वप्रतिपादिकां श्रुतिमर्थतो दर्शयति॥ मायी सृजति विश्वं तन्निरुद्धस्तत्र मा
यया॥ अन्य इत्यपरा ब्रूते श्रुतिस्तेनेश्वरः सृजेदिति॥ अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्ध इति श्रुति
रीश्वरस्य सृष्टृत्वं प्रतिपादयति॥ तस्माज्जगदुत्पत्तिप्रकारमाह॥ आनन्दमय ईश्वरोऽयं बहुस्यामित्यवेक्षत॥ हिरण्यगर्भरूपोऽभूत्सु
प्तिः स्वप्नो यथा भवेदिति॥ ईक्षितृत्वाच्च हिरण्यगर्भरूपोऽभूदित्यन्वयः तत्र दृष्टान्तमाह॥ सुप्तिरिति तस्माद्वा एतस्मादात्मन आका

२)

२२

त्रासं भूतइत्यादौ क्रमेण सृष्टिप्रवत्सादिदं सर्वमसृजतेति युगपद्भुवनाद्यकस्योपादेयत्वे वक्तव्ये अहे यत्तु इत्यादौ क्रमेण सृष्टिप्रवणादि
दं सर्वमसृजतेति युगपदित्यादौ श्रायां श्रुतिषु तेषु पेतत्वादुभयं व्याहरमित्याह॥ क्रमेण युगपद्वा सृष्टिर्यथाश्रुति॥ द्विविधश्रुतिस
द्भावाद्दृष्टिसृष्टिस्वप्नदर्शनादिति॥ एषा जगतः सृष्टिर्द्विविधश्रुतिसद्भावात्क्रमेण युगपद्वा यथाश्रुतिज्ञेयेति योजना तत्रोपपत्तिर्द्वि
विधस्वप्नदर्शनात् इति लोके प्रसिद्धे क्रमस्य वा क्रमयुक्तस्य वा स्वप्नपदार्थजातस्य दर्शनादिति भावः॥ हिरण्यगर्भस्य स्वरूपं नि
रूपयति॥ सूत्रात्मा सूक्ष्मदेहाख्यः सर्वजीवघनात्मकः॥ सर्वाहंमानधारित्वात्क्रियाज्ञानादिशक्तिमानिति॥ सूत्रात्मापदे
सूत्रमिव जगत्स्वनुस्यूतत्वात् आत्मा स्वरूपं यस्य सः सूक्ष्मदेहाख्यः सूक्ष्मदेह इत्याख्या यस्य स तथाविधः॥ सर्वजीवघनात्मकः सर्वेषां
लिंगशरीरोपाधिकानां घनात्मकः समष्टिस्वरूपः तत्र हेतुः सर्वाहंमानधारित्वादिति॥ सर्वेषु व्यष्टिलिंगशरीरेषु अहमभिमान
वत्त्वादिति भावः॥ इच्छाज्ञानक्रियाशक्तिमत्त्वं हिरण्यगर्भो वस्यायां जगत्प्रतीतौ दृष्टान्तमाह॥ प्रत्यूषे वा प्रदोषे वा गते मेदे तमस्य
ये लोको भाति यथा तद्वदस्पष्टं जगदीक्षत इति॥ प्रत्यूषः उषाकालः एवं लोकप्रसिद्धदृष्टान्तमभिधाय॥ यथा धौत इति पू
र्वोक्तश्लोकाभिहितं लांछितपटदृष्टान्तयति॥ सर्वतो लांछितो मस्या यथा स्यात् घट्टितः पटः॥ सूक्ष्माकारैस्तथेशस्य वपुः
सर्वत्र लांछितमिति॥ यथा घट्टितः पटो मषीप्रयोगेणाकारविशेषैर्लांछितो भवति तथा मायिन ईश्वरस्य वपुरपंचीकृ
तभूतकार्ये लिंगशरीरे लांछितमित्यर्थः॥ बुद्ध्यारोहाय वैराजवत् दृष्टान्तान्तरमाह॥ सस्यं वाङ्कुरजातं वा सर्वतोंकुरितं य
था॥ कोमलं तद्वद्वेदे वैषपेत्रात्मा जगदंकुरयति॥ एवं सूत्रात्मस्वरूपविषदीकरणं तस्मै वावस्याभेदं पंचीकृतभूतकार्योपा

पश्चिके विराजं दृष्टान्तत्वेन विशदयति ॥ आतपातलोको वा पटो वा वर्णपूरितः ॥ सस्यं वाऽऽभासितं यद्वत्तथा स्यात्पट वपुर्विराडिति ॥ सूर्योदया नंतरं आतपेन प्रकाशितो लोकः आतपाभातलोकः तत्सदृशो वैश्वानरमाह ॥ विश्वरूपाध्याय एष उक्तः सूक्तेऽपि पौरुषे ॥ धात्रादिस्तंबपर्यं तानेतस्यावयवान्विदुरिति ॥ विश्वरूपाध्यायादौ कीदृग्रूपमुदितमित्याकांक्षायां ब्रह्मादिस्तंबपर्यंतं जगद्रूपमुदितमित्याह धात्रादीति ॥ एतावता प्रकृते किमायातमित्याशंक्य अंतर्यामिप्रभृति कुद्दालकादिपर्यंतं वस्तुजातं प्रत्येकमीश्वरत्वेन पूज्यता मित्याह ॥ ईशसूत्रादिना ॥ एवं सूत्रविराड्वेधोविष्णुरुद्रेन्द्रवह्नयः विघ्नभैरवमैरालमारिकायक्षराक्षसाः ॥ विप्रक्षत्रियविट्शूद्रा गवाश्वमृगपक्षिणः ॥ अश्वत्थवटचूताद्या यवव्रीहितृणादयः ॥ जलपाषाणमृत्काष्ठवास्याकुद्दालकादयः ॥ ईश्वराः सर्व एवैते पूजिताः ॥ फलदायिन इति ॥ तेषु यथा यथोपासते तत्तदेव भवतीति श्रुतिः ॥ तत्तत्पूजानुरूपफलसद्भावे प्रमाणमित्याह ॥ यथा यथोपासते तं फलमीयुस्तथा तथेति ॥ ननु सर्वेषामीश्वरत्वे फलवैषम्यं कुतः स्यादित्याशंक्य पूज्यानां मध्ये उत्तमानां मध्यमानामधमानां च सात्त्विकत्वादिभेदेन वैषम्यमित्याह ॥ फलोत्कर्षापकर्षौ तु पूज्यपूजानुसारत इति ॥ संसारिकफलसिद्धिरेवं भवतु मुक्तिः कस्योपासनया भवतीत्याशंक्य पूज्यानां मध्ये ज्ञानं ज्ञानव्यतिरेकेण केनापि न भवतीत्याह ॥ मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथेति ॥ तत्र दृष्टान्तमाह ॥ जाग्रद्बोधं विना नैव स्वस्वप्नो हीयते यथेति ॥ स्वजागरणमंतरेण स्वनिद्राकल्पितस्वप्नो यथा न वर्त्तते तथा ब्रह्मज्ञानमन्तरेण तत्कल्पितसंसारो न वर्त्तत इति भावः ॥ ननु द्वैतनिवृत्तिलक्षणाया मुक्तेः स्वप्नदृष्टान्तेन तत्त्वबोधसाध्यत्वाभिधानमनुपपन्नम् ज्ञानेन निवर्त्यस्य द्वैतस्य स्वप्नवदनृतत्वाभावादित्याशंक्य [illegible] रूपत्वेनाप्यनृतत्व मस्त्येव उपमेतत्स्वसुषुप्तिस्वप्नजाग्रत्तमायामात्रमिति श्रुत्याभिहिततत्त्वाद्वैतमित्याह ॥ अद्वितीये ब्रह्मतत्त्वे स्वप्नो

पू.

दी.

२८

यमखिलंजगत्॥ ईशजीवादिरूपेणाचेतनाचेतनात्मकमिति॥ ईशजीवादिरूपेणावर्तमानं चेतनाचेतनात्मकं यदखिलं जगदस्ति अयमाहु
तीयं ब्रह्म तत्त्वमसि इति याजना॥ ननु ईशजीवयोर्ब्रह्माभिन्नयोः कथं जगदन्तःपातित्वमित्यत आह कल्पितयोरपि यात्र कल्पितत्वेन जगदन्तःपाति
त्वमित्याह॥ आनन्दमयविज्ञानमयावीश्वरजीवकौ॥ मायायां कल्पितावेतौ ताभ्यां सर्वं प्रकल्पितमिति॥ ताभ्यां सर्वं प्रकल्पितमिति युक्तं॥ तत्र
केन किं प्रकल्पितमित्याकांक्षायामाह॥ ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता॥ जाग्रदादिविमोक्षान्तः संसारो जीवकल्पित इति॥ स ऐक्षत
लोकान्नु सृजत इति स इमांल्लोकानसृजत इत्यादिकं तत्तयेतमेव पुरुषं ब्रह्म ततमपश्यदित्यन्तया प्रतिपादितः॥ संसारो जीवकर्तृक इत्यर्थः॥ ननु ईशजीवा
दिरूपेणाचेतनाचेतनात्मकं जगन्मिथ्यात्वे ब्रह्मण एव पारमार्थिकत्ववादिनां जीवेश्वरतत्त्वविज्ञाया विप्रतिपत्तिः कुत इत्याशंक्य भ्रान्तिसिद्धतत्त्वज्ञा
नत्वात्म्यत्वादित्याह॥ अद्वितीयं ब्रह्मतत्त्वमसंगं तन्न जानते॥ जीवेशयोर्मायिकयोर्वृथैव कलहं ययुरिति॥ जीवेश्वरविषयां वादिविप्रतिपत्ते या
रज्ञानमूलत्वे तथाविधत्वेन ते बोधनीया इत्याशंकाव्याधमत्वान्नेत्याह॥ ज्ञात्वा सदा तत्त्वनिष्ठाननुमोदामहे वयम्॥ अनुशोचाम एवान्यान्न
भ्रान्तैर्विवदामहे इति॥ ईश्वरे जीवे च भ्रान्त्या विप्रतिपन्नान् वादिनो विलयदर्शयति॥ तृणाचिकादियोगान्ता ईश्वरभ्रान्तिमाश्रिताः॥ लोकाय
तादिसांख्यान्ता जीवविभ्रान्तिमाश्रिता इति॥ कुतो भ्रान्तित्वं तेषामित्यत आह॥ अद्वितीयब्रह्मतत्त्वं न जानन्ति यदा तदा॥ भ्रान्ता एवाखिलास्तेषां
क्व मुक्तिः क्वेह वा सुखमिति॥ ततः किं तत्राह तेषामिति परिगृहीतपक्षप्रतिपादनाभिनिवेशोच्छित्तविश्रान्त्यभावेन हि कमपि सुखं तेषामित्याह
वा सुखमिति॥ ननु तेषां ब्रह्मविद्याभावेऽपि इतरविद्याप्रयुक्तं उत्तमाधमभावोदयपत्तेः अतः तत्तमत्वप्रयुक्तसुखं केषांचित्स्यादित्याशंक्य
मुमुक्षुत्वनिरनादरणीयत्वं दृष्टान्तेनाह॥ उत्तमाधमभावश्चेत्तेषां स्यादस्तु तेन किं॥ स्वप्नस्थराज्यभिक्षाभ्यां न बद्धः स्पृश्यते खलु इति

जीवेश्वरवादयोर्मुक्तिहेतुत्वाभावात्॥ न मुमुक्षुभिस्तत्र मतिर्निवेशनीयेत्युपसंहरति॥ तस्मान्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः का
र्या॥ किंतु ब्रह्मतत्त्वं विचार्य बुद्ध्वा तां चरत तद्दृशः इति॥ तर्हि किं कर्तव्यमित्याशंक्य श्रुतिविचारेण ब्रह्मबोध एव कर्तव्य इत्याह॥ किंतु ब्र
ह्मेति ननु ब्रह्मतत्त्वविनिश्चयाय तयोः स्वरूपं हेयत्वेन ज्ञातव्यमित्याशंक्य॥ तथा च जीवेशवादयोरेव बुद्धिर्न समापनीयेत्यपि तत्रा
ह॥ पूर्वपक्षतया तौ चेत् तत्त्वनिर्णयहेतुतां॥ प्राप्नुतोऽस्तु निमज्जनं तयोर्नैतावता वशः इति॥ एतावता पूर्वपक्षतया तत्त्वनिर्णयहेतुत्व
संभवेन तयोर्जीवेशवादयोरवशोऽविवेकश्च न अभ्युपगम्योऽनन्निमज्जनस्येति योजना॥ ननु सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेन
भवद्भिरप्युपादेयत्वान्न तयोः पूर्वपक्षत्वमिति शंकते॥ असंगचिद्विभुर्जीवः सांख्योक्तस्तादृगीश्वरः॥ योगोक्तस्तत्त्वमोरर्थौ शुद्धौ तावि
ति चेदिति॥ सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेऽपि तयोर्वास्तवभेदस्य तैरंगीकृतत्वान्नायमस्मत्सिद्धान्तः स्यादित्याशयेनाह॥ न
तत्त्वमोरुभाववर्थावस्मत्सिद्धान्ततां गतौ॥ अद्वैतबोधनार्थाय सा कक्षा काचिदिष्यते इति॥ तत्त्वंपदयोरुभावर्थौ अस्मत्सिद्धान्ततत्त्वं न
गतावितियोजना॥ ननु कूटस्थब्रह्मशब्दाभ्यां शुद्धौ तत्त्वंपदार्थौ भवद्भिरपि भिन्नौ निरूपितावित्याशंक्याह॥ अद्वैतबोधनायेति॥
लोकप्रसिद्धभेदनिरासद्वारा तदैक्यप्रतिपादनायैव तौ भेदेनानूदितौ न तु तयोर्भेदः प्रतिपाद्यते इति भावः॥ तर्हि पदार्थशोधनं
किमर्थमित्यत आह॥ अनादिमायया भ्रान्ता जीवेशौ सुविलक्षणौ॥ मन्यन्ते तद्व्युदासाय केवलं शोधनं तयोरिति॥ अत्र माया
शब्देन स्वाश्रयव्यामोहकाल्लदातेन तथा विपरीतं ज्ञानं प्राप्ताः कर्तृकर्त्रादिमत्त्वं जीवस्य सर्वज्ञत्वादिगुणता योगित्वं चेश्वरस्य
पारमार्थिकं मन्यन्ते॥ अतस्तन्निरस्यर्थं शोधनं क्रियत इत्यर्थः पदार्थशोधनमेव दिदर्शयिषुस्तदुपायत्वेन पूर्वोक्तं दृष्टं

तं स्मारयति॥ अत एवात्र दृष्टांतो योग्यः प्राक्सम्यगीरितः॥ घटाकाशमहाकाशौ जलाकाशाभ्रखात्मक इति॥ यतः पदार्थशोधने
कर्तव्यमत एवेत्यर्थः पदार्थशोधनप्रकारमाह॥ जलाभ्रोपाध्यधीने ते जलाकाशाभ्रखे तयोः। आधारौ तु घटाकाशमहाका-
शौ सुनिर्मलाविति॥ ये जलाकाशाभ्रखे ते जलाभ्रोपाध्यधीनत्वाद् परमार्थिके तयोराधारभूतौ घटाकाशमहाकाशौ सुनि-
र्मलौ जलाद्युपाधिनिरपेक्षाकाशमात्रस्वरूपावित्यर्थः॥ दार्ष्टांतिकमाह॥ एवमानंदविज्ञानमयौ मायाधियोर्वशौ तदधिष्ठानकूटस्थ
ब्रह्मणी तु विनिर्मले इति॥ ननु पदार्थद्वयशोधनकष्टोपयोगित्वे नादौ सांख्ययोगमतद्वयमंगीकार्यमिति चेत्॥ अत्र स्वल्पमि-
दमुच्यते॥ इतरेषामपि शास्त्राणां तत्तत्कष्टोपयोगित्वे नास्माभिरभ्युपेयत्वादित्याह॥ एतत्कष्टोपयोगेन सांख्ययोगौ मतौ यदि
देहात्ममयकल्पत्वादात्मत्वेनाभ्युपेयतामिति॥ कुतस्तर्हि सांख्ययोगयोर्वेदान्तविरोधित्वमित्याशंक्याह॥ जीवभेद जगत्सत्यत्वे ताट-
स्थ्यलक्षणतौ इत्यत आह॥ आत्मभेदो जगत्सत्यमीशोऽन्य इति चेत्त्रयं॥ त्यज्यते तैस्तदा सांख्ययोगवेदान्तसंगतिः॥ ननु जीवस्यासं-
गत्वज्ञानादेव मुक्तिसिद्धेः किमद्वैतत्वबोधनेनेत्याशंक्य अद्वैतज्ञानमंतरेणासंगत्वादिकं न सम्भावितमिति॥ अभिसंधिं हृदि निधायोक्त-
रमाह॥ जीवासंगत्वमात्रेण कृतार्थ इति चेत्तदा॥ स्रक्चंदनादिनित्यत्वमात्रेणापि कृतार्थतेति॥ अभिसंधिमाविष्करोति॥ यथास्र-
गादि नित्यत्वं दुःसंपाद्यं तथात्मनः॥ असंगत्वं न संभाव्यं जीवं तोऽजगदीशयोरिति॥ असंभवमेव स्पष्टयति॥ अवश्यप्रवृत्तिः
संगं पुरे वा पातयेत्तथा॥ नियच्छस्येव मीशोऽपि कोऽस्य मोक्षस्तथा सतीति॥ फलितमाह॥ कोस्येति संगनियमनयोरविवेककार्य-
त्वाद्विवेकज्ञानेन चाविवेकनिवृत्तौ कुतः पुनः संगाद्युत्पत्तिरिति शंकते॥ अविवेककृतः संगो नियमश्चेति चेत्तदा॥ एवं स

स्यपसिद्धत्वापातइतिपरिहरति॥ बलादापतितो मायावादः सांख्यस्य दुर्मतेरिति॥ अयं भावः अविवेको नाम किं विवेकाभावः किं वा तदन्य
त् तद्विरोधी नाद्यः अभावमात्रस्य भावकार्यत्वायोगात् नद्वितीयः॥ विवेकादन्यस्य घटादेः संगहेतुत्वादर्शनात्॥ तृतीये तु तस्य भावरू
पाज्ञानत्वमेवेति मायावादप्रसंग इति अद्वैताभ्युपगमे बन्धमोक्षव्यवस्थानुपपत्तेरात्मभेदोङ्गीकर्तव्य इति चोदयति॥ बन्धमोक्षव्य
वस्थार्थमात्मनानात्वमिष्यतां इति चेन्न यतो माया व्यवस्थापयतुं क्षमेति॥ एकस्याप्यात्मनो मायया बन्धमोक्षव्यवस्थोपपत्तेर्भेव
मिति परिहरति न यतो इति॥ मायापि कथं व्यवस्थापयेत इत्याशंक्य॥ तस्या दुर्घटकारित्वस्वभावादित्याह॥ दुर्घटं घटयामीति वि
रुद्धं किं न पश्यसीति॥ बन्धस्याविद्याकल्पितत्वेपि मोक्षो वास्तवोऽभ्युपेतव्य इत्याशंक्य श्रुतिविरोधान्नैवमित्याह॥ वास्तवौ बन्धमोक्षौ तु श्रु
तिर्न सहतेतरामिति॥ न सहतेतरां नैव सहत इत्यर्थः बन्धमिव मोक्षमपि वास्तवं न सहत इति भावः मोक्षादेर्वास्तवत्वप्रति
षेधकां श्रुतिं पठति॥ न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता इति॥ निरोधो नाशः उत्पत्ति
र्देहसंबन्धः बद्धः सुखदुःखादिधर्मवान् साधकः श्रवणाद्यनुष्ठाता मुमुक्षुः साधनचतुष्टयसंपन्नो मुक्तो निवृत्ताविद्य इत्येतत्स
र्ववस्तु नास्तीत्यर्थः एवं जीवेश्वरादिभेदस्य मायामयत्वमुपपादितमुपसंहरति॥ मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ॥ यथेच्छं
पिबतां द्वैतं तत्त्वं त्वद्वैतमेव हीति॥ ननु जीवेश्वरयोर्मायिकत्वेन तद्भेदस्य मिथ्यात्वेपि कूटस्थब्रह्मणोः पारमार्थिकत्वेन तद्भेदोपि
पारमार्थिकं स्यादित्याशंक्य भेदप्रयोजकस्य स्वरूपवैलक्षण्यस्याभावान्नैवमिति परिहरति॥ कूटस्थब्रह्मणोर्भेदो नाममात्रादृते
न हीति नाममात्राद्भेदप्रतीतावपि वस्तुतो भेदाभावे दृष्टान्तं पूर्वोक्तं स्मारयति घटाकाशमहाकाशौ वियुज्येते न हि क्वचिदिति॥ एवं

भेदस्य मिथ्यात्वसमर्थनेन किं फलमित्यत आह॥ यदद्वैतं श्रुतं सद्देः युक्तदेवाद्यचोपरि। मुक्तावपि वृथा माया भ्रामयत्यखिला
ञ्जनानिति॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतौ यदद्वितीयं ब्रह्म प्रतिपादितं तद्देवकालत्रयेऽप्यबाध्यत्वेन वास्तवं न
भेदस्याभावः॥ कुतस्तर्हि सर्वे भेदमभिनिवेशः॥ कुत इत्यत आह वृथा मायेति तत्त्वज्ञानरहितत्वादभिनिवेशं कुर्वन्तीति भावः॥ ननु प्रपञ्चस्य
मायामयत्वं तत्त्वस्याद्वितीयत्वं ये वर्णयन्ति तेऽपि संसरन्तोऽपि दृश्यन्ते अतस्तत्त्वज्ञानेन किं प्रयोजनमिति शङ्कते॥ ये वदन्तीत्थमेतेऽपि
भ्राम्यन्ते विद्ययात्र किम्॥ न यथापूर्वमेतेषामत्र भ्रान्तेरदर्शनादिति॥ कर्मवच्छास्त्रकेषां चिद्व्यवहारे सत्यपि पूर्ववदभिनिवेशाभावान्नैवमि
न यथेति ज्ञानिनो भ्रान्त्यभावं दर्शयितुमज्ञानिनां निश्चयं तावदाह॥ ऐहिकामुष्मिकः सर्वः संसारो वास्तवस्ततः॥ न भाति
नास्ति वाऽद्वैतमित्यज्ञानिविनिश्चय इति इहलोके भव ऐहिकः पुत्रकलत्रादिरूपः अमुष्मिन्परलोके भव आमुष्मिकः
स्वर्गसुखाद्यनुभवरूपस्तव हि विनिश्चयस्य ततो वैलक्षण्यं दर्शयति॥ ज्ञानिनां विपरीतोऽस्मान्निश्चयः सम्यगीक्षतः इति
अद्वैतं पारमार्थिकं भाति च संसारस्तु परमार्थिक इति निश्चय इत्यर्थः ततः किमित्यत आह स्वस्वनिश्चयानुसारेण फलं भव
तीत्याह॥ स्वस्वनिश्चयतो बद्धो मुक्तोऽहं चेति मन्यते इति॥ अद्वैतं भाती युक्तिः शास्त्रत एव नानुभवतः अतो न निश्चय इ
ति शङ्कते॥ नाद्वैतमपरोक्षं चेन्न चिद्रूपेण भासनात्॥ अशेषेण न भातं चेद्द्वैतं किं भासतेऽखिलमिति॥ अनुभवागोचरत्व
मसिद्धमिति परिहरति न चिद्रूपेणेति घटः स्फुरतीति घटादिष्वनुस्यूतस्फुरणारूपेण भावादिति भावः ननु चिद्रूप

समानेपि तत्कालस्यैव न न प्रतीयत इति शंकते ॥ अद्वैतोपेतोत्ति साकल्येन भानाभावौ द्वैतेपि समान इत्याह ॥ द्वैतं किमिति
एवं दोषसाम्यमभिधाय परिहारसाम्यमाह ॥ दिङ्मात्रेणाभिभानं तत्त्वं द्वयोरपि समं खलु इति ॥ दिङ्मात्रेणैकदेशेन द्वयोर्द्वै
ताद्वैतयोरित्यर्थः ॥ एतावता कथं परिहारसाम्यमित्याह ॥ द्वैतसिद्धिवन्नाद्वैतनिश्चय इवासिद्धिरेतावता न किमिति
तेन तव पक्षे तव तैकदेशप्रतीतिसद्भावेन द्वैतसिद्धिवन्नाद्वैतनिश्चय इवाद्वैतासिद्धिरद्वैतनिश्चयोपि किं न
भवति किंतु भवत्येव ॥ पूर्ववादी प्रकारांतरेणाद्वैतासिद्धिं शंकते ॥ द्वैतेन हीनमद्वैतं द्वैतज्ञाने कथं त्विदमिति
अद्वैतं द्वैतरहितं तयोः परस्परविरोधात्तथा सति द्वैतप्रतीतावद्वैतं न संभवतीत्यर्थः नन्वेतर्हि द्वैतस्याप्य
द्वैतविरोधित्वादद्वैते प्रतिभासमाने द्वैतस्याप्यसिद्धिरिति चोद्यं समानमित्याशंक्याह ॥ पूर्ववादी ॥ चिद्भानं त्ववि
रोध्यस्य द्वैतस्यातो सममत्र भेद इति ॥ न च भवन्मते चिद्रूपप्रतीतेरेवाद्वैतप्रतीतित्वात्तस्याश्चाद्वैतविरोधित्वाभावान्नो
भयोः साम्यमिति भावः प्रतीयमानस्यापि द्वैतस्य वास्तवत्वाभावान्नवाद्वैतविघातित्वं परिहरति सिद्धांती पूर्वं त
र्हि ॥ अरुणद्वैतमसत्या यामयत्वतस्तेन वास्तवमद्वैतं परिशेषादिहि भासते इति ॥ प्रमातृप्रतिबंधेऽमत्रा प्रसंगाद्विमानतो संभ
त्ययः परिशेषः परिशेषप्रकारमेव दर्शयति ॥ अचिन्त्यरचनारूपं मायैव सकलं जगत् ॥ इति निश्चित्यवस्तुत्वमद्वैते
परिशेष्यतामिति ॥ न चिंत्या अचिंत्या रचना रूपं यस्य तत्तथाविधं सकलं जगन्मायैव मिथ्यैवेत्यनेनैव प्रकारेणानिर्वचनीय

त्वान्मिथ्यात्वं द्वैतस्य निश्चितस्य वास्तवमद्वैतं परिशिष्यमित्यर्थः॥ नन्वेवमद्वैते तत्त्वनिश्चये कृतेऽपि पुनःपुनर्द्वैतस्य सत्यत्वं पूर्व
वासनया भातीत्याशंक्य तन्निवृत्त्यै पुनःपुनर्द्वैतमिथ्यात्वं विचारयेदित्याह॥ पुनर्द्वैतस्य वस्तुत्वं भाति चेत्तत्तथा पुनः
परिशीलय को वा वै प्रयासस्तेन ते वदेत्॥ आवृत्तिरसकृदुपदेशादिति चतुर्थाध्याये आत्मनः श्रवणाद्यावृत्तेरसकृद्वि
विहितत्वादभ्यासेनेति भावः॥ कियन्तं कालं नित्यं विचारणीयमित्याशंक्याह॥ परोक्षं चापरोक्षं च विद्यादिद्या विचा
रजा॥ तत्रापरोक्षविद्याप्तौ विचारोऽयं समाप्यत इति॥ विचारकालावधेरुक्तत्वान्नाद्वैतविचारेऽयं खेदो युक्तः किंतु द्वै
तप्रतिज्ञानास एव युक्त इत्याह॥ कियन्तं कालमिति चेत्खेदोऽयं द्वैत इष्यताम्॥ अद्वैते तु न युक्तोऽयं सर्वानर्थनिवारणात्॥ इति
नन्वेवमद्वैतात्मतत्त्वापरोक्षज्ञानवतस्तदपि मयि क्षुत्पिपासाद्यनर्थस्य परिदृश्यमानत्वादनर्थनिवारकत्वमात्मज्ञानस्यासि
द्धमिति शंकते॥ क्षुत्पिपासादयो दृष्टा यथापूर्वं मयीति चेत्॥ किमत्र शब्दवाच्यो हंकारे दृश्यन्ते उत त्वं चिद्रू
पत्वेच्छिते चिदात्मनीति विकल्प्याद्यमंगीकरोति मच्छब्दवाच्येऽहंकारे दृश्यतां नेति को वदेदिति॥ नद्वितीयस्यास्या
संगत्वादविषयत्वाच्चेति बहिरेव द्रष्टव्ये वस्तुतस्त्वप्रतीत्यभावेऽपि भ्रान्त्यात्मत्र सक्तिः स्यादित्याशंकते॥ चिद्रूपे
प्रसज्येरन्सादात्म्याध्यासतो यदि॥ मात्माध्यासं किंतु कुरु त्वं विवेकं कुरु सर्वदेति॥ एवं तर्ह्यनर्थहेतोरध्यासस्यानि
वृत्तये सदा विवेकः क्रियतामित्याह॥ माध्यासमिति॥ अनादिवासनायत्तास्तु नः पुनरध्यास आगतेऽनन्तरं तन्निवृत्त्यै विवेक
एकैवावर्तनीयः नोपायान्तरमित्याह॥ झटित्यध्यासमायाति दृढवासनयेति चेत्॥ आवर्तयेद्विवेकं च दृढं वासयितुं सदा

ति॥ ननु चिदाकारेणाद्वैतस्य मायामयत्वं युक्तं नैव सिध्यति नानुभवत इत्याशंकां चिंताऽरचनात्वलक्षणमिथ्यात्वानुभवस्य
स्वसाक्षित्वान्नैव प्रतीतिपरिहरन्ति॥ विवेके द्वैतमिथ्यात्वं युक्तं वेत्ति न भ्रमता॥ अचित्स्वरचनात्वस्यानुभूतिर्हि स्वसाक्षि
की॥ न च चित्स्वरचनात्वं मिथ्यापदार्थलक्षणत्वमुक्तं चिदात्मप्रतियोगित्वमिति शंकते॥ चिदप्यचित्स्वरचना यदि नस्य
त्तो नाव यं॥ चितेः स्वाचित्स्वरचनां ब्रूमो नित्यत्वकारणादिति॥ प्रागभावयुतत्वे सत्यचित्स्वरचनात्वं मिथ्यात्वलक्ष
णमिति विवक्षुरचित्स्वरचनात्वमात्मनोंऽगीकरोति॥ नर्हास्य इति॥ एवमंगीकारेऽपि पूर्वोक्तदोष एवेत्याशंकां परिहर
ति॥ नोभयमिति तत्र हेतुमाह॥ नित्यत्वकारणादिति वयं चितेः स्वचित्स्वरचनां नो ब्रूम इति योजना॥ चितेर्नि
त्यत्वं कुत इत्याशंकां प्रागभावानुभवाभावादित्याह॥ प्रागभावो नोऽनुभूतः प्रसक्तेर्नित्या ततः श्रुतेरिति॥ यतः श्रु
तेः प्रागभावो नानुभूतस्ततो नित्येति योजना॥ इदमत्राकूतं चितेः प्रागभावोऽस्तीति वदन्त्रष्टव्यः किं त्वत्प्रागभावः
किंचितानुभूयते॥ न तावत्स्वेन नान्येन तस्य जडत्वेनानुभवितृत्वानुपपत्तेः स्वतानुभूयत इत्यपि पक्षे किंचि
दंतरेण तत्स्वेनैव॥ नाद्यः अद्वैतवादे चिदंतरस्याभावात् तत्स्वीकारेऽपि चित्प्रतियोगिकस्याभावस्य चि
दंतरेणानुभवितुमशक्यत्वात् तस्यापि गृह्यमानत्वे घटादिवदचित्त्वापत्तेः नापि द्वितीयः स्वाभावस्य स्वेन
ग्रहीतुमशक्यत्वादिति॥ ननु द्वैतस्य प्रागभावादिरूपभेदत्वात्तेन भावस्य चत्वेनैवानुभवितुमशक्यत्वादनुभ
वितृत्वान्तराभावाच्चैतन्यवदद्वैतस्यापि नित्यत्वापत्तिरित्याशंकामनुभवितृत्वान्तराभावोऽसिद्ध इति परिह

त्॥ अद्वैतस्य प्रागभावस्तु चेत्तन्नोपालभ्यत इति॥ जाग्रदादिद्वैताभावस्य सुषुप्तौ साक्षिणानुभूयमानत्वात्तमसः साक्षी सर्वस्य सा-
क्षीत्युक्तेर्नेत्युक्ति प्रागभावः एवं च प्रागभावयुतत्वेनास्य चित्स्वरचनात्वस्य मिथ्यात्वलक्षणस्य सर्वैर्द्रष्टा वा तु द्वैतमिथ्यात्वलक्षणस्य सिद्ध-
मित्याह॥ प्रागभावयुतं द्वैतं रच्यते हि घटादिवत्॥ तथापि रचनाचित्त्वान्मिथ्या तेनेन्द्रजालवत्॥ प्रागभावयुतमिति हेतुगर्भितं
विशेषणं द्वैतं प्रागभावयुतत्वाद् घटादिवत् उच्यते हि तथापि रचनाविपितस्य द्वैतस्य रचनाचित्त्वात् तेन रच्यमानत्वेनेन्द्रजाल-
वदैन्द्रजालिकप्रासादादिवन्मिथ्येत्यर्थः चितिस्तावत्स्वप्रकाशत्वेन नित्या; परोक्षा च भासते चिद्व्यतिरिक्तस्य च मिथ्यात्वं चि-
तानुभूयत इति दर्शितं एवं च सत्यद्वैतस्यापरोक्षत्वं नास्तीति वदतो व्याघातः स्यादित्याह॥ चित्स्वरूपज्ञाततोऽन्यस्य मिथ्यात्वं चा-
नुभूयते॥ नाद्वैतमपरोक्षं चेत्येतन्न व्याहतं कथमिति॥ चिद्रूपेण मिथ्यात्वमनुभूयते कस्मात् चिद्रूपे भासनादित्यपि
निवयुक्तिमप्यद्वैतार्थश्रवणात् अद्वैतमपरोक्षं नेत्येतत्कथं न व्याहतं चेति योजना एवं वेदान्तार्थज्ञानवतामपि पुरुषाणां
केषांचिदत्र विश्वासः कुतो न जायते इति पृच्छति॥ श्रुत्वाप्यसंतुष्टाः केचित्कुत इतीरिता॥ चार्वाकादेः प्रबुद्धस्यापि
त्मा देहः कुतो वेदेति॥ सम्यग्विचारशून्यत्वादिति विवक्षुः प्रतिबंदीं गृह्णाति चार्वाकादेरिति आदिशब्देन पामरा गृह्यन्ते प्रबुद्धस्याह-
मोहः कुशलस्य प्रतिबंदीमोचनं रंकतः सम्यग्विचारो नास्त्यस्य धीदोषादिति चेत् साम्येन समाधत्ते तथात्र संतुष्टास्य शास्त्रार्थ-
तत्त्वे संततविशेषतः इति धीदोषादित्यनुषज्यते तुत्राब्द एवं व्याख्यार्थः इत्थं तत्त्वं विचार्यतत्त्वस्य तत्त्वज्ञानफलं विचारस्य

तु तत्वत्ति पादितं कामश्रुतिं पठति ॥ यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिता इति ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इत्यस्य म
न्त्रस्योत्तरार्धं ॥ अत्रास्य मुमुक्षोर्हृदि श्रिये कामास्तादात्म्याध्याससमूला इच्छादयः सन्तीति ते सर्वे यदा यस्मिन्काले प्रमुच्यन्ते तत्त्वज्ञानेना
ध्यासनिवृत्त्या निवर्तन्ते अथ तदानीमेव मर्त्यः पूर्वदेहतादात्म्याध्यासेन मरणशीलः पुरुषोऽमृतोऽध्यासाभावेन तद्रहितो भवति
तत्रेहैवेत्याह ॥ अत्र ब्रह्म समश्नुत इत्यत्रास्मिन्नेवैव देहे ब्रह्मेत्यादिलक्षणं समश्नुते सम्यगाप्नोतीत्यस्याः श्रुतेरर्थः श्रुत्या प्रति
पादितं फलं कामनिवृत्त्यादिलक्षणं समश्नुते सम्यगाप्नोतीत्यस्याः श्रुतेरर्थः ननु भवसिद्धं किं तु शब्दमेवेति त्रिंशत्कं तं ॥ श्रौतं फलं दृ
ष्टं चेद्दृष्टमेव तदिति इति श्रौतं समनन्तरश्रुतिवाक्यतात्पर्यालोचनया तस्य दृष्टत्वं सिध्यतीत्यभिप्रायेण परिहरति ॥ दृष्टमेव तदि
ति ॥ तस्य दृष्टत्वस्य स्पष्टीकरणाय तद्वाक्यमुदाहृत्य तस्यार्थमाह ॥ यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थय इति ॥ कामा ग्रन्थिस्वरूपेण
व्याख्याता वाक्यशेषत इति ॥ अनेन वाक्येन वाक्यशेषेण कामपदं कस्य ग्रन्थिभेदेन व्याख्यानत्वाद्धृदिभेदस्य चाहंकारचितात्मनो
स्तादात्म्याध्यासनिवृत्तिलक्षणत्वादनुभवसिद्धत्वात्तत्प्रत्यक्षतेति भावः वाक्यशेषत इत्यनेन वाक्येनेत्यर्थः ननु लोके कामशब्दे
न इच्छाभेद एवोच्यते अतः कथं तस्य ग्रन्थित्वेन व्याख्यानमित्याशङ्क्याध्याससमूलस्यैवेच्छाविशेषस्य कामशब्दवाच्यत्वे
नेच्छामात्रस्येत्याह ॥ अहंकारचिदात्मानावेकीकृत्याविवेकतः ॥ इदमेऽस्त्विदं मेऽस्त्वितीच्छा ॥ कामशब्दितेति ॥ ननु चाध्या
समूलस्यैव कामस्य त्याज्यत्वे सतीतरो न्युपेतः स्यादित्याशङ्क्याबाधकत्वादन्युपेयत इत्याह ॥ अप्रबोधेऽपि चिदात्मानं पृथक

मस्त्वहंकृतिः ॥ इत्युक्तिकोटिवस्तुनि न बाधो ग्रंथिभेदतः ॥ अत्राहंकारोऽचिदात्मानमप्रवेश्य तादात्म्याध्यासेनानंतर्भाव्येत्यर्थः
नेच्छ ध्यासाभावे कामानुदयस्यादित्याशंक्य प्रारब्धकर्मवशात्तेषां धर्माणामुत्पत्तिः संभवतीत्याह ॥ ग्रंथिभेदेपि संभाव्या
इच्छा प्रारब्धदोषतः इति सदृष्टान्तमाह ॥ बुद्धोपि पापबाहुल्यादसंतोषोपस्यातवेति ॥ अत्राध्यासाभावे हंकारगतेच्छादेरबा
धकत्वे दृष्टांतद्वयप्रदर्शनेन विशदयति ॥ अहंकारगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा ॥ वृक्षादिजन्मनाशैर्वा चिद्रूपात्मनि किं
भवेदिति ॥ यथा देहव्याध्यादिभिरहंकारसंबंधितो बाधो नास्ति देहसंबंधरहितत्वात् यथा वृक्षादिगतैर्जन्मादिभिरेवमध्यासनिवृत्त्या
वहंकारगतेच्छादिभिरपीति भावः चिदात्मनोऽसंगत्वस्यैकरूपत्वात् तत्पूर्वमपि कामादिबाधो नास्तीत्याशंकते ॥ ग्रंथिभेदात्पुराप्येवमि
ति चेन्न विस्मरऽपमेव ग्रंथिभेदस्तवस्तेन कृती भवानिति एवंविधबोधस्यैव ग्रंथिभेदत्वेनास्माभिरभिधीयमानत्वात्
इदं चोद्यमस्मदनुकूलमित्याह ॥ तन्नविस्मरेति ॥ एवंविधज्ञानाभावे एव ग्रंथिरित्याह ॥ नैवं जानन्ति मूढास्ते सोऽयं ग्रंथिर्न वापरः
इति ॥ ननु ज्ञानिनोपीच्छाद्युपगमे ज्ञान्यज्ञानिनोः कुतो वैलक्षण्यमित्याशंक्य ग्रंथिभेदाभेदातिरेकेण न कुतोपीत्याह ॥ ग्रंथितद्भे
दमात्रेणावैषम्यं मूढबुद्धयोरिति ॥ भेदं कारणान्तराभावमेव विशदयति ॥ प्रवृत्तौ वा निवृत्तौ वा देहेंद्रियमनोधियां ॥ न किं
चिदपि वैषम्यमस्त्यज्ञानिविबुद्धयोरिति ॥ उक्तार्थे दृष्टान्तमाह ॥ व्रात्यश्रोत्रिययोर्वेदपाठापाठकृता भिदा ॥ नाहारादावस्ति
भेदः सोयं न्यायोत्र योज्यतामिति ॥ ज्ञानिनो ग्रंथिभ्रष्ट्यत्वे गीतावाक्यं प्रमाणयति ॥ न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कां
क्षतीत्युदासीनवदासीन इति ग्रंथिभिदोच्यते इति संप्रवृत्तानि दुःखानि प्राप्तानि न द्वेष्टि निवृत्तानि न कांक्षा सुखानि न कांक्षति ॥

नुदासीनवद्वर्त्तेत इत्यर्थः ग्रंथिभिदा ग्रंथिभेद इत्यर्थः ॥ इदं वाक्यमौदासीन्यविधिपरं न तु ग्रंथिभेदे प्रमाणमिति त्रां
कते ॥ औदासीन्यविधेयं चेद्दुःखं व्यर्थता तदा ॥ मत्रात्मोपास्यदेहाद्यादिति चेद्द्रोजिए एवमत्र इति विधिपरत्वे कष्टबोध्यर्थः स्या
दिति परिहरति पठ्यते ज्ञानिदेहादेरकार्यक्षमत्वादप्रवृत्तिर्न तु ग्रंथिभेदादित्याशंक्योपहसति नश्रान्त इति ॥ नयत्तु को दोषस्तत्रा
ह ॥ तत्त्वबोधहृदयव्याधिं मन्यन्ते ते महाध्धियः ॥ स्तेषां प्रज्ञाविपदा किं ते बाढं दुःशकं वदेति ॥ दुःशकमसाध्यमित्यर्थः ॥ न च
स्यानं पचिहासो यं ज्ञानिनां प्रवृत्त्यभावस्य पुराणसिद्धत्वादिति शंकते ॥ भरतादेरप्रवृत्तिः पुराणे श्रूयत इति चेन्न देति ॥ श्रूय
मानामानश्चौदयसीति परिहरति ॥ जक्षन् क्रीडन् रतिं विन्दन्निस श्रोबीव्रं किं श्रूनि मिति ॥ जक्षन् क्रीडन् रममाणः
स्त्रीभिर्यानैर्वा ज्ञातिभिर्वा च यस्से वी नोपजनं स्मरन्निदं शरीरमिति श्रोबाक्यं नाश्रोषीरित्यर्थः ॥ जक्षन् भक्षन् जक्ष
भक्षहसनयोरितिधातुः क्रीडन् स्वेच्छया विहरन् रममाणः स्त्रीभिर्वा नोपजनं स्मरन्निदं शरीरमिति नुपजनं जना
नां समीपे वर्त्तमानमिदं स्वशरीरं न स्मरन्ननुसंदधान इत्यर्थः श्रोके रतिं बिदन्निति श्रोतस्य रममान इति पदस्य व्या
ख्यानं ननु तर्हि पुराणस्य का गतिरित्याशंक्य पुराणमप्यौदासीन्यबोधनपरं न प्रवृत्त्यभावपरमभिप्रेत्याह ॥
न साहारादिसंपन्नभरतादिस्थितः क्वचित् ॥ काष्ठपाषाणवत्किंतु सगमी तदासतदिति ॥ संगः कुतस्त्यत इत्यत आह ॥ संग
तिबाध्यते लोकैर्निःसंगः सुखमश्नुते ॥ तेन संगः परित्याज्यः सर्वदा सुखमिच्छता ॥ ननु तर्हि मानससंगस्येव त्याज्यत्वेतः
संगस्य त्यागो न हि ह्यो पारवतां संगित्वादिकं जनैः कथमुच्यते इत्याशंक्य शास्त्रतात्पर्यज्ञानशून्यत्वादित्याह ॥ अशास्त्रज्ञा

हृदयमध्येव ह्यन्येष्विति॥ अत्रेतो मृदव्यवहारो नात्र विचारणीय इत्याह॥ मूर्खानां निर्णीतस्थास्तामात्मसिद्धान्तः उच्यते इति॥ तर्हि किमनुसंधेय
मित्याकांक्षायां शास्त्रहृदयमित्याह॥ अत्रात्मसिद्धान्त इति॥ को सावित्यत आह॥ वैराग्यबोधौ परमाः सहायास्ते परस्परम्॥ प्रायेणासह वर्तन्ते वियु
ज्यन्ते क्वचित्क्वचित्॥ वैराग्यादीनामन्योन्यापरिहारेणावस्थानदर्शनादन्योन्याश्रयं कार्यां तद्धेत्वादीनां भेदाद्भेदो वगन्तव्य इत्याह॥ हेतुस्व
रूपकार्याणि भिन्नान्येषामसंकरः॥ यथावदवगन्तव्यः शास्त्रार्थं प्रविविच्यतेति॥ तस्य वैराग्यस्य हेत्वादित्रयं दर्शयति॥ दोषदृष्टि
र्जिहासा च पुनर्भोगेष्वदीनता॥ असाधारणा हेत्वाद्या वैराग्यस्य त्रयोप्यमी॥ इति॥ इदानीं तत्त्वबोधस्य कारणादीनि दर्शयति॥ श्रवणादि
त्रयं तद्वत्तत्त्वमिथ्याविवेचनं॥ पुनर्ग्रंथेनवुदयो बोधस्यैते त्रयो मताः॥ इति॥ आदिशब्देन मननिदिध्यासने गृह्येते॥ आत्मा वा अरे द्रष्ट
व्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यात्मदर्शनसाधनत्वेन श्रवणादित्रिविधानाश्रवणादेः श्रीनह तुत्वं॥ तत्त्वमिथ्याविवेच
नं कूटस्थसाक्षिकार्यादेः भेदज्ञानं ग्रंथेरनुदयो लोपमाध्यासानुत्पत्तिः उपरतेस्तान्निदर्शयति॥ यमादिर्धीनिरोधश्च व्यवहार
स्य संक्षयः॥ स्युर्हेत्वाद्या उपरतेरित्यसंकर ईरित इति॥ आदिशब्देन नियमादयो गृह्यन्ते॥ धीनिरोधः अन्तर्वृत्तिनिरोधलक्षणो
योगः॥ किमेतेषां समप्राधान्यमुत नेत्याशंक्याह॥ तत्त्वबोधः प्रधानः स्यात्साक्षान्मोक्षप्रदत्वतः॥ बोधोपकरणावेतौ वैरा
ग्योपरमावुभावपि॥ तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेयनायेति श्रुतेरिति॥ इतरयोस्तत्रोपकारित्वमुपलक्षयति
त्रयं दमापन्नास्य कृतः कृतेन तद्दिदृक्षानान्धिसद्गुरुमेवाभिगच्छेत् शान्तोदान्त उपरतः तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्ये
दिति श्रुति दृष्टिमवगम्यते॥ प्रायेणासहवर्तन्ते वियुज्यन्ते क्वचित्क्वचिदिति तत्र कारणमाह॥ त्रयोप्यत्यन्त पक्वाश्चेत्महतस्त

पसः फलं॥ दुष्कृतेन कश्चित्किंचित्कोदाचिस्मृतिपद्यत इति॥ अनेकजन्मार्जितपुण्यपुंजपरिपाकेन मात्रां समभावो भवति अ
न्यथा तु प्रत्तिबंधकपापानुसारेण पुरुषविशेषे कालविशेषेण कस्यचित्प्रतिबंधो भवतीति भावः तत्रापि तत्वज्ञा
नप्रतिबंधो भवतो नास्तीत्याह॥ वैराग्योपरतेपूर्णो बोधस्तु प्रतिबध्यते॥ ममायतस्य न मोक्षोस्ति पुण्यलोकस्तपोबला
दिति॥ नहिं वैराग्यादिसंपादनं निष्फलमित्याशंक्याह॥ प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः शुचीनां श्री
मतां गेहे योगभ्रष्टोभिजायते इति॥ भगवद्वचनात् पुण्यलोकप्राप्तिर्भवतीत्याह॥ पुण्यलोकस्तपोबलादिति॥ वैराग्योपरत्यो
रप्रतिबन्धे जीवन्मुक्तिसुखं न सिध्यतीत्याह॥ पूर्णो बोधस्तदन्यो द्वौ प्रतिबद्धौ यदा तदा॥ मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नूपतीति॥ इदा
नीं वैराग्यादीनामवधिं प्रदर्शयति॥ ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः॥ देहात्मवत्परात्मत्वदार्ढ्ये बोधः समाप्यते॥ सुप्तवद्वि
स्मृतिः सीमा भवेदुपरमस्य हीति॥ अवान्तरतारतम्यं स्वस्वबुद्ध्या निश्चेयमित्याह॥ अदिशान्यायाद्विनिश्चेयं तारतम्यमवान्तरमिति
ननु तत्वबोधवतामपि रागादिमत्त्वे न वैषम्योपलंभात् ज्ञानस्यापि मुक्तिहेतुत्वं न निश्चेतुं शक्यत इत्याशंक्य रागादेर्व्याध्यादि
वदारब्धकर्मफलत्वात् मुक्तिप्रतिबंधकत्वमसिद्धमतो नजाशास्त्रार्थे विप्रतिपत्तव्यमित्याह॥ प्रारब्धकर्मनानात्वाद्बुद्धाना
मन्यथान्यथा॥ वर्तनं तेन शास्त्रार्थे विभ्रमं न पतेदिति॥ किं तर्हि विप्रतिपत्तव्यमित्यत आह॥ स्वस्वकर्मानुसारेण वर्तंतां
ते तथा तथा॥ अविशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिरिति॥ सर्वेषां ब्रह्मात्मैक्यविज्ञानमेकाकारं निर्विघ्नब्रह्मरूपे
ण वस्थानं च समानमिति भावः प्रकरणस्यास्य तात्पर्यं संक्षिप्य दर्शयति॥ जगच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पितं॥ माय

मात्रूपे स्वे च चैतन्ये परिशिष्यतामिति ॥ ग्रंथाभ्यासफलमाह ॥ चित्रदीपमिमं नित्यं येनुसंदधते बुधाः पश्यंतोपि जगच्चि
त्रं ते मुह्यन्ति न पूर्ववत् ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यश्रीचरणशिष्येण राम
कृष्णाख्यविदुषा विरचिततात्पर्यबोधनीनामक चित्रदीपव्याख्यानं समाप्तं ॥ षष्ठं प्रकरणं ॥ वेदार्थस्य प्रकाशेन तत
मोहार्दं निवारयन् ॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ क्रियते तृ
प्तिदीपस्य व्याख्यानं गुर्वनुग्रहात् ॥ तृप्तिदीपाख्यप्रकरणमारभमाणः श्रीभारतीतीर्थगुरुः तस्य श्रुतिः व्याख्यानरू
पत्वाद्व्याख्येयां श्रुतिं आदौ पठति ॥ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥ किमिच्छन्कस्य कामाय शरी
रमनुसंज्वरेदिति ॥ इदानीं चिकीर्षितस्य ग्रंथस्य विचारं तत्फलं दर्शयति ॥ अस्याः श्रुतेरभिप्रायः सम्यगत्र विचा
र्यते ॥ जीवन्मुक्तस्य या तृप्तिः सा तेन विशदायते ॥ अत्र तृप्तिदीपाख्ये ग्रंथे आत्मानं चेदित्यादिकायाः श्रुतेर
भिप्रायः तात्पर्यं सम्यग्विचार्यते तेनाभिप्रायविचारेण जीवन्मुक्तस्य श्रुतिप्रसिद्धा या तृप्तिः सा विशदाय
स्पष्टीकरोति पदच्छेदपदार्थोक्तिर्विग्रहो वाक्ययोजना ॥ आक्षेपसमाधानं व्याख्यानं पंचलक्षणमिति ॥ व्या
ख्यानलक्षणास्याः श्रौत्वात्पूरुष इति पदच्छेदपूर्वमभिधास्तु तदुपोद्घातत्वेन सृष्टिं संक्षिप्य दर्शयति ॥ मायाभा

येन जीवेशौ करोतीति श्रुतेः ॥ कल्पितावेव जीवेशौ तावाभासेन प्रकल्पितावितिपूर्वेणान्वयः गर्भं बुद्धौ संगृह्यतदर्थ

मर्थोत्तरवचनमुपोद्घातः अत्र मायाशब्देन चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता सत्वरजस्तमोगुणात्मिका जगदु

पादानभूता प्रकृतिरुच्यते सा च सत्वगुणस्य शुद्धिविशुद्धिभ्यां द्विधा निगद्यमानक्रमेण माया विद्या च भवति त

योर्मायाविद्ययोः प्रतिबिम्बितं चैतन्यमेवेश्वरो जीवश्चेत्येतदिदं तत्वविवेकाख्ये ग्रंथे श्रीमद्विद्यारण्यगुरु

भिर्निरूपितं ॥ चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता तमोरजःसत्वगुणा प्रकृतिर्द्विविधा च सा ॥ सत्वशुद्ध्यविशु

द्धिभ्यां मायाविद्ये च ते मते ॥ मायाबिम्बो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः ॥ अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा

सा कारणशरीरं स्यादिति ॥ इममेवार्थं मनसि निधाय जीवेशावाभासेन करोति ॥ माया चाविद्या च स्वयमेव भवति

ति श्रुतिरपि प्रवृत्ता ॥ एतज्जीवेश्वरयोः मायाकल्पितत्वं ॥ अथ तत्संजगत्ताभ्यामेव प्रकल्पितं तत्र केन किं यत्कल्पि

तमित्यत आह ॥ ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता ॥ जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः ॥ तदे

तत बहुस्यां प्रजायेयेति श्रुतिसिद्धमीक्षणमादिर्यस्याः सा च ईक्षणादिः यस्याः अनेन जीवात्मनानुप्रविश्येति श्रुतेः प्रवेशोऽन्तो

यस्याः सा प्रवेशान्ता ईक्षणादिप्रवेशान्ता सौ प्रवेशान्तश्चेति पश्चात्कर्मधारयः सेयं सृष्टिरीश्वरेण कल्पिता जाग्रदादिर्यस्य

संसारस्यासौ जाग्रदादिविमोक्षांतः किंतु योयं संसारः विमोक्षांतः संसारो जीवेन कल्पितः ॥ तदभिमानित्वाज्जीवस्य
सर्वे ते च जाग्रदादयः स्वरूपप्रत्यनीकाः स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वं ॥ स्त्र्यन्नपा
नादिविचित्रभोगैः स एव जाग्रत्परितृप्तिमेति स्वप्नेपि जीवः सुखदुःखभोक्ता स्वमायया कल्पितविश्वलो
के सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेति पुनश्च जन्मांतरकर्मयोगात् स एव जीवः स्व
पिति प्रबुद्धः पुरत्रये क्रीडति यश्च जीवः ततस्तु जातं सकलं विचित्रं जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्र
काशते तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते इति एवं पुरुषत्रयाद्व्यावर्त्यावबोधाय योगिनीसंप्रेक्षमनि
षामेदानीं पुरुषत्रयमाह ॥ शरीराधिष्ठानभूतात्मा कूटस्थोऽसंगचिद्वपुः ॥ अन्योन्याध्यासतोऽसंगधी
स्थजीवोत्र पुरुषः ॥ यः कूटस्थोऽसंगचिद्वपुर्विकाररहितोऽसंगचित्स्वरूपः शरीराधिष्ठानभूतात्मा अत्र मस्य हृद
हृदि याध्यासस्याधिष्ठानत्वेन वर्त्तमानः परमात्मास्ति सोऽसंग एव अन्योन्याध्यासतः अत्रात्मास्मि त्वन्योन्या
त्मकतानमयो यद्धर्म्मान्याध्यस्याचार्यैर्निरूपितेन तादात्म्याध्यासेनासंगधीस्थजीवः अत्र त्वेन पारमार्थि
कसंबन्धभून्यायावबुद्धौ वर्त्तमानजीवः सन् अत्र त्रयाणां मध्ये पुरुष इत्युच्यते सर्व एवायं पुरुषः सर्वासु पुरिषु
शयात इति श्रुतेः स्यापुरुषत्राबद्धस्य बुद्ध्यादित्वात् पुरुषस्येव पुरुषत्वात् सरूपमेव पुरुषः बुद्ध्यादिकल्पना

धिष्ठानं कूटस्थचेतनमप्येवं बुद्धौ प्रतिबिम्बत्वेनाप्तजीवभावं स पुरुषशब्देनोच्यत इत्यभिप्रायः न चात्र
पुरुषशब्देन केवलचिदाभासरूपो जीव उच्यतां किमनेन कूटस्थचेतनेनाधिष्ठानभूतेनेति वाच्यं संसारस्य तस्य
मोक्षादेश्च व्यवस्थापयितुमसिद्धेस्तदपि स्वीकर्तव्यमित्याह ॥ साधिष्ठानविमोक्षादौ जीवोऽधिक्रियते न तु केव
लो निरधिष्ठाने न च भाति केवलासिद्धितः इति ॥ साधिष्ठानः अधिष्ठानेन कूटस्थचेतनेन सहितो जीवः
विमोक्षादौ मोक्षस्वर्गादिसाधनानुष्ठानेऽधिक्रियतेऽधिकारी भवति न तु केवलश्चिदाभासः कुत इत्य
त आह ॥ निरधिष्ठाने तस्यारोपितस्य लोकेऽदृष्टत्वादिति भावः इदानीं साधिष्ठानस्यैव तस्य सं
साराद्यध्यापयितुं श्लोकद्वयेन विभज्य प्रदर्शयति ॥ अधिष्ठानांशसंयुक्तं भ्रमांशमवलम्बते यदा तदाहं संसा
रीत्येवं जीवोऽभिमन्यते भ्रमांशस्य तिरस्कारादधिष्ठानप्रधानता यदा तदा चिदात्माहमसङ्गोऽस्मीति बु
ध्यते इति ॥ जीवो यदाऽधिष्ठानांशसंयुक्तं कूटस्थसहितं भ्रमांशं चिदाभासोपेतं शरीरद्वय
मवलम्बते स्वस्वरूपत्वेन स्वीकरोति तदाहं संसारीत्येवं मन्यते यदा पुनर्भ्रमांशस्य देहद्वयस
हितस्य चिदाभासस्य तिरस्कारान्मिथ्यात्वज्ञानेनानादरादधिष्ठानप्रधानताऽधिष्ठानभूत
तस्यैव कूटस्थस्य स्वस्वरूपत्वं जीवेन स्वीक्रियते तदाहं चिदात्माऽसङ्गोऽस्मीति बुध्यते जानाति

अस्य कोप्य
सिद्धिरिति
अधिष्ठान

नन्वधिष्ठानचैतन्यस्य जीवरूपत्वाकारे चिदात्माहमसंगोऽस्मीति बुध्यत इति यदुक्तं तदनुपपन्नं स्यात् असंगचिद्रूपस्य कू-
टस्थस्याहंप्रत्ययविषयत्वाभावादित्याशंकते॥ नासंगेऽहंकृतिर्युक्ता कथमस्मीति चेदिति॥ असंगे चिदात्मनि विषये अहं-
प्रत्ययो न युज्यते यतः अतः अहं कथमस्मीति जानीयात् न कथमपीत्यर्थः मुख्यया वृत्त्या अहंप्रत्ययविषयत्वाभावे-
पि लक्षणया तदस्मीति विविच्य अहंशब्दार्थं तावद्विभजते॥ एको मुख्यो द्वावमुख्यावित्यर्थः त्रिविधोहमिति॥ अहंशब्द-
स्यार्थः कीदृशो मुख्यार्थ इत्याकांक्षायां तद्दर्शयति॥ अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः एकीभूय भवेन्मुख्य इति
कूटस्थचिदाभासयोः स्वरूपम् अन्योन्याध्यासेनैक्यं प्राप्त महंशब्दस्य वाच्यत्वेन मुख्योर्थो भवति अस्य कुतो मुख्यत्वमित्यत
आह॥ तत्र मूढैः प्रयुज्यत इति॥ यत इति अध्याहारः तत्र तस्मिन्नविविक्ते कूटस्थचिदाभासयोः स्वरूपे यतो विवे-
कज्ञानशून्यैः सर्वैरप्यहंशब्दः प्रयुज्यते अतोस्य मुख्यत्वमित्यर्थः इदानीममुख्यौ द्वावर्थौ दर्शयति॥ पृथगा-
भासकूटस्थावमुख्याविति॥ आभासकूटस्थौ प्रत्येकमहंशब्दार्थं यदा विविच्येते तदामुख्यार्थौ भवतः अनयोरमु-
ख्यत्वे कारणमाह॥ तत्त्ववित् पर्यायेण प्रयुंक्ते अहंशब्दं लोके च वैदिके इति॥ अत्रापि यत इत्याध्याहारः॥ तत्त्ववि-
द्यतः तत्र तयोः कूटस्थचिदाभासयोरहंशब्दं लोके वैदिके च व्यवहारे पर्यायेण प्रयुंक्त इति योजना अयं भावः चिदा-
भासकूटस्थयोरविविक्तरूपस्य सर्वजनव्यवहारविषयत्वान्मुख्यार्थत्वं विविक्तरूपस्य तु कतिपयजनैः कदाचिदेव व्यव-

ऽध्यमाणत्वादन्तःकरणतादात्म्याध्यासात्तदीयेताप्रयुंक्त इत्युक्तमेवार्थं प्रपंचयति ॥ प्रतिपत्तेः सौकर्याय श्लोकद्वयेन ॥ लौकिकव्यवहारेहं गच्छामी
त्यादिके बुधः । द्विविधं वदेच्चिदाभासं कूटस्थं चाविवेकतः ॥ असंगोहं चिदात्माहमिति शास्त्रीयदृष्टितः ॥ अहंशब्दं प्रयुंक्तेयं कूटस्थे
केवले बुध इति ॥ बुधो विद्वानहं गच्छामीत्यादिके लौकिके व्यवहारे कूटस्थाच्चिदाभासं विविच्य तमेवाहंशब्देन विवक्षि
त्वा प्रयुंक्ते इति अयमेव बुधः शास्त्रीयदृष्टितः वेदान्तश्रवणजनितज्ञानेन केवले चिदाभासाद्विविक्ते कूटस्थेऽसंगोहं चि
दात्माहमिति लक्षणयाहंशब्दं प्रयुंक्ते अत्र तोलक्षणयाऽहंशब्दार्थत्वे नाहंप्रत्ययविषयत्वं संभवादसंगोहमस्मीति ज्ञान
मुत्पद्यत इत्यभिप्रायः ॥ ननु पृथगाभासकूटस्थावहंशब्दस्य मुख्यार्थौ विविच्योक्तौ । तयोर्मध्ये कूटस्थः किमज्ञानविवर्तये
ऽसंगोस्मीति जानाति किं वा चिदाभासः न तावत्कूटस्थस्तस्यासंगचिद्रूपत्वेन ज्ञानित्वाज्ञानित्वयोरनुपपत्तेः अतश्चिदाभा
सस्य ज्ञानित्वादिकं वक्तव्यं तथा च सति कूटस्थादन्यः चिदाभासोहं कूटस्थोस्मीति न जानातु महदिति शंकते भातामिता
ज्ञानित्वाद्याभासस्यैव न चात्मनः ॥ तथा च कथमाभासः कूटस्थोस्मीति बुध्यतामिति ॥ तस्य कूटस्थत्वादन्यत्वमेवा
सिद्धमिति परिहरति ॥ नायं दोषः चिदाभासः कूटस्थैकस्वभाववानिति ॥ तत्रोपपत्तिमाह ॥ आभासत्वस्य मिथ्यात्वात्
कूटस्थत्वावशेषणादिति ॥ यथा दर्पणे प्रतीयमानस्य मुखाभासस्य ग्रीवास्थमुखमेव तत्त्वं तद्वदिति भावः
ननु चिदाभासस्य मिथ्यात्वे तदाश्रितं कूटस्थोस्मीति ज्ञानमपि मिथ्या स्यादिति शंकते ॥ कूटस्थोस्मीति बोधोपि

मिथ्यात्वं ददाति॥ कूटस्थस्य तस्मादतिरिक्तस्यासत्त्वात्तस्यापि मिथ्यात्वाभ्युपगमान्न मिथ्यात्वे [illegible] स्माकमभ्युपगतमे
मेवेति पृच्छति॥ नेति को वदेदिति॥ ननु मर्यादयानेन स्यक्यति॥ न ह्यस्य तया रज्जुसर्पविसर्पणमिति॥ रज्जो कल्पि
तस्य सर्पस्य भङ्गस्यादिकमपि प्रवृत्तौ यथा न वास्तवं नोङ्गीक्रियते यथा तद्वदिति भावः॥ ज्ञानस्य मिथ्यात्वे तेन संसारनिवृत्तिर्न स्यादि
त्याशंक्य निवर्त्यस्य संसारस्यापि तथात्वान्न निवृत्तिरूपपद्यते। स्वप्नमायादर्शनेन निद्रानिवृत्तिवदित्यभिप्रायेणाह॥ नाहं स्वो
नापि बोधेन संसारो विनिवर्तत इति॥ तत्र यादृशो यद्वा तादृशो बलिरिति लौकिकगाथां संवादयति॥ यक्षानुरूपो बलिरि
त्याहुर्लौकिका जना इति॥ उपपादितमर्थमुपसं[illegible]हरति॥ तस्मादाभासपुरुषः स कूटस्थो विविच्यतां॥ कूटस्थोऽस्मीति
विज्ञातुमर्हतीत्यभिधाकूतिरिति॥ यस्मात्कूटस्थोऽस्य चिदाभासस्याधिष्ठानस्वरूपं तस्मात्पुरुषशब्दवाच्यः कूटस्थसहितश्चि
दाभासः स कूटस्थं मिथ्याभूतात्स्वस्माद्विविच्य तत्त्वतया कूटस्थोऽहमस्मीत्यवगन्तुं शक्नोतीत्यभिप्रायेण कूटस्थोऽयम
स्मीत्युक्तवतीत्यर्थः एवं पुरुषोऽस्मीति पदद्वयप्रयोगाभिप्रायमभिधायायमिति पदप्रयोगाभिप्रायमाह॥ अत्र संदि
ग्धाविपर्यस्तबोधो देहात्मनीष्यते तद्वदत्रेति निर्णीतुमयमित्यभिधीयते॥ लौकिकानां प्रसिद्धो देहरूपे आत्मनि संशयविप
र्ययरहितोऽयमस्मीति बोधो यद्वदुपलभ्यते अत्र प्रत्यगात्मनि विषये तद्वत्तथाविधज्ञानं मुक्तिसिद्धये संपादयितुं निर्णी
तुमयमित्यभिधीयते इति श्लोकार्थः॥ ईदृशस्यैव बोधस्य मोक्षसाधनत्वे आचार्यवाक्यं संवादयति॥ देहात्मज्ञानवज्ज्ञान
देहात्मज्ञानबाधकम्॥ आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यत इति॥ अहं मनुष्य इति देहात्मविषयो दृढप्रत्ययो यथा
एवं प्रत्यगात्मन्ये[illegible] देहात्मवत्त्वज्ञानाय बाधनेन ब्रह्मास्मीति ज्ञानं यस्य जायते स विद्वान्न निच्छन्नपि मोक्षकारहितोपि

मुच्यते संसारहेतोरज्ञानस्य तेनैव बाधितत्वादिति भावः। अयमिति पदप्रयोगस्याभिप्रायांतरं दर्शयति। अयमित्यपरोक्षत्वमु
च्यते चेदिति॥ यथायं घट इत्यादिप्रयोगेष्विदमा निर्दिष्टस्य वस्तुनोऽपरोक्षत्वदर्शनात् तथायमस्मीत्यत्रापीति भावः। तद
यस्मात्कस्मिंश्चिन्मेवेत्याह॥ सदुच्यतामिति॥ कुत इत्यत आह॥ स्वयंप्रकाशचेतनमपरोक्षं सदा यत इति॥ साधनांतर-
निरपेक्षतया स्वभासमानं चैतन्यं स्वयं यत्नानान्यानित्यापरोक्षमित्यस्मान्निरपेक्षत्वादित्यर्थः॥ ननु चात्मनः स्वप्रकाश
चिद्रूपत्वेन नित्यापरोक्षत्वाभ्युपगमे अयमितिपदप्रयोगस्याभिप्रायवर्णनं गाकारबलादागतमात्मनः परोक्षविषयत्वम
परोक्षत्वविषयत्वं पूर्वोक्तज्ञानाज्ञानाश्रयविषयत्वं चानुपपन्नं स्यादित्याशंक्य दशमस्येव सर्वमुपपद्यत इत्याह॥ परो
क्षमपरोक्षं च ज्ञानमज्ञानमित्यदः॥ नित्यापरोक्षरूपेपि द्वयं स्याद्दशमे यथेति॥ परोक्षमपरोक्षं चेत्येकं युगलं ज्ञानमज्ञान
मित्यपरमिदं द्वयं नित्यापरोक्षरूपे स्यात्मनि दशमस्येव स्यादित्यर्थः॥ दृष्टान्तं स्फुटयति॥ नवसंख्याहृतज्ञानो
दशमो विभ्रमात्तदा। न वेत्ति दशमोस्मीति वीक्षमाणोपि तान्नवेति॥ परिगणनीयपुरुषनिष्ठया नवसंख्यया हृत
विवेकविज्ञानो दशमस्तदा तान्परिगणनीयान्नवेत्तीत्यर्थः॥ एवं दशमे ज्ञानं प्रदर्श्य तत्कार्यमावरणं दर्शयति
न भाति नास्ति दशम इति स्वं दशमं तदा॥ मत्वा वक्ति तदज्ञानकृतमावरणं विदुरिति॥ तदा दशमः स्वं दशमं संतं द
शमो न भाति नास्तीति मत्वा वक्ति। अस्य व्यवहारस्य यत्कारणं तदज्ञानकृतमज्ञानकार्यमावरणं विदुर्बुधा इति
शेषः॥ अज्ञानस्यैव कार्यविशेषं विक्षेपं दर्शयति॥ नद्यां ममार दशम इति शोचन्प्ररोदिति॥ अज्ञानकृतं विक्षे
परोदनादि विदुर्बुधा इति॥ दशमस्यासत्त्वभ्रांतिनिवर्त्तकं परोक्षज्ञानमाह॥ न मृतो दशमोस्तीति श्रुत्वाप्तवचने

३९

मा

न हा॥ यशोदात्वं दशमं वेत्ति स्वर्गादिलोकं च दृष्टिं तस्मै वा भासमानोऽज्ञानि वर्त्ते क्रमपरोक्षज्ञानं दर्शयति॥ त्वमेव दश
मोसीति गणयित्वा प्रदर्शितः॥ अपरोक्षतया ज्ञात्वा हृष्यति न रोदिति॥ स्वेन परिगणिते न दशमस्य
हत्वा [illegible] गतायित्वात्त्वमेव दशमोसीति प्रदर्शितः॥ अहं दशमोस्मीत्यपरोक्षतया ज्ञात्वा हर्षं प्राप्नोति
रोदनं च त्यजति॥ एवं हि दृष्टांते दशमे प्रदर्शितमवस्थासप्तकमनूद्य दार्ष्टांतिके आत्मन्यपि
तद्योतनीयमित्याह॥ अज्ञानावृतिविक्षेपद्विविधज्ञानहर्षशोकापगमचिदाभास इत्यते
योजनीयाश्चिदात्मनीति॥ अज्ञानं चावृतिश्च विक्षेपश्च द्विविधज्ञानं च हर्षश्चेति द्वंद्वसमासः तत्राज्ञा
नादिकं क्रमेणाह दर्शयति संसारासक्तेत्यादिना॥ संसारासक्तचित्तस्य चिदाभासस्य कदाचन स्वयंप्रकाशकूटस्थस्व
स्वतत्त्वं नैव वेत्त्ययं। न भाति नास्ति कूटस्थ इति वक्ति प्रसंगतः। कर्त्ता भोक्ताहमस्मीति विक्षेपं प्रतिपद्यते। अस्ति कू
टस्थ इत्यादौ परोक्षं वेत्ति वार्त्तया। पश्चात्कूटस्थ एवास्मीत्येवं वेत्ति विचारतः॥ कर्त्ता भोक्तेत्येवमादिशोकजातं प्रमु
ञ्चति। कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तुष्यतीति॥ अयं चिदाभासो विषयसंपादनादिषु सक्तचित्तः सन्कदाचन कू
टस्थचिद्रूपं [illegible] स्वस्य निजरूपं स्वप्रकाशचिद्रूपकूटस्थस्वप्रमाणं [illegible] नैव वेत्ति न जानातीति यत्तद
ज्ञानं चिदात्मविषये प्रसंगे जाते कूटस्थो न भातीति प्रलापकृतं इदमज्ञानकार्यमावरणं कूटस्थास्फुरणम[illegible]भिधानव

कूटस्थे बुद्ध्यादिकमात्मन्यारोपयति ॥ अत्रास्यारोपस्य हेतुर्देहद्वययुतश्चिदाभासस्य विक्षेपः परेण बोधितः कूटस्थोऽस्मीति निश्चि
नातीति परोक्षज्ञानं श्रवणादिपरिपाकवशात् कूटस्थोऽहमेवास्मीति जानाति इदमपरोक्षज्ञानं कूटस्थासंगात्मज्ञाना
नंतरं कर्तृत्वादिशोकजातं त्यजतीति यदयं शोकापगमः कृत्यं कर्तव्यजातं कृतं निष्पादितं प्रापणीयफलजातं प्रा
प्तं लब्धमिति तुष्टिरूपं तृप्तिः इयं तृप्तिरित्यर्थः दार्ष्टान्तिके बुद्धिमेवमवस्थासप्तकमनुवदति ॥ अज्ञानमावृतिस्तद्वद्वि
क्षेपश्च परोक्षधीः ॥ अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरंकुशेति ॥ ननु नैताववस्थासप्तकस्यात्मधर्मत्वांगीकारेत
स्य कूटस्थत्वं व्याहन्येतेत्याशंक्य तासामवस्थानां चिदाभासस्यैव न कूटस्थस्येत्याह ॥ सप्तावस्था इमाः संति चिदाभासस्ये
ति ॥ सर्वेषामवस्थानां सावधारणमित्यभिप्रायेण चिदाभासस्यैव न कूटस्थस्येत्यवगम्यते ॥ आसामत्रोपमासाद्ययेत्यत्रा
कं न चेत्याबंधमोक्षकारित्वद्योतनफलत्वादुपमासस्येत्याह ॥ तामिमामवस्थां तत्त्वमस्यां तो किमासासत्ताना
मपि विशेषणं बंधमोक्षकारित्वेनेत्याह ॥ तत्रेति बोधबंधश्च कृतस्य ताइति ॥ अज्ञानावरणविक्षेपरूपास्तिस्र इत्यर्थः
आसां बंधकारित्वदर्शनायेति स्वरूपं प्रत्येकं कार्यं प्रदर्शनेन स्पष्टीचिकीर्षुरज्ञानस्य स्वरूपं तावद्दर्शय
ति ॥ न जानामीत्युदासीनव्यवहारस्य कारणं ॥ प्रागभावेन युक्तमज्ञानमीरितमिति ॥ आत्मतत्त्वविचारप्रागभावस
हितं उदासीनव्यवहारस्य कारणं न जानामीत्यनुभवमानमज्ञानमीरितमित्यर्थः ॥ आवृतेः कार्यं दर्शयति ॥ अमार्गेण
विचार्याप्यतो नास्ति न भाति चेत्यसौ ॥ विपरीतव्यवहृतिरावृतेः कार्यमिष्यत इति ॥ शास्त्रोक्तप्रकारमतिलंघ्य केवलं
तर्केण विचार्यानंतरं कूटस्थो नास्ति न भातीत्येवंरूपो विपरीतव्यवहारस्त्वावरणकार्यमित्यर्थः विक्षेपस्य स्व
रूपं तत्कार्यं च दर्शयति ॥ देहद्वयचिदाभासरूपो विक्षेप ईरितः कर्तृत्वाद्यखिलः शोकः संसाराख्योस्य बंधक इति

स्थूलसूक्ष्माख्यशरीरद्वयसहितः चिदाभास एव विक्षेपः तस्य को बंधहेतुः संसारस्य प्रवर्तकत्वाद्यपि विलः शोकोऽस्य
चिदाभासस्य कार्यमिति विशेषः॥ कर्तृत्वादीत्यादिशब्देन प्रमातृत्वादयो गृह्यन्ते॥ ननु सुप्तावस्थायां चिदाभासस्येत्युक्त-
मनुपपन्नमज्ञानावरणयोर्विक्षेपोत्पत्तेः॥ पुरा स्थितत्वाच्चिदाभासस्येत्युक्तमनुपपन्नमज्ञानावरणयोर्विक्षे-
पोत्पत्तेः पुरा स्थितत्वाच्चिदाभासस्य विक्षेपानुत्पत्तितत्वात्तदवस्थात्वानुपपत्तेरित्याशंक्याह॥ अज्ञानमावृति
श्चेते विक्षेपात्प्राक् सिध्यतः॥ यद्यप्यावस्थे ते विक्षेपस्यैव नात्मन इति॥ अनयोर्विक्षेपात्पुरा स्थितत्वे
पि नात्मावस्थितत्वं तस्यासंगत्वेनावस्थावत्वानुपपत्तेः॥ अतः परिशेषाच्चिदाभासावस्थात्वमेतयोर्वक्तव्य-
मिति भावः॥ अवस्थावतो विक्षेपस्य तदानीमभावात्तदवस्थात्वाभिधानमनुपपन्नमित्याशंक्य विक्षेपाभावे
पि तत्संस्कारस्य तदानीं सत्त्वान्न विक्षेपावस्थात्वाभिधानं विरुध्यत इत्याह॥ विक्षेपोत्पत्तितः पूर्वमपि विक्षे-
पसंस्कृतिः॥ अस्त्येव तदवस्थात्वमविरुद्धं ततस्तयोः॥ ततः कारणात्तयोस्तदवस्थात्ववर्णनमविरुद्धमिति
योजना॥ न च प्रसिद्धसंस्काराभ्युपगमद्वारा विक्षेपावस्थात्ववर्णनादरमधिष्ठानतया प्रसिद्धब्रह्मावस्थावर्णनमपि
त्याशंक्य अतिप्रसंगो नैवमिति परिहरति॥ ब्रह्मण्यारोपितत्वेन ब्रह्मावस्थे इमे इति॥ न शंकनीयमेवासां ब्रह्मण्येवाध्या-
रोपणादिति॥ न केवलं ब्रह्मण्यारोपितत्वाविशेषेऽपि विक्षेपोत्पत्त्युत्तरकालीनानां संसाराद्यवस्थानां जीवाश्रितत्वेनानु

भूयमानत्वात्तत्र ब्रह्मावस्थात्वमिति शंकते॥ संसार्यहं विबुद्धोहं निःशोकस्तुष्ट इत्यपि॥ जीवगा उत्तरावस्था भान्ति न ब्रह्म
गा यदीति॥ ननु संसारी कर्तृत्वादिधर्मवान् विबुद्धस्तत्त्वमसीत्याकारवान् निःशोकः शोकरहितस्तुष्टो वक्ष्यमाणकृ
तकृत्यत्वादिजनिततोषवानहमस्मीति उत्तरावस्था जीवगा जीवाश्रिता भान्ति न ब्रह्माश्रिता इत्यर्थः॥ एवं तर्ह्यज्ञानाव
रणयोरपि जीवाश्रितत्वेनानुभूयमानत्वाज्जीवावस्थात्वमेवेति परिहरति॥ तर्ह्यज्ञोहं ब्रह्म सत्त्वभाने मद्दृष्टितो न
हि॥ पूर्वे द्वे अवस्थे कथं भासेते जीवगे इव भान्ति कथमिति॥ मद्दृष्टितो मम अनुभवेन इत्यर्थः॥ ननु तर्ह्यज्ञानाश्रयत्वं ब्र
ह्मणः पूर्वाचार्यैः कथमुक्तमित्याशंक्य तद्विवक्षां दर्शयति॥ अज्ञानस्याश्रयो ब्रह्माधिष्ठानतया जगुरिति॥ ब्रह्मणो ज्ञाना
धिष्ठानत्वविवक्षया तदाश्रयत्वमुक्तमित्यर्थः॥ ननु तर्हि किं विवक्षया जीवावस्थात्वमुक्तमित्याशंक्य विवक्षां
दर्शयति॥ जीवावस्थात्वमज्ञानाभिमानित्वादवादिषमिति॥ एवं बन्धहेतुमवस्थाद्वयं प्रदर्श्य अवशिष्टानामवस्था
मध्ये पूर्वाज्ञानावरणनिवृत्तिद्वारा मुक्तेर्हेतुमवस्थाद्वयं दर्शयति॥ ज्ञानद्वयेन नष्टेस्मिन्नज्ञाने तत्कृतावृतिः॥ न
भाति नास्ति चेत्येषा द्विधापि विनश्यतीति॥ परोक्षापरोक्षत्वभेदेन ज्ञानद्वयेनावरणकारणे ज्ञाने नष्टे सति तत्कृ
तवृत्तिः तेनाज्ञानेनोत्पादितं न भाति नास्तीति व्यवहारकारणं द्विविधमप्यावरणं कारणाभावान्नश्यतीति॥ कस्याः
स्याः केन निवृत्तिरित्यपेक्षायामनुमर्यां विभज्य दर्शयति॥ परोक्षज्ञानतो नश्येदसत्त्वावृत्तिहेतुता॥ अपरोक्षज्ञानता

एषा संसारानिवृत्तिहेतुर्नेति॥ कूटस्थोऽस्त्यात्मैवंरूपात्परोक्षज्ञानादज्ञानस्यासत्त्वावरणाकारणत्वं निवर्त्तते इदा
नीं ज्ञानस्य फलस्वरूपावस्थाद्वये प्रथमावस्थामाह॥ अपरोक्षज्ञानावरणेन च जीवत्वारोपसंस्थानात्॥ कर्तृत्वाद्य
सुखित्वलक्षणः शोकः संसाराख्यो निवर्त्तत इति॥ अज्ञानावरणतिरस्कृतत्वात्सापरोक्षतीयमानस्य जीवत्वस्यापि निवृत्तत्वात्त
न्निमित्तकः कर्तृत्वादिलक्षणः संसाराख्यः शोकः सर्वोऽपि निवर्त्तत इत्यर्थः॥ एवं त्रीकाण्डगमरूपावस्था
प्रदर्श्य निरंकुशतृप्तिलक्षणां द्वितीयां दर्शयति॥ निवृत्ते सर्वसंसारे नित्यमुक्तत्वमात्मनः॥ निरंकुशा
भवेत्तृप्तिः पुनः शोकासमुद्भवादिति॥ न चात्मानं चेद्विजानीयादिति मंत्रव्याख्याने प्रवृत्तत्वान्नद्वितीयम
ध्यायो ज्ञानावस्थाः सप्तकनिरूपणं प्रकृतत्वेनागतमित्याशंक्य आत्मानं चेद्वि त्यस्याः श्रुतेस्तास्व
र्थत्वेऽपि तन्निरूपणाभिहितत्वान्नप्रकृतासंगतमित्यभिप्रेत्य श्रुतिनामार्थमाह॥ अपरोक्षज्ञानशो
कनिवृत्त्याख्ये उभे इमे॥ अवस्थे जीव आप्नोति आत्मानं चेदितिश्रुतिरिति॥ चिदाभासनिष्ठं यद्वस्था
सप्तकमस्ति तत्रापरोक्षज्ञानशोकनिवृत्तिलक्षणमवस्थाद्वयं तत्पादयितुमयं मंत्रः प्रवृत्तः इत्य
भिप्रायः॥ ननु अयमित्यस्य प्रदानमित्यज्ञायमिति पदेनात्मनोऽपरोक्षत्वमुच्यते इत्युक्तं तथ्यास्ति अपरोक्षज्ञा
नविषयविषयत्वमेवास्यान्न परोक्षज्ञानविषयत्वमित्याशंक्य तदुपपादनायापरोक्षत्वं विभजते॥ अयमि

अपरोक्षत्वमुक्तं तद्द्विविधं भवेदिति॥ द्वैविध्ये कारणमाह॥ विषयस्वप्रकाशत्वाद्धियो प्येवं तदीक्षणादिति॥ विषय
स्य चिद्रूपस्यात्मनः स्वप्रकाशत्वात्स्वव्यवहारे साधनांतरनिरपेक्षत्वाद्धियो बुद्धाप्येवं स्वप्रकाशत्वेन तदीक्षणात्स्वविषय
स्यावलोकनाद्वेत्यर्थः॥ भवतु द्वैविध्यमेतावता परोक्षज्ञानविषयत्वे किमायातमित्याशंक्य विषयस्य प्रकाशत्वे परोक्षज्ञानवि
षयत्वे विरोधिनो भवतीत्याह॥ परोक्षज्ञानकालेपि विषयस्वप्रकाशात्मा समेति॥ अपरोक्षज्ञानकालेपि विषयस्वप्रकाश
ग्यस्य कथं प्रतिपाद्यते इत्याशंक्य न कूटस्थात्मनो भोक्तृत्वं प्रतिपाद्यते किन्तु लोकप्रसिद्धोऽयमात्मा भोक्ता
इति वक्तव्यमेव कृत्वा लोकानुवादन इत्याह ॥ भोक्ता स्वस्यैव भोगाय पतिजायादिमिच्छति ॥ एष लौकिकवृत्तां
तः श्रुत्यास... अनूद्यते इति ॥ लोके भोक्ता स्वस्यैव भोगाय पतिजायादि भोगोपकरणमिच्छतीत्ययं
लौकिको वृत्तान्तः श्रुत्यापि अनूद्यत इति नार्थांतरं प्रतिपाद्यत इत्यर्थः ॥ अनुवादः किमर्थमित्याशंक्य

प्रीतिरप्यते हेम
पते: त्वेनमापते
मा प्रीतिस्त्वाम
नुस्मरतः त्वोस
इवितयता मे
दया

मो क्रूर्येव प्रेम्णोऽभिधानायेत्याह॥ गोपानां तोऽस्मि तेभ्यस्तमो न गोपेष्वनुरज्यते॥ मोक्रूर्येव प्रभवेत्तोऽप्यनुरागं विधास्यतीति॥
गोप्यानां पत्तिः गुणादीनां नेतुः प्रमसंभोगोपकरणत्वाद्गोपेष्वनुरागो न कर्त्तव्यः किंतु प्रधानभूते मोक्रूर्येवानुरागः कर्त्तव्य इति वि
धानायेत्यर्थः गोपेषु प्रेमत्यागपूर्वः स्मरमात्प्रेम कर्त्तव्यतां यादृशात्तत्त्वेनेश्वरे प्रेम प्राप्यनायुरसारं पुराणवचनमु
दाहरति॥ या प्रीतिरविवेकानां विषयेष्वनपायिनी॥ त्वामनुस्मरतः सा मे हृदयान्मापसर्पत्विति॥ अविवेकानां त्वा
मज्ञानमूलानां विषयेष्वनपायिनी दृढा यान्मे मनसः सर्पतु प्रथाक्षतु ममम मनो विषये स्वास्मत् किं पति त्यजत्वेवम
दापि त्वनुरागस्य चर्च्यः॥ यदा॥ प्रतिबद्धमिमां विषयेषु दृढा यादृशी प्रीतिरविकारात्ताहशी विषयेषु विद्यमानाप्री
तिस्त्वामनुस्मरतो मे हृदयान्मापसर्प्पतु मा पगच्छतु सदा तिष्ठत्वित्यर्थः वेत्त्येव पुराणोक्तो किमायातमित्यत आह
इति न्यायेनेसर्वस्माद्गोपजातादिरक्तधीः॥ जपसंमृत्यत्नं प्रीतिं मोक्रूर्येव बध्नुते इति॥ इत्यनेन पुराणोक्तन्यायेन स
र्वस्माद्गोपजातात्सुतिपुत्रजायादिलक्षणाद्विरक्तधीर्यस्यासौ विरक्तधीः पुरुषः तां सोमं मोक्ष प्रीतिं मोक्रूर्येतस्मात्प्रव
नं हृत्स्थं एवमात्मानं बध्नुतेऽवतिष्ठत इति एवमात्मन्येव प्रेमोपसंहारे कृते तेऽमृत इत्याह॥ स्वकं चंदन वधू व
सु वस्त्रादिभु पामर॥ अप्रमत्तोपब्धा तदंतर्द्भूमायत्ति मोक्रूरीति॥ पामरः पृथग्जनः स्रगादिविषये यथाऽप्रमत्तः
सावधानो भवति॥ एवं मुमुक्षुरखिलानि विषयेष्वपि मायातेऽनवधानं मकरोति॥ किं तु तत्परिवर्तते पद्व तिष्टती त्यर्थः
अनवधानं भावमेव बध्नुते दृष्टावैः समप्यते॥ कामनाटकालोकादि मनम् समाप्तेति विरक्ततर मम्॥ विजिगीषुर्यथा
ते द्रव्यमुत्सुकः संविचारयेत जयपद्मा गोपमानादि कुरुते मापयता॥ स्वर्गादिवांछया तद्वत् कुर्याद्ध्यानं वे मुमुक्षु

ता॥ चित्तैकाग्र्यं यथा योगी महायासेन साधयेत्। अणिमादिप्रेप्सयैवं विविच्यैत्त्वं मुमुक्षयेति॥ यथा वि
जिगीषुः प्रतिवादिजयकाम इहलोकप्रधानतापुरुषो निरंतरं काव्यादीनभ्यस्यति एवं मुमुक्षुरप्यम
दोऽस्यात्मानं विचारयेत्॥ यथा वैदिकः स्वर्गाद्यर्थी तत्साधनानि जपादीनि श्रद्धापुरःसरमनुति
ष्ठति न यथा मुमुक्षुर्मोक्षैकध्यासे आत्मनि विश्वासं कुर्यात्। योगी योगाभ्यासवान् अणिमाद्यैश्व
र्यलाभेच्छया चेतसोऽनेकाग्र्यं महायासेन चित्तैकाग्र्यं यथा संपादयेत् तद्वदयमप्यात्मानं सदा विवि
च्येदृग्दृश्यो विविच्य जानीयादित्यर्थः। न चैवमेतेषां सदाभ्यासेन किं फलमित्यत आह॥ कौशलानि
विवर्धन्ते तेषामभ्यासपाटवात्॥ यथा तद्वद्विवेकोऽस्याप्यभ्यासाद्विशदायत इति॥ यथा तेषां काव्या
भ्यासवतां अभ्यासपाटवेन तस्मिन्विषये कौशलानि विवर्धन्ते एवमस्यापि मुमुक्षोरभ्यासाद्विवे
को देहादिभ्यो व्यात्मनो भेदज्ञानं विशदायते स्पष्टं भवति विवेकत्रैविध्यस्य फलमाह॥ विवेचनाम
भोक्तृत्वं जाग्रदादिषु संगता। अन्वयव्यतिरेकाभ्यां साक्षित्वाध्यवसीयत इति॥ अन्वयव्यतिरेकाभ्यां
त्म भोक्तृत्वात्मत्वं कर्तृत्वं पारमार्थिकस्वरूपं विवेचनाद्भोगेभ्यो जडजातेभ्यो भेदेन जानता पुरुषेण जाग्रदादिषु जा
ग्रत्स्वप्नसुषुप्तिस्वस्थासु साक्षित्वं संगताऽध्यवसीयते निश्चीयते इत्यर्थः। अन्वयव्यतिरेकौ
दर्शयति॥ यत्र यद्दृश्यते द्रष्टा जाग्रत्स्वप्नसुषुप्तिषु तत्रैवं तन्नैव तन्न स्वसंगृहीतं मतं हि संमतेति॥ जाग्र

नै.

दादिरूपमध्ये परिणामिन्नवस्थानेनगच्छति स्वप्नेप्युपदृष्टो वा यत् स्थूलं स्वस्मादिकं पश्यति त्रिविधं भोग्यं द्रष्टा साक्षिता तद्रूपतोऽनु
भूयते तदेहेऽहं तदेव तस्यामवस्थायां प्रतीयते इति स्वतरत्र न दृश्यते तस्यामवस्थायां नास्ति दृष्टा सर्वत्रानुगतस्याववस्तं तेनानुभूति
रनुभवः सर्वेषामस्ति तादृक् प्रसिद्धमेतदित्यर्थः॥ प्रतिस्थ्याचं प्रतियोऽप्यद्रष्टत्वात् इत्यादि वाक्यद्वयमर्थतः पठति॥ स पुनर्ने
तो कंचिन्न कामं न स्वप्नं भवेत्॥ हे द्विव पुण्यपापं चेत् सर्वं प्रकृतिपुद्गलिम इति॥ सञ्जाग्रता तत्र तस्यामवस्थायां यत्किंचि
द्भोग्यमीदृश्यते परस्पराते तेन दृष्टैवानन्यो गतो भवेदनुभवसम्मतो न भवेत् किंतु स्वयमेवावस्थायां न रंगच्छतीत्यर्थः पुण्य
पुण्यफलं सुखं पापं तत्फलं दुःखं दृष्टं वा नादत्येत्यर्थः भोक्तृत्वं विवेचनपराणि शास्त्राणि दर्शयन्ति॥ जाग्रत्स्व
प्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते॥ तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते॥ एक एवात्मा मंतव्यो जाग्रत्स्वप्नसुषुप्तिषु॥ स्था
नत्रयव्यतीतस्य पुनर्जन्म न विद्यते॥ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्॥ तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं
सदाशिवः॥ यत्स्वस्वज्ञानमात्रेण लक्षणं ब्रह्म साक्षिचिद्रूपेण अवस्थितं तज्जाग्रदादिप्रपंचं प्रकाशते प्रकाशयति॥ तद्ब्रह्माहमस्मि
न बुद्धिं चिदाभासमात्याहमस्मीति ज्ञात्वा श्रुत्यनुमानाभ्यां निश्चित्य सर्वप्रतिबंधैः प्रमातृत्वकर्तृत्वादिभिः प्रमुच्यते प्रकर्षे
ण सर्वात्मना मुच्यते॥ जाग्रदादित्रिष्ववस्थास्वेक एवात्मा मंतव्यः॥ एवं विवेकज्ञानेन स्थानत्रयव्यतीतस्यावस्थात्रयादिवि
लक्षणस्यात्मनः पुनर्जन्म न विद्यते एतच्छरीरपातानन्तरं शरीरान्तरप्राप्तिर्नास्तीत्यर्थः त्रिषु धामसु त्रिष्ववस्थानेषु यद्भोग्यं
स्थूलं विविक्तानंदरूपं यच्च भोक्ता विश्वतैजसप्राज्ञरूपो यश्च भोग तदनुभवरूपं भवतीति ये विदाते तेभ्यः स्थानादिभ्यो वि

छिन्ननासा वर्जितन्नात

ततो द्विक्किमित्यत आह। विविधयनाशां निश्चिन्तस्य पुनर्भोगं न वांछतीति॥ स्वविनाशानिमित्तये भोगेच्छा वेदस्तमाह॥ मुमुक्षुः शापि नो मु
मुक्षो विद्या हंवेति न वांछतीति किंच पूर्वनहं भोक्तेति व्यवहर्तुमपि लज्जते इत्याह॥ जिहेति व्यवहर्तुं भोक्तो नाहमिति पूर्ववत
छिन्ननासइव व्रीडितः किंस प्रारब्धमश्नुतइति॥ तर्हि ज्ञानोत्पत्त्यनंतरं प्रारब्धावसानपर्यंतं कथं व्यवहरतीत्याह॥ उत्पन्ने ज्ञाने लोकि
कियान्वेदानीमपिकर्मक्षीयतेइति केचिन्मन्वते प्रारब्धमश्नुते प्रारब्धकर्मफलं भुक्त इत्यर्थः इदानीं ज्ञानानन्तरं साक्षित्वेनाभोक्तृत्वे
भावः केमुतिकन्यायेन सिद्ध इत्यत आह॥ यदा स्वस्यापि भोक्तृत्वं मंतुं जिह्रेत्यसौ तदा॥ साक्षिण्यारोपयेदेतदिति केचिद्वक्तव्याव्येति
चिदाभासं स्वस्यापि भोक्तृत्वं मंतुमहं भोक्तेति ज्ञातुं जिहेतीति विलज्जते यदा तदा एतत्स्वगतं भोक्तृत्वं साक्षिन्यसंगे आरोप
येत् तदिति वार्ता कथा व्यर्थं श्रम्याकेवलं कामी स्पर्धः॥ उक्तमर्थं मास्पष्टं करोति॥ इत्यभिप्रेत्य भोक्तारं साक्षिपदवित्रां कथा
कस्यकामायेतीति श्रुतेरित्यर्थः कुद्दस्य चिदाभासस्य व्यापारमार्थिकं भोक्तृत्वं नाचभिप्रेत्यावित्रां कथां कारा
हित्ये भोक्तारं साक्षिपति निराकरोति जवबतेयं भोक्तृरातपःभोक्तृत्वादि इत्यन्यादृशीततः किमित्यत आह॥ कस्यकामायेति तत
तः शरीरानुज्वरानहीति॥ ज्वरो ज्वरनं संतापः तत्त्वविदः शरीरज्वराभावं दर्शयितुं शरीरभेदं तज्ज्वरस्वरूपं चदर्शय
ति स्थूलं सूक्ष्मं कारणं चेति शरीरं त्रिविधं स्थूलसूक्ष्मकारणरूपं त्रिविधोस्येव तस्य तत्रोदितज्वर इति॥ तत्र स्थूलशरीर
ज्वरोक्ता वदाह॥ वातपित्तश्लेष्मजन्या आध्यादयः कोटिशोस्मतो॥ दुर्गंधत्वकुरूपत्वदेहभंगादयस्तथेति॥ सूक्ष्मशरी
रज्वरं दर्शयति॥ कामक्रोधादयः शान्तिदांताद्यास्तिंगदेहगा इति शरीरादिना ज्ञानात्वादीनो घटन्ते स्वमुपपादयति॥ज्व

त्व तत्तो यच्चिन्मात्ररूपः साक्षी सदाशिवः निरतिशयानंदरूपत्वेन सर्वदा शोभमानः परमात्मास्ति सो
हमस्मीत्यर्थः एवं विवेकात्मतत्त्वे संगेनिप्रवितेसति भोक्तृत्वं कस्येत्यत आह ॥ एवं विवेचिते तत्त्वे
विज्ञानमयशब्दितः ॥ चिदाभासो विकारी यो भोक्तृत्वं तस्य शिष्यतइति ॥ यो विज्ञानमयशब्देनाभि
धीयमानः चिदाभासस्तस्य विकारित्वाद्भोक्तृत्वं मित्यर्थः ननु चिदाभासस्य भोक्तृत्वांगीकारे कस्य कामा
येति वचो भोक्तृभावविवक्षयेति पूर्वोक्तं व्याहन्येतेत्याशंक्य तत्स्ववचनस्य पारमार्थिकभोक्तृभावपरत्वम
भिप्रेत्य भोक्तुः चिदाभासस्य मिथ्यात्वं साधयति ॥ मायिकोयं चिदाभासः श्रुतेरनुभवादपीति ॥ अयं चिदा
भासो मायिको मायाकल्पितः कथं श्रुतेः जीवेशावाभासेन करोतीति श्रुतेरनुभवादपि इन्द्रजालादित्रितयमध्यव
र्तित्वेनानुभूयमानत्वादपीत्यर्थः तदेवोपपादयति ॥ इन्द्रजालं जगत्प्रोक्तं तदंतःपातित्वतोयं यतइति ॥ इन्द्र
जालवन्मिथ्याभूते जगत्यंतर्भूतत्वात्तस्यापि मिथ्यात्वं तद्वदनुभूयते विद्वद्भिरितिशेषः यस्माज्ज
गदंतःपातीत्यतो मृषेति येजगतः मायाकृतं जगत् इन्द्रजालवदनुभवादपि मृषात्वमित्याह ॥ विलयोस्य
सुषुप्त्यादौ साक्षिणा समनुभूयतइति ॥ मूर्छादित्वादौ नश्वरः भवतु मृषात्वं ततः किमित्यत आह
विविच्य नाशं ॥ एतादृशस्वस्वभावं विविच्य नाशं किं पुनः पुनरिति ॥ यदा कूटस्थाद्विवेचितश्चिदाभासो
मायिको जातस्तदा स्वस्वभावं स्वनश्वरत्वमेतादृशं नाशं पालकं पुनर्विविच्य नाशं किं कूटस्थाद्विविच्य जानाति

यदा चिदाभासेऽपि ज्वरानस्मभात्वं तेतदा नसाक्षिण्यं संभवतीति किं वक्तव्यमिति भावः। ननु तर्हि अहं ज्वरामीत्यनुभवस्य का गतिरित्यत आह॥ ए-
वमप्येकतां मेने चिदाभासो ह्यविद्ययेति॥ एकतां मेने इति संक्षेपः। एतत्क्रमेणैव प्रपंचयति। साक्षिसत्यत्वमध्यस्य स्वेनोपेते वपुस्त्र-
ये॥ तत्सर्वं वास्तवं स्वस्वरूपमित्यभिमन्यत इति। चिदाभासः स्वेन सहिते शरीरत्रये साक्षिगतं सत्यत्वमध्यस्य तत्सर्वं ज्वरव-
च्छरीरत्रयं स्वस्वरूपं वास्तवं रूपमिति मन्यत इत्यर्थः। एवं भ्रान्तिज्ञाने सति किं भवतीत्यत आह॥ एतस्मिन्भ्रान्तिकालेऽयं शरीरेषु ज्व-
रस्तथा॥ स्वयमेव ज्वरामीति मन्यते हान्ति॥ अयं चिदाभासोऽस्यां भ्रान्तिवेलायां शरीरनिष्ठं ज्वरं स्वात्मन्यारोपयतीत्यर्थः:
तत्र दृष्टान्तमाह। कुटुंबिवदिति। दृष्टान्तं विशदयति॥ पुत्रदारेषु तप्यत्सु तप्यामीति यथाव्यथा॥ मन्यते पुरुषस्तद्वच्चि-
दाभासोऽभिमन्यते। एवमविवेकदशायां चिदाभासे भ्रान्त्या ज्वरं प्रदर्श्य विवेकदशायां तदभावं दर्शयति। विविच्य भ्रान्तिमुक्ति-
त्या स्वमप्यागताय सदा॥ चिंतयन्साक्षिणं कस्माच्छरीरमनुसंज्वरेदिति॥ चिदाभासः कूटस्थं स्वमात्मानं सशरीराणि च
विविच्य भेदेन ज्ञात्वा इदं सर्वं मम वास्तवं रूपमिति मन्यत इत्युक्तां भ्रान्तिं परित्यज्य स्वस्य चिदाभासत्वरूपज्ञानेन स्वस्मिन्नध्याद-
रमकुर्वन्स्वस्य निजरूपं ज्वरादिरहितं साक्षिणं सदा चिंतयन्नकस्मात्तच्छरीरमनुसंज्वरेदिति ज्वरवच्छरीरमनुसृत्य स्वयं
कस्माज्ज्वरेदित्यर्थः। भ्रान्तज्ञानतत्त्वज्ञानयोर्वैरनदभावे कारणत्वं दृष्टान्तप्रदर्शनेन स्पष्टयति। अयथावस्तुसर्पादिज्ञानं
हेतुः पलायने यथा रज्जुज्ञाने हि धीर्ध्वस्ते कृतमप्यनुशोचतीति॥ रज्ज्वादौ कल्पितस्य सर्पादेर्ज्ञानं पलायने कारणं भवति
तस्मादिशावधेन स्यात्कल्पितसर्पो रोगहते रज्ज्वादिज्ञाने न सर्पादिबुद्धिनिवृत्तौ कृतमपि पलायनमनुशोचति यथा कृतं मया
इत्यनुतप्यत इत्यर्थः। साक्षितां सदा चिन्तयन्नित्युक्तं दृष्टान्तेन स्पष्टयति॥ मिथ्याभियोगे दोषस्य प्रायश्चित्तत्वसिद्धये॥ यथाप

राहुद्वेषयोरपि बाधकत्वेन प्राप्याप्राप्य नरकं क्रमादाहुरिति॥ द्वयोरपि द्विविधा अपि क्रमेणाप्राप्यप्राप्तिभ्यां नरकं बाधं गो
ते ज्वरस्साम्यात् ज्वरा इत्युच्यन्त इत्यर्थः कारणशरीरगतो ज्वरः कं दोगमकृतावुक्तस्ता हा स्वं परं च न वे त्वे
त्सि तत्त्वाविनष्टश्च कारणात् आगामिदुःखबीजं चेत्येतदिन्द्रियाणां दृष्टौ तमिति॥ नहि स्वब्धयमेव संस्मृतात्मानं ज्ञा
नात्ययमहमस्मीति न चैमानि भूतानि विनाशमेवापीनो भवन्ति नाहं भ्रमन्त्रभोग्यं च परस्परापि भीति वाक्येन स्वपरज्ञानम
भावमज्ञानेन नष्टप्रायत्वं परेद्युरागामिदुःखबीजवासनासद्भावं चेद्रुणाति श्रोत्रेण गुरोः प्रजापतेः पुरतो निवे
दितमित्यर्थः एवं त्रिष्वपि देहेषु ज्वरानभिधाय तेषामपरिहार्यत्वमाह॥ एते ज्वराः शरीरेषु त्रिषु स्वाभाविका
भवताइति॥ त्रिष्वपि शरीरेषु प्रतीयमाना एते ज्वराः शरीरैः सहोत्पन्नत्वेन स्वाभाविकाः सम्मताः स्वाभाविकत्वं व्य
तिरेकमुखेन द्रढयति॥ वियोगेन तु ज्वरैस्तानि शरीराण्येव न भवन्तीति॥ यतः कारणादिभिर्ज्वरैस्तैर्बाह्याः शरीराणि वियोगि
तानि शरीराणि नाम तेऽपि न भवन्ति, अतः स्वाभाविकोऽयमित्यर्थः तत्र दृष्टान्तमाह॥ तन्तोर्विना पटो वा
लेभ्यः कम्बलो यथा॥ मृदो घटस्तथा देहो ज्वरेभ्योऽपि तिष्ठतामिति॥ इदानीं तु कस्य ज्वराभावे कैमुतिकन्यायेन द
र्शयितुं चिदाभासे तावज्ज्वराभावं दर्शयति॥ चिदाभासस्य तु कोऽपि ज्वरो नास्तीति श्रुतिः॥ चिदाभासस्य तु शरीर
त्रयगतज्वरसंबन्धमंतरेण कोऽपि ज्वरो न विद्यत इत्यत आह॥ यतः चितः प्रकाशैकस्वभावत्वमेव दृष्टं न चेत
रदिति॥ चितः स्वप्रकाशैकस्वाभाव्यस्य विद्वदनुभवसिद्धत्वात्प्रतिबिम्बस्यापि चिदाभासस्य तथात्वमेष्टव्य
मिति भावः यद्यपि चिदाभासे ज्वराभाव उपपादितस्तदिदानीं दर्शयति॥ चिदाभासे पसंभाव्या ज्वराः साक्षिणि कथं ति

यत्रिवात्मात्मानं साक्षितां ईश्वरतां गत इति॥ यथा लोके मिथ्यानियोगकर्तारं दोषस्य प्रायश्चित्तं मिथ्यार्थं मिथ्यानियोग
युक्तं पुनः पुनः समापयति तथा यश्चिदाभासोपि साक्षित्वमंशं गात्र नि भोक्तृत्वाद्यारोपलक्षणं तां मिथ्यानियोगदो
षप्रायश्चित्तार्थं साक्षितामात्मानं समापयन्निव ईश्वरतां गतः तत्रैव दृष्टान्तमाह॥ आवर्त्यापापानुसन्धेयस्ताना
वावर्त्तते यथा आवर्त्तयन्निव ध्यानं सदा साक्षिपरायणः इति॥ यथा पापकारिणा पुरुषेणोद्धृत्या पाप
नुसन्धेयम् अस्य तत्पापनोदं यद्विहितं स्नानादिकं प्रायश्चित्तं समावर्त्यते पुनः पुनरनुष्ठीयते तथायमपि चिर
साक्षित्वं संसारित्वारोपजदोषपरिहाराय ध्यानं परिवर्त्तयन्निव सदा साक्षिपरायणो भवति एवं साक्षिपर
त्वे दृष्टान्तरूपं वर्त्यस्वगुणप्रख्याने निर्लज्जत्वे सदृष्टान्तमाह॥ नृपस्य कुलिनी वेश्या विलासेषु विलज्जिता॥ जा
न तां गेहे तथाभासः स्वप्रख्याते विलज्जत इति॥ इदानीं शरीरत्रयादिविवेचितस्य चिदाभासस्य पुनः संस्कारैः सह तादा
त्म्यभ्रमाभावे दृष्टान्तमाह॥ गृहीतो ब्राह्मणो म्लेच्छैः प्रायश्चित्तं चरन्पुनः म्लेच्छैः संकीर्यते नैव तथाभासः शरी
रकैरिति॥ न केवलं स्वापराधनिवृत्तये साक्ष्यनुसरणं किंतु महत्त्वे अजनसिद्ध्यर्थमपीति सिंहावलोकितन्यायेन सदृष्टान्त
माह॥ यौवराज्ये स्थितो राजपुत्रः साम्राज्यवाञ्छया॥ राजानुकारी भवति तथा साक्ष्यनुकार्ययमिति॥ राजानुकारी भव
ति राजेव प्रजारंजनादिगुणवान् भवतीत्यर्थः ननु युवराजस्य राजानुसरणे साम्राज्यफलं दृश्यते मैवं साक्ष्यनु
सरणे प्रत्युत तदनुसरणे कथं प्रवर्त्तत इत्याशंक्याह॥ यो ब्रह्मवेद ब्रह्मैव भवत्येष इति श्रुतिः॥ श्रुत्वा तदैकाग्र
तेः सच्चिदात्मब्रह्मवेत्ता न चेतरदिति॥ स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति तरति शोकं तरति

पाप्मानं गुणांश्च ग्रन्थिभ्यो विमुक्तोऽमृतो भवतीति श्रुतौ ब्रह्मज्ञानादिरूपस्य फलस्य श्रूयमानत्वात् तत्फलकांक्षया साधनानुसरणे प्रवर्तनं
युक्तमित्यर्थः॥ ननु ब्रह्मज्ञानेन ब्रह्मभावप्राप्तौ चिदाभासत्वमेव विनश्यति अतः स्वनाशाय कथं प्रवर्तते इत्याशंक्याह॥ वेदत्त्व
कामा स्वग्न्यादौ प्रविशन्ति यथा तथा॥ साक्षित्वेनावशेषाय स्वविनाशं स्वयं वाञ्छतीति॥ यथा लोके देवत्वप्राप्तिका
मा [illegible] भृग्वग्निप्रयागगंगाप्रवेशादौ प्रवर्तन्ते एवं सादिरूपेणावस्थानलक्षणस्याधिकफलस्य विद्यमानत्वा
च्चिदाभासस्यापगहे तौ ब्रह्मज्ञानेऽपि प्रवृत्तिरेव घटत इत्यर्थः॥ ननु तत्त्वज्ञानेनाभासत्वमेव गच्छति चेत्कथं तत्त्वविदां जीवत्वव्यवहार इ
त्याशंक्य प्रारब्धदेहपर्यन्तं तदुपपत्तिं सदृष्टान्तमाह॥ यावत्स्वदेहदाहं स नरत्वं नैव मुञ्चति॥ एवं प्रारब्धदेहस्यान्ताभासत्वबि
मोचनमिति॥ यथाग्न्यादौ प्रविष्टः पुरुषो दाहादिना स्वदेहनाशपर्यन्तं नरदेहव्यवहारयोग्यत्वं नैव मुंचति एवं प्रारब्धकर्म
क्षयपर्यन्तं चिदाभासव्यवहारो न निवर्तत इत्यर्थः॥ ननु भोक्तृत्वादिभ्रमोपादानस्याज्ञानस्य निवृत्तत्वात् पुनः कथं भोगानुवृत्तिः क
थं वा मर्त्योऽहमिति विपरीतप्रतीतिरित्याशंक्य दृष्टान्तप्रदर्शनेन एतत्सर्वं संभावयति॥ रज्जुज्ञानेऽपि कम्पादिः शनैरेवोपशा
म्यति॥ पुनर्मन्ददृशिकारेऽपि सरज्जुः स्यात् रगीभवेदिति॥ दार्ष्टान्तिके योजयति॥ एवमारब्धभोगोऽपि शनैः शाम्यति नो हठात्॥ भोग
काले कदाचित्तु मर्त्योऽहमिति भासते इति ननु पुनर्मर्त्यत्वबुद्ध्युदये तेन तत्त्वज्ञानं बाध्येतेत्याशंक्याह॥ नैतावता पराधेन तत्त्वज्ञानं विन
श्यति॥ कदाचिद्देहं मर्त्य इत्येवंविधज्ञानोदयमात्रेण आगमप्रमाणजनितं तत्त्वज्ञानं न बाध्यते कुत इत्यत आह॥ जीवन्मुक्तिव्रतं ने
दं किन्तु वस्तुस्थितिः खल्विति॥ एवं मर्त्यबुद्ध्यपाकरणलक्षणं जीवन्मुक्तिव्रतं नियमेनाश्रयं न भवति किंतु सम्यक्
ज्ञानेन भ्रान्तिज्ञाननिवृत्तिरित्ययं वस्तुस्वभावः कदाचिन्मर्त्यत्वबुद्ध्युदयेऽपि पुनस्तत्त्वज्ञानान्तरेण तस्या एव बाध्यत्वमिति

भावः कदाचिन्मर्त्यत्वबुद्ध्युदयेऽपि पुनस्तत्त्वज्ञानांतरेण तस्माद् एव बाध्यत्वमिति भावः भवतु एवमपि इत्यादि स्यान्नेविपरीतज्ञानानिव

तावपि तत्कार्यकं पाद्यनुवृत्तिः प्रवृत्तिर्दृश्यते दशमे दशमस्त्वमसीति वाक्यविचारजन्यज्ञानेन भ्रमनिवृत्तौ तत्कार्या

नुवृत्तिर्नोपलभ्यत इत्याशंक्याह ॥ दशमे पशिरस्ताडनं दशकंदनादुःख्यानशोर्दृश्यति ॥ शिरोव्रणकामाने नवभिः श्रास्यति ।

नोतदेव दशमोऽसीति ज्ञानोदये सति शिरस्ताडनपूर्वकरोदनमात्रं निवर्तते ताडनजन्यव्रणस्तु अनुवर्तत एव ।

तथैव न नुज्ञानोत्तरकाले संसारानुवृत्तौ मुक्तेः कुतः पुरुषार्थतेत्याशंक्याह ॥ मुक्तिलाभजन्यसुखस्य तद्दुःखा

दर्कत्वात्पुरुषार्थतेति दृष्टान्तपूर्वकमाह ॥ दशमामृतलाभेन ज्ञानतो हर्षो व्रणव्यथा ॥ तिरोधत्ते मुक्तिलाभसु

खं प्रारब्धदुःखितामिति ॥ जीवन्मुक्तिसुखं नैर्दृश्यमित्युक्तं तत्र व्रतत्वाभावे किमाधेयातमित्यत आह ॥ व्रताभावाच्च

व्यसनस्तदोभूयो विविच्यतामिति ॥ पुनर्विचारं करतो दृश्यतत्साहार सप्तेवी दिनेनर्तके भूयो भूयो मध्या तयेति

यथारससेवीन एकस्मिन्नेव दिने तु बाधापरिहाराय पुनः पुनर्भुंक्ते तद्वद्ध्यासनिरत्यये पुनः पुनः विवेकः क्रिय

तामित्यर्थः ज्ञानेनानिवर्तस्य प्रारब्धकर्मफलस्य केन तर्हि निवृत्तिरित्याशंक्याह ॥ प्रारब्धस्य भोगपथेनेव

भोगेनैव निवृत्तिरित्याह ॥ प्रारब्धभोगेनायं दशमः स्वव्रणं तथा भोगेन शमयित्वैतत्प्रारब्धं त्वनुच्यते

तथेति ॥ अपरोक्षज्ञानशोकनिवृत्त्याख्यं ते ये भे इमे जीवगे भूतं ज्ञानं चेदिति अप्तिदिति अनेनभो केन आ

त्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥ किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेदिति ॥ अस्मिन्मंत्रे परोक्षज्ञान

शोकनिवृत्त्याख्यजीवावस्थयद्वयं विहितं दूरस्थं इदानीं तदभिधानसूचितां जीवस्य सप्तमीं तृप्तिलक्षणां अवस्था

तत्स्यानुकीर्तनपूर्वकं वक्तुमारभते॥ किमिच्छन्निति वा कोऽत्र निःशोकमोहादिरत्र दोषं तरति॥ किमिच्छन्नितु कस्यार्थेनाभिदृ
तो यः शोकमोहादः स एतावतामं य संदर्शितो दीरितप्रभिहितः अज्ञानमावृत्तिस्तद्वदितो पञ्चपरोक्षो धीः अपरोक्षमतिः
शोकमोहादृत्तिर्निरंकुशात्तनेनंश्यो केनाभिहिता सु सत्पमङ्गा वा कस्यासु वजीमाहा आत्मा स सप्तवस्थे बाबरी तदित्युस
त्पमीतिप सत्पमी व्याख्यायते इष्ट॥ शोवः अपरोक्षज्ञानजन्यायः वृत्तेर्निरंकुशत्व प्रतियोगि प्रदर्शनपुरःसरं प्रतिजानीते॥
सांकुशा विषयेस्तत्त्विरियं तन्निर्निरंकुशापि॥ विषयता मन्याया सत्त्वे दर्शयां तत्र का मनया कुंठितत्वात्सांकुशात्वमस्या
स्त तदभावान्निरंकुशात्वं तदेव दर्शयति ऐहिकेति॥ ऐहिका मुष्मिकव्रात सिद्ध्यै मुक्तेश्च सिद्धये॥ बहु कृत्यं पुरास्याभू
त् सर्वं मधुना कृतमिति॥ अस्य विदुषस्तत्त्वज्ञानोदयात्पूर्वमिहलोके इष्टप्राप्तये अनिष्टनिवृत्तये कृषिवाणिज्यादिकं स्वर्गा
दिसिद्धये यागयोगोपासनादिकं मोक्षसाधनज्ञानसिद्धये श्रवणादिकं चेति बहुविध कर्तव्यमासीदिदानीं सांसारिकफले
च्छाभावाद्बुलाने दृष्ट्वा तस्य सिद्धत्वाच्चैतत्सर्वं बहुविधमवणादिकं कृतप्रायमभूदित्यतः पञ्चमनुष्ठेयाभावादित्यर्थः
एवं कृतकृत्यत्वं प्रतिपाद्य तत्संतनम् तातप्तिं दर्शयति॥ तदेतत्कृतकृत्यत्वं प्रतियोगि पुरःसरं॥ अनुसंदधदेवायमेवं तृ
प्यति नित्यशइति प्रतियोगिपुरःसरं प्रतियोग्यनुसंधानपूर्वकं यथा भवति तथा एव वक्ष्यमाणप्रकारेण सर्वदा तृप्यति तदेवानुसंधानं प्र
पंचयति॥ दुःखिनो ज्ञा दिना कृतकृत्यत्वात्ततः॥ प्राप्तप्राप्यतया पुनः तृप्यं तेन प्रकारेण नगं यन्ने तत्र तावदैहिकामुष्मिकसौवे
ल दाख्यं स्वस्य दर्शयति॥ दुःखिनोऽज्ञाः संसरन्तु कामं पुत्राद्यपेक्षया॥ परमानन्दपूर्णोऽहं संसरामि किमिच्छया॥ स्वर्गाद्यर्थं का
मानुष्ठातृणां वैलक्षण्यमाह॥ अनुतिष्ठन्तु कर्माणि परलोकयियासवः॥ सर्वलोकात्मकः कस्मादनुतिष्ठामि किंका

ननु स्वार्थप्रवृत्त्यभावेऽपि परार्थप्रवृत्तः किं न स्यादित्यात्रं काधिकाराभावात्सापि नास्तीत्याह॥ व्याचष्टे तान्ते
ग्राह्यस्त्राप्ति वेदानध्यापयन्तु वा माये वाधिकारित्वेमेतु नाधिकारो क्रियत्वत इति॥ ननु स्वदेहनिर्वाहार्थं
भिक्षाहरणादिकं परलोकार्थं स्नानादिकं च भवता क्रियमाणमुपलभ्यते तो निर्वाहार्थं क्रियत्वमस्ति
मित्याशंक्य तदपि स्वदृष्ट्या नैवास्ति किंत्वन्यैरेव कल्पितमित्याह॥ भिक्षादिकमानन्द्रोऽचेन्नैकोऽमिनकर्शमचा॥ दूराद्
ऽपि तेऽन्यथयन्ति किं मम स्यात् मकल्पनादि॥ अन्यकल्पनयापि बाधोऽस्तीत्याशंक्य तदभावे दृष्टान्तमाह॥ गुंजापुंजादि दह्यते नान्यारोपि
तवह्निनानान्यारोपितसंसारधर्मैर्न वमहं भजे इति॥ ननु फलाभावेऽकर्तव्यमवेक्ष्य मानुष्ठानमास्तु तत्र सा चात्मरूपाय स्वस्वतादि
कर्तव्यमवेक्ष्यत्वात् अज्ञानाद्यभावाच्च भावाद् कुर्वतादिकर्तृत्वमपि नास्तीत्याह॥ स्पृशंत्वज्ञाततत्त्वास्ते जानन्तः कस्मात्कुर्वतामहं॥ मन्ये
तासहत्रासापन्नानमनमन्ये संसारायइति॥ अज्ञाततत्त्वा अज्ञाततत्त्वास्ते लोके कर्तव्यत्वेन दृष्टास्ते तत्त्वेऽस्तेन तथाभूताः श्रवणादिकं कुर्वन्तु तत्त्वमि
त्यमयावेत्ति सशयवन्तो मननं कुर्वन्तु ममतु तदभावान्नो॥ यत्र प्रवृत्तिरित्यर्थः॥ मा मूलाश्रवणं मननं नेविपर्ययवशा
त्सास्यार्थ निदिध्यासनं कर्तव्यमित्याशंक्य देहादावात्मबुद्धिलक्षणस्य विपर्ययस्याभावात्तदपि नानुष्ठेयमित्याह॥ विप
र्यस्तो निदिध्यासीत किं ध्यानमविपर्ययो॥ देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहमिति॥ ननु पर्यायाभावे हं मनुष्य इति
व्यवहारः कथं घटत इत्याशंक्य वासनामात्रादुद्भवतीत्याह॥ अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुं विपर्यासं चिरा
भ्यस्तवासनातोऽवकल्प्यत इति॥ तर्हि सम्यग्वस्तानिवृत्तिसिद्धये ध्यानं संपाद्यमित्याशंक्य प्रारब्धक्षयमंतरेण
स्यनिवृत्तेर्नास्तीत्याह॥ प्रारब्धे कर्मणि क्षीणे व्यवहारो निवर्तते॥ कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतइति॥ ननु
प्रारब्धस्यापि व्यवहारस्य विरलत्वाय ध्यानेन कर्तव्यमेवेत्याशंक्य व्यवहारस्याबाधकत्वस्य दर्शनात्तन्निवेदनाय न ध्या

नेमनुद्वेषमित्याह ॥ विरक्तत्वं यद्गतं दृष्टं चेद्दुःखं न मन्यते ॥ अत्र बाधिका वीवदन्ति परस्परं ध्यायाम्यहं कुत इति ॥ ध्यानस्याकर्तृत्वात्तेषि वि
क्षेपपरिहाराय समाधिः कर्तव्य इत्याशंक्य चित्तविक्षेपसमाधानयोः मनोधर्मत्वात्तद्विक्षेपनिवारकेपि समाधौ ममाधिकार इत्याह
विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम ॥ विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिण इति ॥ ननु समाधिफलानुभवः संपा
दनीय इत्याशंक्य न स्यमन्यस्वरूपत्वान्न संपाद्य इत्यत आह ॥ नित्यानुभवरूपस्य को मेत्रानुभवः पृथगिति ॥ उपपादनेन
कृतकृत्यत्वं निगमयति ॥ कृतं कृत्यं प्राप्यं प्राप्तमित्येवानिच्छया पश्यति एवं सर्वत्र कृतकृत्यत्वान्नमुपगमे नि
त्ति यन लव व लव प्रसज्येत इत्याशंक्य प्रारब्धसंस्कारात् [illegible] तद्वत्तमेवीकरोति ॥ व्यवहारो लौकिको वा शास्त्रीयो वान्यथा
वि वा ॥ [illegible] लौकिको [illegible] ॥ शास्त्रीयो जपसमाध्यादिरन्यथावि वा प्रवृत्तिविहिंसादिर्वा
व्यवहारः कर्तव्यो [illegible] रहितस्य मम प्रारब्धकर्मातिक्रम्य प्रवर्तनामित्यर्थः ॥ [illegible] एवं वस्तुतत्त्वमभिधाय बौद्धिवादेनाह [illegible]
तस्मात् [illegible] यतो व मार्गेण वर्तेचे [illegible] मम सतिरिति ॥ लौकानुग्रहकार्यया [illegible] कयेत्यर्थः ॥ शास्त्रीय एव
प्र मार्गेवि [illegible] गीकारेत [illegible] तदभिमानप्रयुक्तोहंकारः स्यादेवेत्याशंक्याह ॥ देवार्चनेत्यादिना [illegible] येन [illegible] स्नानशौचभिक्षादौ वर्तता
वपुः ॥ तारं जपतु वाक्तद्वत् पठत्वाम्नायमस्तकं ॥ विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानंदे विलीयतां ॥ साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि
कारये इति वा [illegible] ॥ तारं प्रणवमाम्नायमस्तकं वेदान्तशास्त्रं फलितमाह ॥ एवं च कलहः कुतः संभवेत् कर्मिणो मम ॥ विभिन्न
विषयत्वेपि पूर्वापरसमुद्रवदिति ॥ विभिन्नविषयत्वमेव स्पष्टयति ॥ वपुर्वागादयो बुद्धिश्च कर्मणो न तु साक्षिणो विना भिनः
मा [illegible] निर्दिष्योनेतरस्त्व हीति ॥ अथापि ये ज्ञानिकर्मिणो कलहं कुर्वीतेत्तौ वि बुद्धिः परिहसनीया इत्याह ॥
एवं बौद्धिल्योन्यस्यवलो [illegible] बधिराविव ॥ विवदेतां बुद्धिमन्तो हसन्त्येव विलोक्यतामविति ॥ कुतः परिहासत्वमित्या
शंक्य निर्विषयकलकारित्वादित्याह ॥ यं कर्मी न विजानाति साक्षितांमि तस्य तत्त्ववित् ॥ ब्रह्मतत्त्वं बुध्यतां तत्र कर्मिणाः

किं विहीयत इति ॥ कर्मीयं साक्षित्वं कर्मानुष्ठानोपयोगदेहवाग्बुद्ध्यादिकं आत्मगात्मानं न विजानाति तद्बोधवतान
स्यब्रह्मत्वे बुद्धे कर्मितः कर्मानुष्ठाने किं विहीयते । देहवाग्बुद्ध्यस्यकाज्ञानिनान्तरबुद्धितः ॥ कर्मीप्रवर्त्तयि
त्वाभिज्ञानिनाहीयते त्राविभिति दृग मिनाद मिथ्यात्वबुद्ध्यापरित्यक्तानि देहवाग्बुद्धिभिः कर्मानुष्ठाने ज्ञानि
नो वा किं हीयते प्रतीतिर्विषयकत्वेकिरितोपरस्सनीयाव स्यर्थः कर्मानुष्ठाने प्रयोजनमस्मताज्ञानिनोस्युप
गम्यते इत्याशंक्याह ॥ प्रवृत्तिर्नोपयुक्ता चेदिति उपयोगाभावो निवृत्तावपि समान इति यदि रुम्मता निवृत्तिर्नोपयुज्यते
इति निवृत्तेर्बोधहेतुत्वान्नापयोगाभाव इति शंक्यते ॥ बोधहेतुर्निवृत्तिश्चेदिति ॥ तर्हि प्रवृत्तिरपि बुभुत्साहेतु
त्वादुपयोगवतीत्याह ॥ बुभुत्सायां तत्र तत्रेति ॥ ननु बुद्धस्य बुभुत्साभावात्प्रवृत्तेरनुपयोगित्वमिति पुनः
शंक्यते । बुद्धश्चेन्न बुभुत्सेत पतर्हि बुद्धस्य पुनर्बोधाभावात्तद्धेतुर्निवृत्तिरपि बुद्धस्य न्यनुपयोज
नीत्याह ॥ नाम्नरे बुद्धान्ते पुनर्विचि ॥ सकृज्जातस्य बोधस्य स्थिरत्वाय निवृत्तिरपेक्ष्यत इत्याशंक्य । स्थिरत्वं बाधका
भावमपेक्षते न साधनान्तरमाह ॥ अबाधादनुवर्त्तेत बोधोन्यन्नसाधनादिति ॥ वास्तवप्रमाता ज्ञान
स्य ज्ञानत्वेन तात्प्रमाणेन बाधकाभावादनुवृत्तिः स्यादेवातः न साधनान्तरं तदर्थमनुपेयमित्यर्थः ननु प्र
मातॄणां तरितां बाधाभावे प्रविद्यया तत्कार्यता कर्तृत्वासेव वा बाधः स्यादित्याशंक्याह ॥ नावि
द्यानापितत्कार्यं बोद्धुं बाधितुमर्हतीति ॥ तत्र हेतुमाह ॥ पुरैव तत्त्वबोधेन बाधिते ते उभे यत इति ॥ नच

विद्याप्यबाधितत्वेपि तत्कार्यस्य प्रतीयमानस्य बाधितत्वात्संभवत्येवेन बोधस्य बाधो भवेदित्याशंक्योपादाननिवृत्तौ च तस्यापि
बाधितत्वान्न तेनापि बोधः शंकितुं शक्य इत्याह ॥ बोधितं दृश्यसत्तां भक्षेस्तेन बाधो न शक्यत इति ॥ तत्र दृष्टान्तमाह ॥ जी
वन्नाखुर्न मार्जारं हन्ति हन्यात्कथं मृतः ॥ आखुर्मूषकः ॥ द्वैतदर्शनेन न तत्त्वबोधस्य बाधाभावं कैमुतिकन्यायस्र
र्मेन द्रढयितुं तदनु के दृष्टान्तमाह ॥ अपि पक्वपतास्त्रेणाविद्धोपि न ममार चेत्पनिष्के षु वितु नागो नं दृष्टीत्वत्रूका
प्रमेति ॥ यः सम्यर्थः पाशुपतास्त्रेण विद्धोपि न ममार यश्चेत्किल्नसः निष्फलेषु वितु नागः शल्यरहितेनेषुणा
माम्यत इत्यहः सत्त्वं दृष्टीत्यपि नाशं प्राप्स्यतीत्यत्र का प्रमा किंच नात्तं नास्तीत्यर्थः ॥ दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति
॥ आरादावविद्यया चित्रैः स्वकार्यैर्भ्रमानया ॥ युद्ध्वा बोधो जये लोदामुदृष्टो बाध्यतां कथमिति ॥ आदौ विद्याभ्यामसमय
चित्रैर्बहुविधैस्तत्कार्यैः प्रमातृत्वभोक्तृत्वकर्तृत्वादिभिः सह भ्रमणया यावि चित्रधर्मानया विद्यया बोधो युध्वा युद्धं
कृत्वा तामजयत्स एवाभ्यासपाटवेन सुदृढोपि इदानीमविद्यायां निरस्तौ सत्यां निर्मूलत्वेन तत्कार्येण कथं बाध्यतां
न कथमपि बाध्यत इत्यर्थः ॥ उपपादितमर्थं श्लो न बुद्ध्वारोहाय रूपकेण ह ॥ निदृष्टत्वशनतत्काथ यन्त्राबाधो बो
धेन मारितास्तासु महानिर्बोधसंग्रामः कीर्तिः प्रसूतस्तस्यत इति ॥ भवतु लब्धे प्ररूढ तेकिमायातामित्यत आह ॥ य एवमतिश्र
रेण बोधेन न वियुज्यते ॥ प्रवृत्या वा निवृत्या वा देहादिगतयास्य कि ॥ यः पुमानेवमुक्तप्रकारेणातिशूरेण विद्यात
त्का या या तिरेकेण बोधेन ब्रह्मसात्मैकत्वेन ज्ञानेन न वियुज्यते न कदापि वियुक्तो भवति तस्य पुंसो देहादिनिष्ठया प्रवृत्त्या

नो

वनिवृत्तावा किंतु किमपीष्टमनिष्टं चेत्यर्थः॥ तदुक्तं ज्ञानिविदत्ता निर्विश्चवत्ताव्या ग्रहोनयुक्त इत्यात्रं कालं॥ प्रवर्तमाना महो स्वाचो वो
धहीनस्य सर्वथ्यैदिश॥ तत्रोपपत्ति माह॥ ऋकर्माय वाप॥ वर्गाय सजितं काया निर्यतद्दत्तिश्च दुष्या मा महोन युक्तं इत्यु क्तं त
र्हि कर्मिणां मध्ये वर्तमानेन तेन किं कर्तव्यमित्यत आह॥ न विद्वान्स्त्वेवं तत्त्वो मध्येवर्तितोप्येतदनुरोधिनः का येन
मनसा वाचा कर्मणेवैवासिद्धाः क्रिया इति॥ विद्वांस्तु कर्माकर्मिणां मध्ये तिष्ठन्स्वेच्छदनुरोधतः ते वा मनु सर लो शरी
रादिभिः सर्वाः क्रियाः कर्तव्येव ताः कर्मिणां ज्ञानिनां वा रयेदित्यर्थः तस्यैव तत्त्वबुद्धेस्तस्य नां मध्ये स्थितस्य स्तत्य माह॥ एव
मध्ये बुद्धेस्तु नां यस्यति ष्टे तदा पुनः॥ बोधाय वा किंपास वीद्दृष्यस्य बुद्धं स्वयमिति॥ एवं विद्वान् बुद्धेस्तूनां मध्ये
यदा तिष्ठेत् तदा पापाबुद्धेस्तूनां बोधाय तत्त्वज्ञानजननाय ताः क्रिया दूषयेत्स्वयमपि सजतु कुर्यात एवं कर्तव्यमि
त्यत आह॥ अविद्वदनुसारेण वर्त्ति बुद्धस्य युज्यते इति॥ अज्ञाम्यनुसारेण ज्ञानिनो वर्त्तनमुचितं तेषां वा मूल
त्वात्तेषामनुकंपनीयत्वाच्चेति भावः पूर्वं कृत्वं ऋषिमित्यत आह॥ स्तनंधयानुसारेण वर्त्तते तत्पिता तावृत्तमिति
स्तनंधयास्तपानकर्त्ता रः शिशुर्बालः इत्यर्थः पिता स्तनंधयानुसारित्वमेव दर्शयति॥ अज्ञापितो हस्सा दिलोवा वा
ले सपितानदा॥ न किं स्यातिनकिं ब्यूहकं बालं श्रुत्वा लालयेदिति॥ शापं स्मृति के या ज्ञा यति॥ निदितः स्तूयमानो वा
विद्वान्नदैन्ये निदति॥ न च स्तौति किं तु तेषां यथा बोधस्तथा चरेदिति॥ विद्वान्नदैन्ये निंदितः स्तूयमानो वा
स्वयं न निंदति न स्तौति किंतु तेषामज्ञानिनां यथा बोधः उपजायते तथैव स्वाचरेदित्यर्थः एवमाचरणे
निमित्तमाह॥ येनायं चरणेनात्र बुध्यते कार्यमेव ननु इति॥ अथ यस्मान्नीजनात्रास्मिंल्लोके विद्वान् यो येन

यादृशेन नटेनाचरणेन बध्यते तत्त्वमवगच्छति तत्तेन कर्त्तव्यमेवगच्छति न हि तद्देवकार्यान्तरमपेक्ष्यत इत्येतत्प्राह ॥ अत्र तत्त्वबोधान्नै
त्रैवाप्यकार्यमस्मात्र तद्व्युदस्तिमथ तस्मात् हृदस्तल्लविवृद्धत्वलोके अत्र तत्त्वबोधादन्यत्कर्त्तव्यं नैवास्ति ततस्तदनुस्मरणेन तत्त्वबोधः
कर्त्तव्य इत्यर्थः ॥ वृत्तिर्वर्त्यमाना योऽस्तात्पर्यमाह ॥ कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः तृप्यन्नेवं स्वमनसा मन्यते सौ निरंतरमि
ति ॥ असौ विद्वानेवोक्तप्रकारेण कृतकृत्यतया कृतं कृत्यं जातं येनासौ कृतकृत्यस्तस्य भावस्तत्ता तया [illegible] नतत्तमन्त्रवदस्य
मानप्रकारेण प्राप्तप्राप्यतया प्राप्तं प्राप्यं येनासः प्राप्तप्राप्यस्तस्य भावस्तत्ता तया तृप्यंल्लप्तीमन् वक्ष्यमाणेन सानिशं तरमेवमन्यते किमन्यतरस्तत
आह ॥ धन्योऽहमित्यादिना ॥ धन्योऽहं धन्योऽहं नित्यं स्वात्मानमञ्जसा वेद्मि ॥ धन्यः कृतार्थः । आदरार्था वीप्सा नित्यमनवरतं
स्वात्मानं स्वस्य निजं रूपं देशाद्यनवच्छिन्नं प्रत्यगात्मानमञ्जसा साक्षाद्यतो वेद्मि जानामि अतो धन्य इत्यर्थः ॥ एवमात्मज्ञानेनात्मानि
मितां तुष्टिमभिधाय तत्फलत्वानन्दनिमित्तां तां दर्शयति ॥ धन्योऽहं धन्योऽहं ब्रह्मानन्दो विभाति मे स्पष्टम् ॥ ब्रह्मानन्दो मे स्पष्टं विभाति स्प
ष्टं यथा भवति तथा स्फुरतीत्यर्थः ॥ एवमिष्टप्राप्तितुष्टिमभिधायानिष्टनिवृत्तिनिमित्तां तुष्टिं व्यपतीत्याह ॥ धन्योऽहं धन्योऽहं दुःखं सांसारि
कं न वीक्षेऽद्य इति ॥ अद्येदानीं दुःखं दुःखरूपं संसारं न वीक्षे न पश्याम्यतः कृतार्थ इत्यर्थः ॥ दुःखाप्रतीतौ कारणमाह ॥
धन्योऽहं धन्योऽहं स्वस्याज्ञानं पलायितं क्वापीति ॥ अनेकवासनाजालमज्ञानं पलायितं [illegible] इत्यर्थः ॥ अज्ञाननिवृत्तिफ
लं कृतकृत्यत्वं प्राप्तिप्राप्यत्वे दर्शयति ॥ धन्योऽहं धन्योऽहं कर्त्तव्यं मे न विद्यते किंचित् ॥ धन्योऽहं धन्योऽहं प्राप्तव्यं सर्वमाप्तं मे
ति ॥ इदानीं कृतकृत्यत्वमित्यादिना ज्ञाततायास्तृप्तेर्निरतिशयत्वमाह ॥ धन्योऽहं धन्योऽहं तृप्तेर्मे कोपमा भवेल्लोके [illegible] ततः
परं

६७

वेत्तृत्वादर्शनात्तृप्तिरेव परिस्फुरतीति दर्शयति ॥ धन्योऽहं धन्योऽहं धन्यो धन्यः पुनः पुनर्धन्य इति ॥ अस्य सर्वस्य कारणभूतपुण्य
पुंजपरिपाकमनुस्मृत्य तुष्यतीत्याह ॥ अहो पुण्यमहो पुण्यं फलितं फलितं दृढमिति ॥ एवंविधपुण्यसंपादककर्मा
णामनुस्मृत्य तुष्यति ॥ अस्य पुण्यस्य संपत्तेरहो वयमहो वयमिति ॥ इदानीं सम्यक्ज्ञानसाधनं शास्त्रं तदु
पदेष्टारमाचार्यमनुस्मृत्य तुष्यति ॥ अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुरिति ॥ पुनश्च स्वस्य ज्ञानं तज्ज
न्यं च सुखं चानुस्मृत्य संतुष्यति ॥ अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखमिति ॥ ग्रंथाभ्यासफलमाह ॥ तृप्ति
दीपमिमं नित्यं येनुसंदधते बुधाः ॥ ब्रह्मानंदे निमज्जन्तस्ते तृप्यन्तु निरंतरमिति ॥ स्पष्टमेतत् ॥ मोहान्नीतो
विध्वस्तो मुनिनिगिरमिहितो मोहसंक्रान्तिमूर्तिः साक्षात्स्वान्ते तदुत्थे प्रतिफलति वपुर्गीयते सो प्रमाता ॥
चेतासक्तप्रमातापि फलमपि धिषणावृत्तिसंव्याप्तचैतन्योपाधिर्मोहोत्थशब्दप्रमुखविषयगः स्यात्प्रमेयः
परात्मा ॥ श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णा
ख्येन विरचिता तृप्तिदीपिकाव्याख्या समाप्ता ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ कूटस्थदी
पस्य दीपस्य व्याख्याता तात्पर्यदीपिका ॥ मुमुक्षोर्मोक्षसाधनस्य ब्रह्मात्मैकत्वज्ञानस्य त्वंपदार्थशोधनपूर्व
कत्वात्त्वंपदार्थशोधनपरं कूटस्थदीपाख्यं ग्रंथमारभमाण आचार्योऽस्य ग्रंथस्य वेदान्तप्रकरणत्वेन तदीय
रेव विषयादिभिस्तद्वत्तासिद्धिमभिप्रेत्य त्वंपदलक्ष्यवाच्यौ कूटस्थजीवौ सदृष्टान्तं भेदेन निर्दिशति ॥ यथादि

तासां संधौ मध्ये इतरा सामान्य
तस्मात् दर्पणजन्यप्रभाभावे दर्पणाभावजन्य आदित्याभासत्वेन स्वयं सर्वत्र प्रकाशते ८

त्यदीपिते कुड्ये दर्पणादित्यदीप्तिवत्। कूटस्थभासितो देहो धीस्थजीवेन भास्यते इति॥ खादित्यदीपिते स्वच्छ आदित्य खादित्यः
प्रसिद्धसूर्य इत्यर्थः। तेन तत्संबन्धप्राप्तालोकोज्ज्वलदा ते तेन दीपिते प्रकाशिते कुड्ये दर्पणादित्यदीप्तिवत् दर्पणेषु प्रतिफलितप
यो रवेः कुड्यसंबंधी रादित्यरश्मिभिस्तत्प्रकाशनमिव कूटस्थभासितः कूटस्थेनाविकारिचैतन्येन प्रकाशितो देहो
धीस्थजीवेन बुद्धिस्थचिदाभासेन भास्यते प्रकाश्यते। अनेन सामान्यतो विशेषतश्च कुड्यावभासकादित्यप्रकाशद्वय
मिव देहावभासन चैतन्यद्वयमस्तीति प्रतिज्ञातं भवति। ननु तत्र दर्पणादित्यदीप्तिव्यतिरेकेण खादित्यदीप्तिर्नोपलभ्य
ते इत्याशंक्य स्वानुभवं प्रदर्शयति॥ अनेकदर्पणादित्यदीप्तीनां बहुसंधिषु॥ इतरा व्याप्ते तासामभावेपि प्रकाशते इति॥ यथानेक
बहुदर्पणजन्याः कुड्ये तत्र तत्र मंडलाकारा विशेषप्रभा दृश्यन्ते तासां संधौ मध्ये इतरा सामान्यप्रकाशतया खादित्यप्रभा व्य
ज्यते। अनेकदर्पणोपलब्धं दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति॥ चिदाभासविशिष्टानां तथानेकधियामसौ॥ संधिं धियां
मभावं चाभासयन्प्रविविच्यतामिति॥ तथा तेनैव प्रकारेण चिदाभासविशिष्टानां चित्प्रतिबिंबयुक्तानामनेकधियामनेका
सां बुद्धिवृत्तीनां घटज्ञानादिरूपवृत्तीनां संधिमंतरालं [illegible] द्वयोर्धियोः तासामभावं बुद्धिवृत्तीनामभावं च सुषुप्त्यादौ भास
यन्नसौ कूटस्थः प्रविविच्यतां ताभ्यो भेदेन ज्ञायतामित्यर्थः। इदानीं देहान्तःकूटस्थचिदाभासयोर्भेदं प्रदर्शनाय देहान्त
र्बहिः स्फुटचिदाभासब्रह्मणोर्विभागं दर्शयति॥ घटैकाकारधीस्था चिद्घटमेवावभासयेत्॥ घटस्य ज्ञातता ब्रह्मचैतन्येनावा
भासते॥ घटैकाकारधीस्था चिद्घटस्यैकाकारवृत्त्याकारो यस्याः सा घटैकाकारा तथाविधायां बुद्धौ वर्तमानः

६८

चिदाभासः घटमेवावभासयेत् तस्य घटस्य ज्ञातताख्यो धर्मो घटो ज्ञात इति व्यवहारहेतुर्यः स घटकल्पना-
धिष्ठाने न ब्रह्मस्वचैतन्येन साधनभूतेनावगम्यते प्रकाशते इत्यर्थः ॥ ननु ज्ञाततावभासकचैतन्येनैव घट-
प्रतीतिसंभवाद्बहु किमर्थं स्यात् अंशस्य घटस्य ज्ञाततादिभेदसिद्ध्यर्थं इत्याह ॥ अज्ञातत्वेन ज्ञातोयं घटो बुद्ध्युदयात्पु-
रा ॥ ब्रह्मणैवोपरिष्टात्तु ज्ञातत्वेनेत्यसौ भिदेति ॥ ब्रह्मणैवाज्ञातत्वेन प्रकाशते बुद्ध्युत्पत्तौ सत्यां ज्ञातत्वेन ब्रह्मणैव
प्रकाश्यते इति यावदेव भेदः नाम इत्यर्थः ननु चैकस्यैव घटस्य ज्ञातत्वाज्ञातत्वलक्षणं द्विरूपं कथं संभवतीत्याशंक्य तत्
द्वबोधनाय ज्ञातता, ज्ञाततानिमित्तयोः ज्ञानाज्ञानयोः स्वरूपं तावद्दर्शयति ॥ चिदाभासान्तधीवृत्तिः ज्ञानं लो-
हान्तकुन्तवत् ॥ जाड्यमज्ञानमेताभ्यां व्याप्तः कुम्भो द्विधोच्यते इति ॥ चिदाभासान्तधीवृत्तिः चिदाभासः प्रतिबिम्बस्तत्प्रतिबिं-
बप्रसन्तः पुरोभागे यस्याः सा धीवृत्तिः ज्ञानमित्युच्यते बोधध्या बुद्धिरित्याचार्यैरभिधानात् तत्र दृष्टान्तः लोहान्तकुन्त-
वदिति जाड्यं स्वतःस्फूर्तिरहितत्वमज्ञानमित्युच्यते एताभ्यां वर्षा येषां व्याप्तः सर्वतः संबद्धः कुम्भो ज्ञातोऽज्ञात इति
चोच्यते इत्यर्थः ॥ ननु चाज्ञातस्य कुम्भस्याज्ञानव्याप्तत्वाद्भवतु ब्रह्मावभास्यत्वं ज्ञानव्याप्तस्य तु ज्ञातस्य कुम्भस्य कुतो ब्रह्म-
चैतन्यावभास्यत्वमित्याशंक्याज्ञानस्याज्ञाततारूपेणेव ज्ञानस्यापि ज्ञाततारूपेणेव मात्रोपवर्णितात्वादज्ञातकुम्भ-
वज्ज्ञातस्यापि ब्रह्मावभास्यत्वं भवतीत्याह ॥ अज्ञातो ब्रह्मणा भास्यो ज्ञातः कुम्भः तथा न किमिति ॥ यथा अज्ञा-
तकुम्भो ब्रह्मचैतन्यभास्यस्तथा ज्ञातः कुम्भो न किं ब्रह्मावभास्यो भवति किंतु भवत्येवेत्यर्थः कुत इत्यत आह ॥ ज्ञातता

त्मनेनैव चिदाभासपरिहार इति॥ न च वेद्यता ततो जननया या ज्ञाने मिव ज्ञातताजननाया पि बुद्धेर्वा ऽलं किमनेन चिदाभासेने
त्याशंक्याह चिदाभासरहितायाबुद्धेर्घटादिवत् प्रकाशरूपत्वेनज्ञातताजननंन संभवतीत्याह॥ आभासहीनया बुद्ध्या
ज्ञाततैवनैवजन्यते॥ तादृग्बुद्धेर्विशेषः कोमृदादेः स्यादि कारिण इति॥ चिदाभास रहित बुद्धिव्याप्तस्य घटस्य ज्ञातत्वा
भावं दृष्टान्तप्रदर्शनेन स्पष्टयति॥ ज्ञातत्वस्तु यतः कुंभो मृदा लिप्तोन कुत्र चिदाधीमात्रव्याप्तकुंभस्य ज्ञातत्वेन व्य
वेतनस्येति॥ यल्लोके कुत्र चिदपि घटः मृदाप्रकारकरूपयालिप्तो लेपनं प्राप्तो ज्ञात इति नोच्यते यथा तथा चिदाभासबुद्धिव्याप्तस्य
कुंभस्य ज्ञातत्वं नाम प्रसिद्धमिति यर्थः ति भावः फलितमाह॥ ज्ञातत्वे नाम कुंभे तच्चिदाभासफलोदयइति॥ यतः केवलाया बुद्धेः
ज्ञाततजननासमर्थ्यत्वमतः कुंभे चिदाभासलक्षणस्य फलस्यो त्पत्तिरेव ज्ञातत्वं नाम प्रसिद्धमित्यर्थः॥ ननु तथा पि चिदा
भासो न कल्पनीयः ब्रह्म चैतन्यस्यैव फलस्य सद्भावादित्याशंक्याह॥ न फलं ब्रह्मचैतन्यमिति॥ ब्रह्मचैतन्यं फलं घटा
दिस्फुरणं न भवतीति कुत इत्यत आह॥ मानात्प्रागपि सत्वत इति॥ मानात्प्राग विमानप्रवृत्तेः पूर्वमपि विद्यमानत्वात् फलस्य त
दितरकालीनत्वनियमादिति ना चेदं परागर्थपरिहारइति॥ परागर्थप्रमेयेषु या फलत्वेन संमता॥ संवित्सैवेह मेयार्थवेदान्तो
क्तप्रमाणतः इति वार्तिककारेणचित्सादृश्यं विवक्षितमिति॥ अस्य चायमर्थः परागर्था बाह्या घटादयः पदार्थास्तेषु प्र
मेयेषु सत्सु या प्रमाणफलत्वेनाभ्युपगतासंविदस्तिसैवेहास्मिन्शास्त्रे वेदान्तोक्तप्रमाणतो वेदान्तवाक्यलक्षणप्रमाणेन
मेयार्थो ज्ञातव्योर्थः॥ इत्यनेन वार्तिककारेणमीदृशी चिदित्युक्तं कुतो वगम्यत इत्याशंक्य तदुक्तिः श्रीमदाचार्यैरुपदे

ग्रामाह स्वांशब्रह्मचैतन्यचिदाभासयोर्भेदस्य प्रतिपादितत्वादित्याह ॥ ब्रह्मचित्फलयोर्भेदः सहस्त्रां विश्रुतो यतः इति
ब्रह्मण्यधिगच्छ फलं चेति । ब्रह्मचित्फलं तयोरिति विग्रहः एवं च सति प्रकृते किमायातमित्यत आह घटाभा
भासस्येदितस्तस्मात् ज्ञाततत्वं जनयेद्घटे ॥ न तु पुनर्ब्रह्मणाभासमज्ञातत्ववदेवहीति ॥ यस्माद्ब्रह्मचित्फलयो
र्भेदः सिद्धस्तस्माद्घटे इदितघटाभासस्तत्र घटे ज्ञातत्वं जनयेत् न त्वन्नेतज्ज्ञातत्वं पुनरज्ञातत्वं तु ब्रह्मणो
वभासं नवतिहि प्रसिद्धमित्यर्थः एवं ब्रह्मचिदाभासयोर्भेदमुपपादितं द्विविषयभेदप्रदर्शनेनस्प
ष्टयति ॥ चिदाभासकुम्भानां समूहं भासयते चिता ॥ कुम्भमात्रफलत्वात्स एकः ग्राभासतः स्फुरेदिति
चिता ब्रह्मचैतन्येनेत्यर्थः चिदाभासस्य कुम्भमात्रनिफलरूपत्वात्तेनाभासेन सह घट एकः स्फु
द्रासेतत्यर्थः कुम्भस्य चिदाभासब्रह्माभयभास्यत्वे लिंगमाह ॥ चैतन्यं द्विगुणं कुम्भे ज्ञातत्वेन स्फुर
त्यत इति ॥ अतो घटस्य ब्रह्मचिदाभासोभयभास्यत्वात् कुम्भे ज्ञातत्वेन द्विगुणं चैतन्यं भातितमेव
घटज्ञाततावभासकं तार्किकैः नामान्तरेण व्यवह्रियत इत्याह ॥ अन्ये तु व्यवसायाख्यमानुरेतद्व्य
प्यादितिमिति ॥ यथा क्रमेण ब्रह्मचैतन्यमथ्ये तार्किकाः अनुव्यवसायाख्यं ज्ञातान्तरं प्राहुरिति यो

८०

त्मना॥ अयं घट इति ज्ञातो घट इति व्यवहारारम्भे प्रागपि चिदाभासब्रह्मणोर्भेदो वगंतुमशक्य इत्याह॥ घटोयमित्यसावुक्ति
राभासस्य प्रसादतः॥ विज्ञातो घट इत्युक्तिर्ब्रह्मानुग्रहतो भवेदिति॥ देहाद्बहिश्चिदाभासब्रह्मणोर्विविच्यतेयथा
तथा देहान्तश्चिदाभासकूटस्थौ विवेचनीयावित्याह॥ आभासब्रह्मणी देहाद्बहिर्यद्वद्विवेचिते॥ तद्वच्चिदाभास
कूटस्थौ विविच्येतां वपुष्यपीति॥ ननु देहाद्बहिश्चिदाभासस्यापि घटाकारवृत्तिवदान्तरविषयगोचरवृ
त्त्यभावात्कथं तद्व्यापकश्चिदाभासोभ्युपगम्य इत्याशंक्य विषयगोचरवृत्त्यभावेप्यहमादिवृत्तिसद्भावाद्व्या
पकश्चिदाभासोभ्युपगंतव्य इति सदृष्टान्तमाह॥ अहंवृत्तौ चिदाभासः कामक्रोधादिकासु च॥ संव्याप्य वर्तते त
प्तं लोहं वह्निर्यथा तथेति॥ अहमादिवृत्तीनामेव चिदाभासभास्यत्वे दृष्टान्तप्रपंचेन स्पष्टयति॥ स्वमात्रं
भासयेत्तप्तं लोहं नान्यत्कदाचन॥ एवमाभाससहिता वृत्तयः स्वस्वभासिका इति॥ एवं चिदाभासं व्युत्पाद्य
कूटस्थस्वरूपं व्युत्पादयितुं तदुपयोगिनं वृत्त्यभावावसरं दर्शयति॥ क्रमाद्विच्छिद्य जायन्ते जायमानास्ववृत्तयो वि
लीनाः सर्वा अपि विलीयंते सुप्तिमूर्छासमाधिषु॥ भवत्वेवं समाध्यादौ वृत्तिविलये तेन कथं कूटस्थोवग
म्यते इत्याशंक्य वृत्त्यभावसाक्षितेनावगम्यत इत्यत आह॥ संधयोखिलवृत्तीनामभावाश्चावभासिताः

निर्विकारेणायनासौ कूटस्थ इति चोच्यते ॥ वृत्तिसंधयो वृत्त्यभावश्च येन च चैतन्येनावगम्यन्ते स कूटस्थोवगंतव्य इ
त्यर्थः एवं च सति किं फलितमित्यत आह ॥ घटे द्विगुणचैतन्यं यथा बाह्ये तथान्तरे ॥ वृत्तिष्वपीति वा बाह्यघ
टे घटमात्रावभासकश्चिदाभासः घटस्य ज्ञातताव भासकं ब्रह्मचैतन्यं चेति द्विगुणत्वं यथा तथान्तरे हंकारादि
वृत्तिष्वपि कूटस्थचैतन्यमवभासकं चिदाभासश्चेति द्विगुणं चैतन्यमस्ति तत्रोपपत्तिमाह ॥ ततस्तत्र वै
शद्यं संधितोऽधिकमिति ॥ यतो द्विगुणं चैतन्यं भासते ततः संधितः संधिभ्यस्तत्र वृत्तिषु वैशद्यमधिकं दृश्य
ते इति शेषः ॥ ननु चात्रापि वृत्तिष्वपि घटादिष्विव ज्ञातताज्ञातता वभासकत्वेन कूटस्थचैतन्यं किं नेष्यत इत्या
शंक्य तत्र ज्ञातताद्यभावादेवेत्याह ॥ ज्ञातताज्ञातते न स्तो घटवद्वृत्तिषु क्वचिदिति ॥ तत्रोपपत्तिमाह ॥ स्वस्य
स्वेनाग्रहीतत्वात्ताभिश्चाज्ञाननाशनादिति ॥ ज्ञानाज्ञानव्याप्तिभ्यां ज्ञातताज्ञातते भवतः वृत्तीनां स्वस्वप्रकाश
त्वेन ज्ञानव्याप्तिर्नास्ति ताभिर्वृत्तिभिः स्वोत्पत्तिमात्रेण स्वगोचराज्ञानस्य व्याप्तिरपि नास्तीति भावः ॥ ननु कू
टस्थचिदाभासयो रूपयोऽपि चित्वे समाने एकस्य कूटस्थत्वमपरस्याकूटस्थत्वमिति तत्कुत इत्याशंक्य चि
दाभासनिष्ठयोर्जन्मनाशयोरनुभूयमानत्वादस्याकूटस्थत्वमिति तस्य चिद्विकारित्वे प्रमाणमाह ॥ कू

२०

टस्य स्य स्यो त्वमित्याह॥ द्विगुणीकृत्य चैतन्ये जन्मनाशानुभूतितः॥ अकूटस्थं तदन्यत्तु कूटस्थमविकारत इति॥ चिदाभा
स व्यतिरिक्त कूटस्थस्याभ्युपगमः स्वकपोलकल्पित इत्याशंक्याचार्यैः कूटस्थस्योपपादितत्वान्नैवमित्याह॥ अन्तःकर
णतद्वृत्तिसाक्षीत्यादावनेकधा कूटस्थ एव सर्वत्र स्वराचार्यैर्विनिरूपित इति॥ अन्तःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः॥ आन
न्दरूपः सत्यः सन् किं नात्मानं प्रपद्यसे इत्यादि विस्पष्टैः कूटस्थातिरिक्तश्चिदाभासोऽपि तैर्वर्णित इत्याह॥ आत्माभासाश्रया
श्चैवं मुखाभासाश्रया यथा॥ गम्यन्ते शास्त्रयुक्तिभ्यामित्याभासश्च वर्णित इति॥ आत्मा चाभासस्तदाश्रयश्च॥ आत्माभासाश्रयाश्चे
ति द्वन्द्व समासः मुखाभासाश्रया इत्यत्रापि तथा मुखं च प्रसिद्धं॥ आभासो मुखप्रतिबिम्बः॥ आश्रयो दर्पणादिः श्रुतित्रयं मध्यात्रस्तद्योता
वगम्यते॥ एवमात्मा कूटस्थः॥ आत्माभासश्चिदाभासः शब्देन कूटस्थातिरिक्तश्चिदाभासो वर्णित इति भावः मनसः साक्षी बुद्धेः सा
क्षीति श्रुतिसिद्धः प्रतिपादकं शास्त्रं रूपं रूपं प्रतिरूपो बभूवेति चिदाभासप्रतिपादकं विकारित्वाविकारित्वादिरूपा युक्तिः
पूर्वमेवोक्तेति भावः तत्र चिदाभासमाक्षिपति॥ बुद्ध्यवच्छिन्नकूटस्थो लोकान्तरगमागमौ॥ कर्तुं शक्तो घटाकाशइवाभासे
न किं वदेति॥ क्वस्विन्नकल्प्यमानया बुद्ध्यावच्छिन्नः कूटस्थ एव घटद्वारा घटाकाश इव बुद्धिद्वारा लोकान्तरे गमनागमने क
र्तुं शक्नोति॥ अतश्चिदाभासकल्पनायां गौरवमिति भावः॥ असंगस्य कूटस्थस्य बुद्ध्यवच्छेदमात्रेण जीवत्वं न घटते॥ अन्यथाति

प्रसंग असंगारिति परिहरति॥ अत एव असंगः परिच्छेदमात्रज्ञो यो भवेन्नहीति॥ प्रमया घटकुड्यादेरवच्छिन्नस्य ज्ञाव नेति॥
बुद्धिकुड्ययोः स्वाच्छ्यास्वाच्छ्याभ्यां वैषम्यं दर्शयते॥ न कुड्यसदृशी बुद्धिः स्वच्छत्वादिति चेदिति॥ उक्तं स्वच्छत्वं परिच्छे
दप्रयोजकं न भवतीत्याह॥ तथा स्वच्छा नाम परिच्छेदे किं स्वाच्छ्येन भवेन्नवेति॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति॥ प्रस्थे
न दारूद्भवेन कांस्यजन्मेन वा नहि॥ चित्रे तु तंडुलादीनां परिमाणो विशेष्यत इति॥ दारुकांस्यजन्ययोः प्रस्थयोः स्वास्वा
स्वच्छतास्वच्छत्वे तंडुलपरिमाणे न्यूनाधिकभावहेतू न भवत इत्यर्थः कांस्यप्रस्थे तंडुलपरिमाणानधिकभावे पि चे
त्प्रतिबिंबलक्षणमधिकमस्तीत्याशंक्य तर्हि बुद्धावपि चिदाभासो भवतेवांगीकृतः स्यादित्याह॥ परिमाणाविशेषेपि प्रति
बिंबो विशिष्यते॥ कांस्यादौ नु तदा बुद्धावप्याभासो भवेद्दृढत्वादिति॥ प्रतिबिंबांगीकारे चिदाभासः कथमंगीकृतः स्यादि
त्याशंक्य प्रतिबिंबाभासशब्दाभ्यामभिधेयस्यार्थस्यानाधिक्यादित्याह॥ ईषद्भासनमाभासः प्रतिबिंबस्तथाविधः इति
प्रतिबिंबस्याभासत्वं कथमित्याशंक्याभासलक्षणयोगादित्याह॥ बिंबलक्षणहीनः सन् चिद्भासते स हीति॥ हि
यस्मात्कारणात् प्रतिबिंबो बिंबलक्षणरहितो बिंबवदवभासते अतो बिंबाभास इति भावः॥ आभासलक्षण
योगित्वमेव स्पष्टयति॥ ससंगत्वविकाराभ्यां बिंबलक्षणहीनता॥ स्फूर्तिरूपत्वमेतस्य बिंबवद्भासनं विदुरिति
एतस्य चिदाभासस्य ससंगत्वविकारित्वाभ्यां बिंबभूतासंगाविकारि चैतन्यलक्षणहीनत्वं स्फुरणरूपत्वं बिंबव
दवभासनमित्यर्थः हेतुलक्षणरहितात् हेतुवदाभासमानाहेत्वाभासा इति वत् इत्थं चिदाभा समानाहेत्वाभा सा

प्रयोजकत्वं निराकरोति इदानीं तस्य बुद्धेः पृथक्त्वं साधयितुं पूर्वपक्षमाह ॥ नहि धीभावभासत्वादाभासोस्ति धियः पृथक् यस्मात्
दिति ॥ यस्मात् सदिसत्तामेव घटादिना सदा भिद्यते तद्वदिति भावः ॥ नच्चैवं तर्हि देहातिरिक्तधीरपि न सिध्येदिति प्रतिबंद्या परिहरति ॥ प्र
त्यमेवोक्तधीरप्येवं स्वदेहतः इति ॥ प्रतिबंदीमोचनं शंकते ॥ देहे मृतेपि बुद्धिस्थो ह्याभासस्त्वारस्तीति ॥ देहव्यतिरिक्ताया बुद्धेः स्वविज्ञानोऽभवती
त्यादि अर्थतः सिद्धत्वात्त्वाभासस्यापीति भावः ॥ ननु श्रुतिबलात् देहातिरिक्ता बुद्धिरभ्युपगम्यते चेत् तर्हि प्रवेशश्रुतिबलाद् बुद्ध्यतिरिक्तश्चिदाभा
सोऽभ्युपेय इत्याह ॥ तथास्मन्ति बुद्धेरन्यश्चिदाभासः प्रवेशश्रुतिषु श्रुत इति ननु बुद्ध्युपाधिकस्यैव प्रवेशो युज्यते नेतरस्येति शंकते ॥
धीयुक्तस्य प्रवेशश्चेदिति ॥ ऐतरेये श्रुतो बुद्ध्यतिरिक्तस्यैव प्रवेशः श्रूयते नैवमिति परिहरति ॥ ऐतरेये धियः पृथक् ॥ आत्मा प्रवेशं
संकल्प्य प्रविष्ट इति गीयते इति ॥ तामेव श्रुतिमर्थतः पठति ॥ कथं न्विदं सदेहं मदृते स्यादितीरणात् विदार्य मूर्ध्नः सीमानं प्रविष्टः
संसरत्ययमिति ॥ एवं परमात्मा सदेहमसालिच्च देहश्रुतेः मह वर्त्तते इति सा सदेहमिदं जडजातं मदृते चेतनं मां विहाय कथं तत्स्यान्न कथमपि
निर्वहेदिति विसृज्य मूर्ध्नः सीमानं कपालत्रयमध्यदेशं विदार्य तस्य मध्यमार्गेण जीवात्मना प्रविश्य संसरति जाग्रदादिकमनुभवतीत्यर्थः ॥ न
न्वसंगस्यात्मनः प्रवेशो न युक्त इति शंकते ॥ कथं प्रविशेत् असंग इति ॥ इदं चोद्यं सृष्टावपि समानमित्याह ॥ सृष्टिर्वास्य कथं वदेति
सृष्टिकर्तुर्मायिकत्वान्न दोष इत्याशंक्याह प्रहारः प्रविष्टस्यापि समानमित्याह ॥ मायिकत्वं तयोस्तुल्यमिति ॥ प्रवेशो मायिकत्वे हेतुः
सम इत्याह ॥ विनाशश्रुतिसमत्वादिति ॥ प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति औपाधिक
रूपस्य विनाशत्वप्रतिपादकश्रुतिं दर्शयति ॥ समुत्थायैषु भूतेभ्यस्तान्येवानुविनश्यति ॥ चित्स्वरूपमिति मैत्रेय्यै याज्ञवल्क्यस्तु

वाचक्षीतेति॥ एवं सर्वज्ञानपरमात्मा एतेभ्यो देहेन्द्रियादिरूपेभ्यः पंचभूतकार्येभ्यो निमित्तभूतेभ्यः समुत्थाय जीवत्वाभिधानं प्राप्ता
मेवदेहादीनि विनश्यत्स्वनु विनश्यति तेषु विनश्यत्सु तत्क्षणं जीवत्वाभिमानं जहाति॥ एवंप्रकारेण सोपाधिकरूपस्याविनाशित्वं
साऽजीवत्वो मैत्रेय्ये तद्रूपं वा निरूप्य॥ अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मेति श्रुत्या कूटस्थस्य स्वतो विभिन्नः प्रदर्शित इ
त्याह॥ अविनाश्ययमात्मेति कूटस्थः प्रविविच्यत इति मात्रासंसर्गस्त्वस्य न भवतीति श्रुत्या विनाशित्वे हेतुमसंगत्वं चोक्त्वा
वातिस्याह॥ मात्रासंसर्ग इत्येवमसंगत्वस्य कीर्तनादिति॥ मीयन्त इति मात्रा देहादयस्तानि इस्यात्मनो संसर्गो न भवतीत्यर्थः॥ न
नु जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति श्रुत्या सोपाधिकस्याप्यविनाशित्वं प्रतिपादितमित्याशंक्य तस्याः श्रु
तेर्हि तात्पर्यं विवक्षितं यतया नास्तं तक नात्राभावपरत्वमित्याह॥ जीवापेतं वाव किलेदं शरीरं म्रियते न सः इत्यत्र न
विमोक्षार्थः किन्तु लोकान्तरे गतिरिति॥ जीवापेतं जीवरहितं जीवेन मुक्तमिति यावत् वाव एव जीवो न म्रियत इत्यर्थः
ननु जीवस्याविनाशित्वे अहं ब्रह्मास्मीत्यविनाशि ब्रह्मतादात्म्यज्ञानं न घटते इति शंकते॥ नाहं ब्रह्मेति बुध्येत सविनाशी
ति चेदिति॥ विनाशी जीवोऽहं ब्रह्मेति ब्रह्मरूपत्वेन ज्ञानेन न बुध्येत न जीवो यात्रविनाशाविनाशिनोरेकत्वविरोधा
दिति चेन्मुख्यसामानाधिकरण्यासंभवेऽपि बाधायां सामानाधिकरण्यसंभवान्नैवं जीवत्वबाधेन ब्रह्मभावावगते
रुक्तत्वे इत्याह॥ न ततः सामानाधिकरण्यस्य बाधायामप्यसंभवादिति बाधायां सामानाधिकरण्येन वाक्या
र्थप्रतिपत्तिप्रकारो वार्तिककारैः सदृष्टान्तोऽभिहित इतीममर्थं तद्वाक्योदाहरणपूर्वं दर्शयति॥ योयं स्थाणुः पुमा

नेयं पुंधियास्स्थाणुधीरिव॥ ब्रह्मास्मीति धिया शेषा ह्यहंबुद्धिर्निवर्तते इति॥ नैष्कर्म्यसिद्धावप्येवमाचार्यैः स्पष्टमीरितम्॥ सामानाधि-
करण्यस्य बाधार्थत्वमिति॥ स्थाणुरेष पुमानिति वाक्ये पुरुषत्वबोधेन स्थाणुबुद्धिर्निवर्तते यथा एवं अहं ब्रह्मास्मीति बोधेन
स्थाणुबुद्धिर्निवर्तते यथा एवं अहं ब्रह्मास्मीति बोधेनाहंबुद्धिः कर्ताहमस्मीत्येवमादिरूपा सर्वापि निवर्तते इति एवमु-
क्तेन प्रकारेणाचार्यैर्वार्तिककारैर्नैष्कर्म्यसिद्धौ सामानाधिकरण्यस्य बाधार्थत्वं स्पष्टमीरितमिति॥ फलितमाह॥ ततो-
ऽस्तु तदिति॥ ततः कारणात् ब्रह्माहमस्मीति वाक्ये तत्सामानाधिकरण्यस्य बाधार्थत्वमस्तीत्यर्थः॥ नन्वेवमपि श्रुतिषु बा-
धायां सामानाधिकरण्यं न क्वापि दृष्टमित्याशंक्य सर्वं खल्विदं ब्रह्मेत्यत्र बाधायां सामानाधिकरण्यं दृष्टमतोऽत्रापि तद्विवक्ष-
तीत्याह॥ सर्वं ब्रह्मेति जगता सामानाधिकरण्यवत्॥ अहं ब्रह्मेति जीवेन सामानाधिकृतिर्भवेदिति॥ ननु तर्हि विवरणाचार्यैर्बाधा-
यां सामानाधिकरण्यं कुतो निराकृतमित्याशंक्य तैरहंशब्देन कूटस्थस्य विवक्षितत्वादित्याह॥ सामानाधिकरण्यस्य बा-
धार्थत्वं निराकृतं॥ अत एव तैर्विवरणे कूटस्थस्य तु विवक्षयेति॥ कूटस्थस्यत्वविवक्षये तु कर्ममर्थो विवक्षितेति॥ शोधितस्त्वंपदार्थो यः कू-
टस्थो ब्रह्मस्वरूपतां॥ तस्य वक्तुं विवरणे तथोक्तमितरत्र चेति॥ शोधितो बुद्ध्यादिभ्यो विवेचितस्त्वंपदलक्ष्यो यः कूटस्थो वस्तुसमातालक्ष-
णस्य ब्रह्मस्वरूपतां सत्यादिलक्षणब्रह्मरूपतां वक्तुं विवरणादिषु बाधसामानाधिकरण्यनिराकरणपूर्वकं मुख्यसामानाधिकर-
ण्यमुक्तमित्यर्थः॥ इदानीं कूटस्थस्य ब्रह्मत्वोक्तं संभावयितुं कूटस्थशब्देन विवक्षितस्य जीवाभासत्वमस्य चिदाभासरूपत्वम-
स्य यदधिष्ठानं चैतन्यरूपमस्ति तदत्र वेदान्तेषु कूटस्थत्वेन विवक्षितमित्यर्थः॥ ब्रह्मशब्दस्य वाच्यार्थमाह॥ जगद्भ्रमस्य सर्वस्य यदधिष्ठा-

नमीरितं॥ उच्यते पुतदउस्याह्रस्लशब्दविवक्षितमिति॥ कुतस्तु जगत्कल्पनाधिष्ठानं यच्चैतन्यं वेदान्तेषु निरूपितं तदत्रब्र
ह्मशब्देन विवक्षितमित्यर्थः॥ ननु जीववन्नमाधिष्ठानचैतन्यं कूटस्थ इत्युक्तमनुपपन्नं जीवस्यारोपितत्वासिद्धेरि
त्याशंक्य तस्यारोपितत्वं कैमुत्यन्यायेन साधयति॥ एतस्मिन्नेव चैतन्ये जगदारोप्यते यदा॥ तदा तदेकदेशस्य जीवाभा
सस्य का कथेति॥ जगदेकदेशत्वेनानेनजीवेनानुप्रविश्य त्यादिश्रुतिसिद्धं॥ ननु जगदधिष्ठानचैतन्यस्यैकत्वा
त्तत्वंपदार्थभेदाभावेनानुप्रविशेत्तत्त्वंपदार्थयोः पौनरुक्त्यमित्याशंक्य तयोरोपाधिकोभेदोवास्तमैक्यमित्याह॥
जगत्तदेकदेशाख्यसमारोप्यस्य भेदतः॥ तत्त्वंपदार्थौ भिन्नौ स्तो वस्तुतस्त्वेकता चितः इति॥ जगदिति तदेकदेश इति
च आख्यायस्य समारोप्यस्य भेदत्वात्॥ जातावेकवचनं॥ ननु चिदाभासस्य शुक्तिकाभासस्य शुक्तिकारजतादिव
दधिष्ठानारोप्योभयधर्मवत्त्वानुपलम्भात्कथमारोपितत्वमित्याशंक्याह॥ कर्तृत्वादीन्बुद्धिधर्मान्स्फूर्त्याख्यां चा
त्मरूपतां॥ दधद्विभाति पुरत आभासोतो भ्रमो भवेदिति॥ बुद्ध्युपाधिद्वारा समारोप्यमाणा कर्तृत्वभोक्तृत्वप्रमा
तृत्वादीन्स्फुरणलक्षणमात्मरूपत्वं दधत्पुरतो भाति स्पष्टं प्रतिभासते अतः अयमाभासः कल्पित इत्यर्थः॥ अ
स्य भ्रमस्य किंकारणमित्याशंक्य तज्ज्ञायां बुद्ध्यादिस्वरूपापरिज्ञानमेवेत्याह॥ का बुद्धिः कोयमाभासः को वात्मात्र जग
च्च किं॥ इत्यनिर्णयतो मोह इति॥ तस्यानिवर्तनीयत्वाद्यानर्थहेतुतामाह॥ सोयं संसार इष्यत इति॥ ७ अस्य
किं निवर्तकमित्यत आह॥ बुद्ध्यादीनां स्वरूपविवेक एव निवर्तक इत्यभिप्रेत्य तद्विद्यानेव ज्ञानी तत एव

चानर्थ[illegible]मिव[illegible]त्याह॥ बुद्ध्यादीनां स्वरूपं यो विविनक्ति स तत्त्ववित्॥ स एव मुक्त इत्येवं वेदान्तेषु विनिश्चय इति॥
एवं बन्धमोक्षयोरविवेकमूलत्वे सत्यद्वैतवादे कस्य बन्धः कस्य मोक्ष इत्येवमादिरूपास्तार्किकैः क्रियमाणाः कुत
र्कमूलाः परिहासविशेषाः स्वरूपेणोक्तयुक्तिभिस्तेषां निरस्तत्वान्न परिहरणीया इत्याह॥ एवं च सति बन्धः स्यात्कस्य
त्यादिकुतर्ककथाः॥ चिद्रूपत्वादे स्वरूपाः स्वरूपेणोक्तप्रकारत इति॥ एवं श्रुतियुक्तिभ्यां कूटस्थं बुद्ध्यादिभ्यो विविच्य दर्शयि
त्वा पुरा संक्षेपितद्विवेकः कृत इत्याह॥ वृत्तेः साक्षितया वृत्तिप्रागभावस्य च स्थितेः॥ बुभुत्सायां तथाज्ञोऽस्मीत्याभासाज्ज्ञा
नं वस्तु नः॥ इत्यसत्यालंबनत्वेन सत्यः सर्वजडस्य तु॥ साधकत्वेन चिद्रूपः सदा प्रेमास्पदत्वतः॥ आनन्दरूपः सर्वार्थसा
धकत्वेन हेतुना॥ सर्वसंबन्धवत्त्वेन संपूर्णः संस्थितः शिव इति॥ कामादिवृत्तिसत्त्वासत्त्वान्तःसाक्षित्वेन व्युत्पद्यात्सर्वेन सर्वेषां प्रा
गभावसाक्षित्वेन जिज्ञासायामस्यां तत्साक्षित्वेन ततः पूर्वमज्ञोऽस्मीत्यनुभूयमानाज्ञानसाक्षित्वेन च आत्मैव एव चास्तीति अतिमचासत्यस्य जगतः प्रा
लंबनत्वेनाधिष्ठानत्वेन सत्यः जडस्य सर्वस्य साधकत्वेनावभासकत्वाच्चिद्रूपः सर्वदा प्रेमविषयत्वादानन्दरूपः सर्वार्थावभास
कत्वे सर्वसंबंधित्वात्संपूर्ण इत्युच्यते॥ अत्र चेदमभिप्रेतं विमतः त्रिविधोऽवस्थादिभ्यो भिद्यते घटादिसाक्षित्वाद्यद्घटादिसाक्षि न भिद्यते
न तद्घटादिसाक्षि न भवति यथा घटादि विमतः सत्यो भवितुमर्हति मिथ्याधिष्ठानत्वाद्यत्सत्यं रजताधिष्ठानशुक्तिवत्॥ विम
तश्चिद्रूपः जडमात्रावभासकत्वाद्यच्चिद्रूपं न भवति न तत्सर्वजडावभासकमपि न भवति यथा घटादि विमतः परमानंदरूपः
परप्रेमास्पदत्वात् यत्परमानंदरूपं न भवति तत्प्रेमास्पदमपि न भवति यथा घटादि॥ विमतः परिपूर्णः सर्वसंबंधित्वाद्गगन

वत्॥ सर्वसंबंधित्वं च सर्वार्थमायिकत्वेन विमतः सर्वसंबंधिवान् सर्वविभासकत्वात् यः सर्वसंबंधवान्न भवति सर्वावभासको
पि न भवति यथा दीपादिरिति ग्रहाह तत्पुराणवाक्यस्य तात्पर्यमाह॥ इति शैवपुराणेषु कूटस्थः प्रविवेचितः॥ जीवेशत्वादिरहितः केव
लः स्वप्रभः शिव इति॥ इत्येवं प्रकारेण पूर्वसंहितादिषु पुराणेषु जीवेश्वरादिकल्पनारहितः केवलोऽद्वितीयः स्वप्रभः स्वप्रकाश
चैतन्यरूपः शिवः कूटस्थो विवेचित इत्यर्थः कथं जीवेश्वरत्वादिकल्पनारहितत्वं इत्याशंक्य [illegible]त्वात्तयोर्मायिकत्वप्रदर्शना
दित्याह॥ मायाभासेन जीवेशौ करोतीति श्रुतेस्ततः मायिकावेव जीवेशाविति॥ जीवेशावाभासेन करोति माया विद्या च स्वयमेव
भवतीति श्रुतिर्मायाविद्याधीनयोश्चिदाभासयोर्मायिकत्वं प्रतिपादयतीति भावः मायिकत्वे तयोर्देहादिवच्चैतन्यं
न स्यादित्याशंक्य पार्थिवत्वाविशेषेपि काचकुंभस्य घटादिभ्यो वैलक्षण्यमिवानयोरपि स्यादित्याह॥ स्वच्छौ तौ काच
कुंभवदिति॥ ननु घटकाचकुंभयोर्मृद्विकारत्वाविशेषेपि [illegible] दृष्टं प्रकृते जगज्जीवेश्वरभेदहेतोर्मायाया एकत्वान्न योर्जगतो वै
लक्षण्यमनुचितमित्याशंक्य अन्नजन्ययोर्देहमनसोर्यथा वैलक्षण्यं तद्वदित्याह॥ अन्नजन्यं मनो देहात्स्वच्छं यद्वत्तथैव तौ॥ मायिका
वपि सर्वस्मादन्यस्मात् [illegible] स्वच्छतां गताविति॥ भवतु काचादिवत्स्वच्छत्वं चित्त्वं कुत इत्याशंक्याह नुभवादित्याह॥ चिद्रूपत्वं च सं
भाव्यं चित्त्वेनैव प्रकाशनादिति॥ चित्त्वेन प्रकाशनमपि मायिकत्वे नुपपन्नमित्याशंक्य तस्माद्दुर्घटकारित्वादुपपन्नमित्या
ह॥ सर्वकल्पनशक्तायां मायायां दुष्करं न हीति॥ नह्येकमर्थं कैमुतिकन्यायेन द्रढयति॥ अस्मिन्नविद्याविजीवेशौ
चेतनौ स्वप्रगोस्त्जेत[illegible] महामायास्तत्वे ताविति॥ [illegible] किमत्र तदिति॥ ईश्वरस्यापि मायिकत्वे तस्य जीववत्सर्वज्ञत्वा
दिकमपि मायैव कल्पयतीत्याह॥ सर्वज्ञत्वादिकं चेशे कल्पयित्वा प्रदर्शयेदिति॥ तत्रोपपत्तिमाह॥ धर्मिणं कल्पयेद्यास्याः
को भारो धर्मकल्पने इति ननु जीवेशयोरिव कूटस्थस्यापि मायिकत्वं प्रसज्येतेति शंकते॥ कूटस्थेऽपि [illegible]तिशंका स्या

द्विति चेदिति ॥ प्रमाणाभावान्मैवमिति परिहरति ॥ मात्रित्रींकत्वं कूटस्थमायिकत्वे तु प्रमाणं नहि विद्यत इति ॥ कूटस्थस्य वास्तवत्वे
पि प्रमाणं नोपलभ्यत इत्याशंक्याह श्रुतयः सर्वापि प्रमाणमित्याह ॥ एवं सत्यं घोषयंत्यस्य वेदांताः सकला अपि ॥ संपन्नरूपं वस्त्वस्य
चेसहस्तेत्र किंचनेति ॥ अत्र कूटस्थपारमार्थिकत्वे प्रतिपादनमूतमन्यद्वस्तु किंचन न सहत इत्यर्थः ॥ ननु कूटस्थस्य जीवेशयो
श्च वास्तवत्वावास्तवत्वसाधने श्रुतय एव परस्तेन तर्कैरपि किंचित्साध्यत इत्याशंक्य मुमुक्षूणां श्रुत्यर्थविशदीकरणाय
प्रवृत्तत्वात्तर्कोऽप्यपेक्षित इत्याह ॥ श्रुत्यर्थं विशदीकुर्मो न तर्काद्वच्मि किंचन ॥ तेन तार्किकशंकानामत्र कोवसरो भवेदि
ति ॥ ततः किमित्यत आह ॥ तस्मात्कुतर्कं संत्यज्य मुमुक्षुः श्रुतिमाश्रयेदिति ॥ मुमुक्षुत्वाच्छ्रुत्यर्थः कीदृशोऽनुसंधेय इत्याह ॥
श्रुतौ तु मायाजीवेशौ करोतीति प्रदर्शितमिति ॥ ईक्षणादिप्रवेशांता सृष्टिरीशकृता भवेत् ॥ जाग्रदादिविमोक्षांतः संसारो जीवकर्तृकः ॥ अ
संग एव कूटस्थः सर्वदा नास्य कश्चन भवत्यतिशयस्तेन मनस्येवं विचार्यतामिति ॥ श्रुतिषु जीवेशयोर्मायिकत्वमीक्षणादिप्रवेशांताया
सृष्टेरीश्वरकर्तृकत्वं जागरत्वप्रमुखमुक्तिबंधमोक्षांतलक्षणस्य संसारस्य जीवकर्तृकत्वं कूटस्थस्यासंगत्वादिकं प्रति जन्मादिलक्षणस्य
त्वविकारजातस्याभावत्वं च प्रतिपादितं अतो मुमुक्षुरिममर्थं सर्वदा विचारयेदित्यभिप्रायः कूटस्थस्य कूटस्थस्य जन्माद्यतिशयाभावः
कुतोऽवगम्यत इत्याशंक्य श्रुतिवाक्यादित्यभिप्रेत्य तद्वाक्यं पठति ॥ न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ॥ न मुमुक्षुर्न वै मुक्त इत्येषा पर
मार्थतेति ॥ ननु तर्हि श्रुतिषु तत्र तत्र जीवेश्वरादिस्वरूपप्रतिपादने किमर्थमित्याशंक्याह अवाङ्मनसगोचरस्य तत्त्वस्य बोधनायेत्याह ॥ अ
वाङ्मनसगम्यं तं श्रुतिर्बोधयितुं सदा ॥ जीवमीशं जगद्वापि समाश्रित्य प्रबोधयेदिति ॥ ननु तत्त्वस्यैकरूपस्य श्रुतिबोध्यत्वे श्रुतिषु
विगानं कुतो दृश्यत इत्याशंक्य न तत्त्वे विगानमस्ति अपितु तद्बोधनप्रकारे तदपि बोध्यपुरुषचित्तवैचित्र्यानुसारेणत्सुरेश्वरा
चार्यैरुक्तमित्याह ॥ यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ॥ सा सैव प्रक्रिया साध्वीत्याचार्यभाषितमिति ॥ श्रुत्यर्थस्यैकरूप्य

चेतसत्तिपत्तिरित्याशंक्य॥श्रुतितात्पर्यबोधस्त्यानामेवविप्रतिपत्तिः ननुतद्विदामित्याह॥श्रुतितात्पर्यमखिलमबु
द्ध्वाभ्राम्यतेजडः॥विवेकीत्वखिलंबुद्ध्वातिष्ठत्यानंदवारिधाविति॥तर्हिविवेकिनोनिश्चयःकीदृशइत्याकांक्षायामा
ह॥मायामेघोजगन्नीरंवर्षत्वेषयथातथा॥चिदाकाशस्यनोहानिर्नचलाभइतिस्थितिरिति॥ग्रंथाभ्यासफल
माह॥इमंकूटस्थदीपंयोनुसंधत्तेनिरंतरं॥स्वयंकूटस्थरूपेणदीप्यतेसोनिरंतरमिति॥७६॥इतिश्रीम
त्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेणश्रीरामकृष्णाख्यविदुषाविरचि
ताकूटस्थव्याख्यासमाप्ता॥अथ८मप्रकरणंसमाप्तम्॥ॐनत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥क्रियते
ध्यानदीपस्यव्याख्यासंक्षेपतोमया॥इहतावद्वेदांतशास्त्रेनित्यानित्यवस्तुविवेकादिसाधनचतुष्टय
संपन्नस्यसम्यक्श्रवणमनननिदिध्यासनानुष्ठानवतःत्वंपदार्थविवेचनपूर्वकंमहावाक्यार्था
परोक्षज्ञानेनब्रह्मभावलक्षणोमोक्षोभवतीतिप्रतिपादितंतत्रश्रुतोपनिषत्कस्यापिबुद्धिमां
द्यादिनाकेनचित्प्रतिबंधेनवाक्यविषयापरोक्षप्रमित्यनुत्पत्तौसत्यांतदुत्पादनद्वारामोक्षफलको
पासनानिदिदर्शयिषुरादौनावत्सद्दृष्टांतंब्रह्मतत्त्वोपासनयापिमोक्षोभवतीतिप्रतिजानीते॥संवादि
भ्रमवद्ब्रह्मतत्त्वोपास्त्यापिमुच्यतइति॥यथासंवादिभ्रमेणप्रवृत्तस्याभिप्रेतार्थलाभोभवतिएवंब्र

स्ततत्वोपास्त्या सनयापि विमिलषितवस्तुप्रभावलक्षणो मोदो भवतीत्यर्थः तत्र किंप्रमाणमित्यत आह ॥ उत्तरे तापनीयेतः श्रु
तौ पास्तिरनेकधेति ॥ यत्तूपासनयापि मोक्षोस्येति तत्तापनीयोक्तमनेकप्रकारेण ब्रह्मतत्त्वोपासनाश्रुतावुक्ते त्यर्थः
मेवादिभ्रमवदित्युक्तं दृष्टान्तं प्रपंचयितुं संवादिभ्रमप्रतिपादकं वाक्यं वार्त्तिकं पठति ॥ मणिप्रदीपप्रभयोर्मणि
बुद्ध्याभिधावतोः ॥ मिथ्याज्ञानाविशेषेपि विशेषोर्थक्रियांप्रति ॥ मणिप्रदीपप्रभयोः मणिप्रदीपौ तयोः प्रभे मणिप्र
दीपप्रभे तयोरिति विग्रहः मणिप्रभायां दीपप्रभायां च या मणिबुद्धिः सा मिथ्याज्ञानमेवातस्मिंस्तद्बुद्धित्वात् यथापि म
णिप्रभायां मणिबुद्ध्याभिधावतः पुरुषस्य मणिलाभो भवति इतरस्य तु नास्तीत्यर्थक्रियायां वैषम्यमस्तीत्यर्थः वार्त्तिकं
[illegible] व्याचष्टे दीपोपवरकस्यान्तरित्यादिना श्लोकत्रयेण ॥ दीपोपवरकस्यान्तर्वर्त्तते तत्प्रभा बहिः ॥ दृश्यते द्वार्य
थान्यत्र तद्वद् दृष्टा मणेः प्रभा ॥ ३ ॥ दूरे प्रभाद्वयं दृष्ट्वा मणिबुद्ध्याभिधावतोः ॥ प्रभायां मणिबुद्धिस्तु मिथ्याज्ञानं द्व
योरपि ॥ ४ ॥ न लभते मणिं दीपप्रभां प्रत्यभिधावता ॥ प्रभायां धावता वश्यं लभ्येतैव मणिर्मणेः ॥ ५ ॥ क
स्मिंश्चिदपवरके दीपस्तिष्ठति तस्य प्रभा च बहिर्द्वारप्रदेशे रत्नमिव वर्तुलत्वोपलक्ष्यते तथान्यस्मि
न्नपवरके रत्नमस्ति तस्य रत्नस्य प्रभा च बहिर्द्वारप्रदेशे दीपप्रभेव रत्नसमानोपलभ्यते तथाविधं प्रभा
द्वयं दूरतो दृष्ट्वा अयं मणिरयं मणिरिति बुद्ध्या द्वौ पुरुषौ अभिधावनं कुर्वन्तस्तयोर्द्वयोरपि प्रभाविषये जाय

रस्तित्सर्वसंवादिभ्रम इतिस्मृतो विद्वद्भिः

मणौ मणिज्ञानं भ्रांतमेव अथापि दीपप्रभायां मणिबुद्धिं कृत्वा धावता पुरुषेण मणिर्न लभ्यते मणेः प्रभायां मणि
बुद्ध्या धावता मणिर्लभ्यत एव। भवत्वेवं वार्त्तिकार्थः प्रकृते किमायातमित्यत आह। दीपप्रभामणिभ्रान्तिर्विसं
वादिभ्रमः स्मृतः। मणिप्रभामणिभ्रान्तिः संवादिभ्रम उच्यते इति॥ ६॥ यद्दीपप्रभायां मणिबुद्धिर्मणिलाभलक्षणा
र्थक्रियारहितत्वात् मणिप्रभायां मणिबुद्धिस्तु मणिलाभलक्षणार्थक्रियावत्त्वात् संवादिभ्रम इत्यर्थः॥ एवं प्रत्य
क्षविषये संवादिभ्रमं दर्शयित्वा अनुमानविषयेऽपि तं दर्शयति॥ बाष्पं धूमतया बुद्ध्वा तत्राङ्गारानुमानतः॥ वह्निर्यदृ
च्छया लब्धः स संवादिभ्रमो मत इति॥ ७॥ क्वचित्प्रदेशेऽवस्थितं बाष्पं धूमत्वेन निश्चित्य तत्समूलप्रदेशेऽयं प्रदेशो
ग्निमान् धूमवत्त्वादित्यनुमाय प्रवृत्तेन पुरुषेण दैवगत्या यद्यग्निस्तत्रोपलभ्यते तदा बाष्पविषयधूमज्ञानं सं
वादिभ्रमो मतः॥ आगमविषयेऽपि तं दर्शयति॥ गोदावर्युदकं गंगोदकं मत्वा विशुद्धये। संप्रोक्ष्य शुद्धिमाप्नोति स संवा
दिभ्रमो मत इति॥ ८॥ गोदावर्युदकस्यापि विशुद्धहेतुत्वमागमसिद्धं मतस्तत्प्रोक्षणादपि शुद्धिरस्त्येव अथापि गो
दावर्युदके या गंगोदकबुद्धिः सा भ्रान्तिरेव उदाहरणान्तरमाह॥ ज्वरेणाप्तः संनिपातं भ्रान्त्या नारायणं स्मरन्॥ मृतः
स्वर्गमवाप्नोति स संवादिभ्रमो मत इति॥ ९॥ ज्वरेण संनिपातं प्राप्तः पुरुषः इदं नारायणस्मरणं मम स्वर्गसाधन
मिति ज्ञानमन्तरेणापि संन्निपातप्रयुक्तभ्रमवशात् साधारणपुरुषतया चैत्रादिवन्नारायणं स्मरन् मृतः स्वर्गं
प्राप्नोत्येव॥ हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः॥ विक्रुश्य पुत्रमघवान् यजामिलोऽपि नारायणेति म्रियमाण इयाय मु
क्तिमित्यादिपुराणवचनेभ्यः॥ अत्रापि नारायणनाम्नः पुत्रनामत्वज्ञानं भ्रान्तिरेव॥ एवं त्रिविधसंवादिभ्रमोदाहरणे

प्र

नेप्सितमर्थमाह ॥ प्रत्यक्षस्यानुमानस्य तथा शास्त्रस्य गोचरे ॥ उक्तन्यायेन संवादि भ्रमाः सन्ति हि कोटिक इति ॥ ९५ ॥ विप्लवेवाक
ब दर्शने कूलमर्थं द्रढयति ॥ अन्यथा मृत्तिकादारुशिलाः स्युर्देवताः कमिति । अन्यथा संवादि भ्रमाभावे मृदादयः फलसि
द्धये देवतात्वेन पूज्यमानाः कथं भवेयुः स्वतो देवतात्वाभावादित्यर्थः । बाधकमुत्तरमाह ॥ अग्नित्वादिधियोपास्याः कथं
वा योषिदादय इति ॥ ९६ ॥ पंचाग्निविद्यायां योषा वा व गौतमाग्निः पुरुषो वा व गौतमाग्निः पृथिवी वा व गौतमाग्निः पर्ज
न्यो वा व गौतमाग्निरसौ वाव द्युलोको गौतमाग्निरित्यादिना वैर्योषित्पुरुषपृथिवीपर्जन्यद्युलोकानामग्नित्वेनोपास
नं ब्रह्मलोकावाप्तिफलदं भवेदित्यर्थः । आदित्याद्येन मनो ब्रह्मेत्युपासीत आदित्यो ब्रह्मेत्यादेश इत्येवमादयोऽन्यस्तत्त्वदृष्टी
बहुभिर्ग्रंथैरुपपादितं संवादिभ्रमं बुद्धिसौकर्याय संक्षिप्य दर्शयति ॥ अयथावस्तुविज्ञानात्फलं लभ्यत ईप्सितं ॥ काकता
लीयतः सोऽयं संवादिभ्रम उच्यत इति ॥ ९७ ॥ विहितान्यद्विहिताद्वायथादयथावस्तुविज्ञानात्तद्विपरीतज्ञानादीप्सितमभि
लषितफलं काकतालीयतो दैवगत्या लभ्यते सोऽयं संवादिभ्रम इत्यर्थः । ननु ब्रह्मोपासनस्यायथावस्तुविषयस्य कथं सम्यक्
ज्ञानसाध्यमुक्तिफलप्रदत्वमित्याशंक्य संवादिभ्रमवदेवेत्याह ॥ स्वयं भ्रमोऽपि संवादि यथा सम्यक्फलप्रदः ॥ ब्रह्मत
त्त्वोपासनापि तथा मुक्तिफलप्रदेति ॥ ९८ ॥ ननु ब्रह्मतत्त्वं ज्ञात्वोपासनं क्रियते अज्ञात्वा वा । आद्ये नोपासनावैयर्थ्यं मोक्ष
साधनस्य ज्ञानस्यैव विद्यमानत्वात् । द्वितीये विषयाभावाद्ज्ञानादुपासनमेव न घटत इत्याशंक्याह ॥ वेदान्तेभ्यो ब्रह्म
तत्त्वमखंडैकरसात्मकं । परोक्षमवगम्यैतदहमस्मीत्युपासत इति ॥ ९९ ॥ अयमभिप्रायः श्रवणात्कृत्वा परोक्षज्ञानस्य
मोक्षसाधनस्यानुत्पन्नत्वात्तदुपासनमनतावैयर्थ्यं नाप्यज्ञात्वा परोक्षे तथा वगतत्वात्तद्ब्रह्मण उपासनाविषयत्वमिति ॥

२७

उपास्यब्रह्मतत्त्वगोचरस्य परोक्षज्ञानस्य किंरूपमित्याकांक्षायामाह॥ प्रत्यग्व्यक्तिमनुल्लिख्य शास्त्राद्विष्ण्वादिमूर्तिवत्
ब्रह्मास्तीत्युल्लेखिमात्रज्ञानमत्र परोक्षधीरिति॥२५॥ प्रत्यग्व्यक्तिं बुद्ध्यादिसाक्षिणमानंदात्मानमनुल्लिख्याविषयीकृत्य शास्त्रात्सत्यज्ञाना
दिवाक्यजातात् ब्रह्मास्तीत्येवंसामान्याकारेण जायमानं ज्ञानमत्रास्यां भूमौ परोक्षधीः परोक्षज्ञानं विवक्षितमित्यर्थः॥ किंनु शास्त्रेणो
तत्र दृष्टान्तः विष्ण्वादिमूर्तिप्रतिपादकशास्त्रजन्यज्ञानवदित्यर्थः॥ ननु शास्त्रेणापि विष्ण्वादिमूर्तेश्चतुर्भुजत्वादिविशेषप्रतीतेस्त
स्यापि कुतः परोक्षत्वमित्याशंक्याह॥ चतुर्भुजाद्यवगतावपि मूर्तिमनुल्लिखन्॥ अक्षैः परोक्षज्ञान्येव न तदा विष्णुमीक्षत इति॥२६॥ शा
स्त्रेण चतुर्भुजत्वमित्यादिविशेषप्रतीतावपि चक्षुरादिभिर्विष्ण्वादिमूर्तिमविषयीकुर्वन्पुरुषः परोक्षज्ञान्येव॥ तत्रोपपत्तिमाह॥ न त
दा विष्णुमीक्षत इति तदोपासनकाले चक्षुर्मुपास्यं नेक्षते तेनेंद्रियैर्विषयीकरोतीत्यर्थः॥ ननु विष्ण्वादिगोचरस्य ज्ञानस्य व्यक्तिगोच
रत्वाभावाद्भ्रमत्वमित्याशंक्य प्रमाणोत्पन्नत्वान्न भ्रमत्वमित्याह॥ परोक्षत्वापराधेन भवेन्नातत्त्ववेदनं प्रमाणेनैव
शास्त्रेणास्य मूर्तेर्विभासनादिति॥२७॥ परोक्षज्ञानत्वमयथार्थज्ञानत्वे कारणं न भवति किंतु विषयाबाधस्यत्वं हेतु
प्रमाणभूतेन शास्त्रेणैव यथार्थभूताया विष्ण्वादिमूर्तेरवभासनान्न भ्रमत्वमित्यर्थः॥ ननु सच्चिदानन्दव्यक्तेस्तु ख
नोक्तत्वात्तत्त्वज्ञानस्य शास्त्रजन्यस्यापि कुतः परोक्षतेत्याशंक्यापरोक्षत्वप्रयोजकप्रत्यक्त्वोल्लेखविनो ब्रह्मतत्त्वज्ञानस्य शास्त्र
जन्यस्यापि कुतः परोक्षतेत्याशंक्यापरोक्षत्वप्रयोजकप्रत्यक्त्वोल्लेखाभावादित्याह॥ सच्चिदानन्दरूपस्य शास्त्राद्भा
नेऽप्यनुल्लिखन्॥ प्रत्यंचसाक्षिणं तत्तु ब्रह्मसाक्षान्नवीक्षत इति॥२८॥ सत्यं ज्ञानमनंतं ब्रह्मेति निःसंदिग्धो बु
द्धेः सत्योनुक्तो निरंजनः सद्धीदं सर्वं प्रकाशात्ते चेत्यादिशास्त्रात् तं सच्चिदानंदरूपस्य ब्रह्मणो भानेऽपि प्रत्यंचसा
क्षिणमनुल्लिखन्सन्तस्य ब्रह्मणः प्रत्यगात्मरूपत्वमजानानः तद्ब्रह्मसाक्षान्न वीक्षते नैवापरोक्षयतीति कथ्यते हि तस्माद्विधब्रह्म

गोचरस्य ज्ञानस्यैतत्त्वज्ञानत्वमसंभवं प्रमाणजन्यत्वादित्याह। शास्त्रोक्तेनैव मार्गेण सच्चिदानंदनिश्चयात् परोक्षमपि तज्ज्ञानं तत्त्व
ज्ञानं न विभ्रम इति॥१९॥ यस्मात्तज्ज्ञानं परोक्षमपि शास्त्रोक्तेनैव प्रकारेण ब्रह्मणः सच्चिदानंदरूपनिश्चयात्मकत्वात्सम्यग्ज्ञानमेव न भ्रम इत्यर्थः।
ननु सत्यज्ञानादिवाक्यैर्ब्रह्मणः सच्चिदानंदरूपत्वमिव तत्त्वमस्यादिवाक्यैः प्रत्यग्रूपत्वमपि तस्य बोध्यत एव॥ अतः शास्त्रजन्यस्या
पि ब्रह्मज्ञानस्य प्रत्यग्ब्रह्मैक्यविषयत्वादपरोक्षत्वमेवेत्याशंक्याह। ब्रह्म यद्यपि शास्त्रेषु प्रत्यक्त्वेनैव वर्णितं॥ महावाक्यैः तथाप्येत
द् दुर्बोधमविचारिणामिति॥२०॥ यद्यपि वेदांतेषु महावाक्यैर्ब्रह्म प्रत्यगात्मत्वेनैवोपदिष्टं तथाप्येतत्प्रत्यग्रूपत्वमन्वयव्यतिरे
काभ्यां त्वंपदार्थविवेकशून्यस्य दुर्बोधं बोधयितुमशक्यमतः केवलाद्वाक्यात्परोक्षज्ञानमुत्पद्यत इत्यर्थः। ननु सम्यग्ज्ञानस्य
प्रमाणवस्तुतंत्रत्वात् प्रमाणस्य च तत्त्वमस्यादिवाक्यरूपस्य सद्भावादस्मान्न प्रत्यक्षता तैकात्वन्न तज्ज्ञानस्य विद्यमानत्वा
त्कुतो विचारमपेक्षते दुर्बोधत्वमित्याशंक्याह। देहाद्यात्मत्वविभ्रांतौ जाग्रत्यां न हठात्पुमान्॥ ब्रह्मात्मत्वेन विज्ञातुं क्षमते मंदधीत्वत
इति॥२१॥ ब्रह्मात्मैकत्वापरोक्षज्ञानविरोधिनो देहेंद्रियादिष्वात्मत्वभ्रमस्य सद्भावाद् द्वितीयब्रह्मगोचरपरोक्षज्ञानमपि नोदिया
दित्याशंक्याह। परोक्षद्वैतभ्रमस्यापरोक्षाद्वैतज्ञानाविरोधित्वात्कुतो द्वावतः पुंसः शास्त्रात्परोक्षज्ञानमुत्पद्यत एवेत्याह। ब्रह्ममात्रं सुवि
ज्ञेयं श्रद्धालोः शास्त्रदर्शिनः॥ अपरोक्षद्वैतबुद्धिः परोक्षाद्वैतबुद्ध्यनुत्॥२२॥ अपरोक्षद्वैतबुद्धिर्यतः परोक्षाद्वैतबुद्ध्यनुदतो
ब्रह्ममात्रं सुविज्ञेयमिति योजना। अपरोक्षभ्रमस्य परोक्षसम्यग्ज्ञानाविरोधित्वे दृष्टांतमाह। अपरोक्षशिलाबुद्धिर्न परोक्षेश
तां नुदेदिति। विरोधाभावमुदाहरणं दर्शयति॥ प्रतिमादिषु विष्णुत्वे को वा विप्रतिपद्यत इति॥२३॥ केचन विप्रतिपद्यमाना
अपलभ्यन्त इत्याशंक्याह। अश्रद्धालोरविश्वासो नोदाहरणमर्हति॥ कुत इत्यत आह॥ श्रद्धालोरेव सर्वत्र वैदिकेष्वधि
अधिकारत इति॥२४॥ सर्वेषु वेदोक्तानुष्ठानेषु श्रद्धावत एवाधिकारादित्यर्थः। एतावता तावत्परोक्षज्ञाने किमायातमित्यतआ

विचारनिवर्त्यस्य सद्भावान्नोदयते ये विचारोपेक्ष्यत इत्यर्थः ननु तर्हि देहेंद्रियादिगोचरस्य द्वैतभ्रमस्य)

७८

स॥ सकृदाप्तोपदेशेन परोक्षज्ञानमुद्भवेदिति॥ तन्मुख्यत्वेनोक्तानुभवेन दृढयति॥ विद्धमस्त्वपदेशो हि न मीमांसामपेक्षत इति॥२५॥ ननु तर्हि
कुतः शास्त्रेषु विचाराः क्रियंत इत्याशंक्यानुष्ठेययोः कर्मोपासनयोः संदेहसंभवात्तन्निर्णयाय विचाराः क्रियंत इत्याह॥ कर्मोपास्ती
विचार्येते अनुष्ठेयार्थविनिर्णयादिति॥ संदेहसंभवमेवोपपादयति॥ बहुशाखाविप्रकीर्णं निर्णेतुं कः प्रभुर्नर इति॥२६॥ अनेका
शाखासु तत्र तत्र चोदितं कर्मोपासनं वा एकत्र समाहृत्य निर्णेतुमस्मदादिर्नरः प्रभुः समर्थः कः न कोपीत्यर्थः॥ ननु तर्हि ननु यत्व २
मेव कर्मोपासनयोः प्राप्तमित्याशंक्याह॥ निर्णीतोर्थः कल्पसूत्रैर्ग्रथितस्तावतास्तिकः विचारमंतरेणापि शक्तोनुष्ठातुमंजसेति
॥२७॥ जैमिन्यादिभिः पूर्वाचार्यैः निर्णीतो योनुष्ठानप्रकारः कल्पसूत्रैः संग्रहीतोस्ति तावतातैः ग्रथितत्वेन वतेषु विश्वास
वान्पुरुषो विचारं विना वि कर्म सम्यगनुष्ठातुं शक्नोत्येव॥ ननु तर्ह्युपासनाविचाराभावान्नदनुष्ठानं कथं संभवेदित्याशंक्याह॥
रूपास्तीनामनुष्ठानमार्षग्रंथेषु वर्णितं॥ विचाराक्षममर्त्यास्ततः कुर्वोपासते गुरोरिति॥२८॥ आर्षग्रंथेषु ब्राह्मणवासिष्ठादिमंत्र
कल्पेषूपासनानुष्ठानप्रकारो वर्णितः तत्वविचारासमर्था मनुष्याः कल्पेषूक्तं तदुपासनं गुरुमुखादवगत्यानुतिष्ठंतीति भावः
ननु तर्हीदानींतनैरपि ग्रंथकर्तृभिः वेदवाक्यविचारः कुतः क्रियत इत्याशंक्य स्वबुद्धिपरिशोधायैव क्रियते नानुष्ठानसिद्ध्ये
इत्याह॥ वेदवाक्यानि निर्णेतुमिच्छन्मीमांसतां जनः॥ आप्तोपदेशमात्रेण ह्यनुष्ठानं तु संभवेदिति॥२९॥ ननु ब्रह्मोपासनवद्ब्रह्मसाक्षा
त्कारस्याप्युपदेशमात्रादेवासिद्धिः किं न स्यादित्याशंक्याह॥ ब्रह्मसाक्षात्कृतिस्त्वेवं विचारेण विना नृणां॥ आप्तोपदेशमात्रे
णान संभवति कुत्रचित्॥ आप्तोपदेशमात्रेणोपासनानुष्ठानोपयोगि परोक्षज्ञानमुत्पाद्यते अपरोक्षज्ञानं तु विचारमंतरेण न जा
यत इत्युक्तं तत्र कारणमाह॥ परोक्षज्ञानमश्रद्धा प्रतिबध्नाति नेतरत्॥ अविचारोऽपरोक्षस्य ज्ञानस्य प्रतिबंधक इति॥३०॥
यतः अविद्यास एव परोक्षज्ञानं प्रतिबध्नाति नाविचारोऽतस्तन्निवृत्तौ सकृदुपदेशादेव परोक्षज्ञानमुत्पद्यते॥ अवि

चारत्रितयाद्भवति परोक्षज्ञानस्य तु विचारद्वारा तन्निवृत्तिं मतरेवोत्पत्तिर्न संभवति अतो विचारः कर्तव्य इति भावः ननु विचारेण
तेपि यदा परोक्षज्ञानं न जायते तदा किं कर्तव्यमित्यत आह।। विचार्यापरोक्षेण ब्रह्मात्मानं न वेत्ति चेत्।। अपरोक्षावसानत्वाद्भूयो
भूयो विचारयेत् इति।। ३२।। तत्त्वपदार्थौ सम्यग् विचार्यापि वाक्यार्थं ब्रह्मात्मैकत्वमपरोक्षतया न जानाति चेत् तदा पुनः पुनर्विचारस्य
वकर्तव्यो परोक्षज्ञानहेतोरस्य अभावादिति भावः ननु भूयो भूयो विचारेणापि इहसाक्षात्कारानुदये सति विचारो व्यर्थः स्यादित्याशंक्याह।। वि
चारयन्नामरणं नैवात्मानं लभेत चेत्।। जन्मान्तरे लभेतैव प्रतिबन्धक्षये सतीति।। ३३।। ननु इदं कुतो ऽवगतमित्याशंक्य अत्र सूत्रकृता
स्यासेनैहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनादित्यस्मिन् सूत्रे ऽभिधानादित्याह।। इह वामुत्र वा विद्येत्येवं सूत्रकृतोदितमिति।। सतिप्र
तिबन्धे तद्दर्शनादित्यस्मिन् सूत्रे ऽभिधानादित्याह।। इह वामुत्र वा विद्येत्य इह जन्मनि श्रवणादि कर्तुर्जन्मान्तरे परोक्षज्ञानं भवती यत्रापि गर्भेनुसं
वेन्नेवामवेदमहं देवानां जनिमानि विश्वेत्यादिना जन्मान्तरे परोक्षज्ञानं भवती यत्रापि गर्भेण का श्रुतिमर्थवत्तां पवति।। गर्भ एव शया
नः सन्वामदेवो ऽवबुद्धवानेवं पूर्वाभ्यस्तविचारेणेति।। इह जन्मन्यनुत्पन्नस्य ज्ञानस्य कालान्तरोत्पत्तौ दृष्टान्तमाह।। यद्वदध्ययनादिच्छिति
तेष्वत्र वयवो यत्नवि।। ३४।। दृष्टान्तं विवृणोति। बहुवारमधीतेपि तदा नायाति चेत्पुनः दिनान्तरे ऽनधीत्यैव पूर्वाधीतं स्मरेत्पुमान् इति।। ३६।। आदित्रा
बेन परिगृहीतानि दृष्टान्तान्तराण्याह।। कालेन परिपच्यन्ते कृषिगर्भादयो यथेति।। दार्ष्टान्तिके योजयति।। तद्वदात्मविचारोपि शनैः
कालेन पच्यते इति।। ३७।। बहुवारं विचारितेपि तत्त्वे प्रतिबन्धवशात्साक्षात्कारो न जायते इत्येतद्वार्त्तिककारैरपि निरूपितमित्याह।। पुनः पुनर्विचारेपि त्रिविधप्रतिबन्धतः।। नवेत्तितत्त्वमित्येतद्वार्त्तिके सम्यगीरितमिति।। ३८।। तान्येव वार्त्तिकान्युदाह
रति।। कुतस्तज्ज्ञानमित्यादिना भरतस्य त्रिजन्मभिरित्यन्तेन तत्र तावत्पूर्वमनुत्पन्नस्य ज्ञानस्येदानीमुत्पत्तौ कारणं पृच्छति।। कु
तस्तज्ज्ञानमिति चेदिति।। उत्तरमाह।। तद्धि बंधपरिक्षयादिति बंधः प्रतिबंधस्तस्य परिक्षयादित्यर्थः सोपि प्रतिबंधो ऽभू

यो देवस्य ... कृतोदितम्
... प्रतिबन्धे इह जन्मनि
... ज्ञानानुत्पत्तौ
... दर्शयति।। अत एवं
... वचस्यवो यत्नवि
... वृत्तिस्मृति)

तो भावी वर्तमानश्चेति त्रिविध इत्याह ॥ अस्मार्वापि चन्नेतो भावी वावर्त्तेत्यवेति ॥ ३४ ॥ भवत्वेवं त्रिविधः प्रतिबंधः ततः किमित्यत
आह ॥ अधीतवेदवेदार्थोप्यत एव न मुच्यत इति ॥ अत एव प्रतिबंधसद्भावादेव स्यार्थः मतिप्रतिबंधे ज्ञानं नोदेतीत्येतदर्थं हि रत्नयनि
धिं निहितमधैव क्षेत्रज्ञा उपर्युपरि संचरंतोपि न विंदेयुः एवमेवेमाः सर्वाः प्रजा अहरहर्ब्रह्मलोकं गच्छंत्यो एनं ब्रह्मलोकं न विंदं
ति अनृतेन हि प्रत्यूढा इति ॥ अनयाश्रुत्या प्रदर्शितामित्याह ॥ हिरण्यनिधिदृष्टांतादिदमेव हि दर्शितमिति ॥ ४५ ॥ अनेचेतीतस्य प्रतिबंधक
त्वेन दर्शितमित्याशंक्याह ॥ अतीतेनापि महिषीस्नेहेन प्रतिबंधितः ॥ भिक्षुस्तत्त्वं न वेदेति गाथा लोके प्रगीयते इति ॥ ४६ ॥ अत्र यमर्थः
कश्चिद्यतिः पूर्वं गार्हस्थ्यदशायां कस्यांचिन्महिष्यां स्नेहं कृत्वा पश्चात्संन्यासमानंतरं श्रवणेप्यवबुद्ध्योपि तेनैव स्नेहेन जनितात्प्रति
बंधात्तत्त्वं गुरूपदिष्टमपि न ज्ञातवान् एवंविधगाथा लोके प्रगीयते न पुराणादिषु पठितेत्यर्थः तर्हि तथाविधस्य कथं ज्ञानोत्पत्तिरित्य
त आह ॥ अनुसृत्य गुरुः स्नेहं महिष्यां तत्त्वमुक्तवान् ॥ ततो यथावद्वेदैष प्रतिबंधस्य संक्षयादिति ॥ ४७ ॥ गुरुस्तस्य तत्त्वोपदिष्टात
दीयमाहिषीस्नेहं मनुसृत्य तस्या एव महिष्यास्तत्त्वं तन्महिष्युपाधिकं ब्रह्मोक्तवान् ॥ ततः सोपि महिषीस्नेहलक्षणप्रतिबं
धकापगमेन गुरूपदिष्टं तत्त्वं यथावदशास्त्रोक्तप्रकारेणैव ज्ञानवानित्यर्थः एवमतीतप्रतिबंधं प्रदर्श्य वर्त्तमानं तं दर्शयति ॥ प्रति
बंधो वर्त्तमानो विषयासक्तिलक्षणः ॥ प्रज्ञामांद्यं कुतर्कश्च विपर्ययदुराग्रह इति ॥ ४८ ॥ वर्तमानप्रतिबंधः चित्तस्य विषयासक्ति
रूप एकः प्रज्ञामांद्यं बुद्धेर्वैलक्षण्याभावः कुतर्कश्च शुष्कतार्किकत्वेनास्यार्थस्यान्यथोहनं विपर्ययदुराग्रहः विपर्यये आत्मनः
कर्तृत्वादिधर्मयुक्तत्वज्ञानलक्षणे दुराग्रहो युक्तिरहितोभिनिवेशः एतेषामन्यतमस्यापि सत्त्वे ज्ञानं नोदेतीत्यर्थः अस्यापि प्रति
बंधस्य केनापि निवृत्तिरित्यत आह ॥ शमाद्यैः श्रवणाद्यैश्च तत्र तत्रोचितैः क्षयम् ॥ नीतेस्मिन्प्रतिबंधेतः स्वस्य ब्रह्मत्वमश्नुते इति ॥ ४९ ॥ श
माद्यैः शमदमोपरतितितिक्षासमाहितो भूत्वेति श्रुत्युक्ताः शमादयः श्रवणाद्यैश्च श्रोतव्यो मंतव्यो निदिध्यासितव्य

श्वतिप्रश्नस्याभिहितैः एतैः साधनैः तत्र तत्र तस्य तस्य प्रतिबंधस्य निवर्तनेन चित्ते येऽपेक्षितस्मिन्नप्रतिबंधे दृश्यं नीते मम तद्विनाशितेऽसति, प्रतः
प्रतिबंधापगमादेवकस्य प्रत्यगात्मनो ब्रह्मत्वं प्राप्नोतीत्यर्थः इदानीं भाविप्रतिबंधं दर्शयति॥ अग्रामिप्रतिबंधश्च वामदेवे समीरित
इति॥ अग्रामिप्रतिबंधो जन्मांतरहेतुः प्रारब्धशेष इत्यर्थः तस्य च भोगमंतरेण निवृत्त्यभावान्न निरोद्धुं कालनियमो नास्तीत्याह॥
एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिरिति॥४५॥ स च एकेन जन्मना क्षीणो वामदेवस्येति शेषः भरतस्य त्रिजन्मभिः क्षीणा
इत्यनुषज्यते। न चैकेन जन्मना त्रिजन्मभिरिति नियतकालत्वं भवतीत्यन्वयत इत्याशंक्याह॥ योगभ्रष्टस्य गीतायामनीते बहुज
न्मनि॥ प्रतिबंधदोषः श्रीकृष्ण इति॥ योगभ्रष्टः तत्त्वसाक्षात्कारपर्यंततत्त्वविचाररहित इत्यर्थः तर्हि तत्त्वविचारो निष्फलः स्यादित्याशंक्या
ह॥ न विचारो व्यनर्थक इति॥४६॥ प्रतिबंधनिरसनेनैव तमेव वामदेवस्य ज्ञानत्व फलसंभवादिति भावः गीतायां प्रतिपादितमर्थं द
र्शयति प्राप्य पुण्यकृतामित्यादिना ततो यांति परां गतिमित्यंतेन॥ प्राप्य पुण्यकृतां लोकानात्मतत्त्वविचारतः॥ शुचीनां श्रीमतां गे
हे साभिलाषोऽभिजायत इति॥४७॥ योगभ्रष्टः आत्मतत्त्वविचारबलादेव पुण्यकृतां पुण्यकारिणां लोकान् स्वर्गविशेषान् प्राप
प्य तत्र बहुकाले सुखमनुभूय तद्भोगावसाने साभिलाषश्चेदस्मिन् लोके शुचीनां मातापित्रोः शुद्धानां श्रीमतां कुले अभिजायते ऽपक्षांतर
माह॥ अथवा योगिनामेव कुले भवति धीमतां॥ निस्पृहो ब्रह्मतत्त्वस्य विचारादिति॥ निस्पृहः स्वर्गादिभोगविरक्तश्चेद्ब्रह्मतत्त्वविचा
रादेः यथा मतामात्मतत्त्वनिष्ठस्य विचारवतां योगिनां चित्तैकाग्र्यवतां कुले भवति जायत इत्यर्थः पूर्वस्मात्पक्षात् कोऽतिशय इत्यत आह॥
तद्धि दुर्लभतरमिति॥४८॥ हि यस्मात्कारणात् योगिकुले जन्म दुर्लभमल्पपुण्यैर्नालभ्यमित्यर्थः तस्य दुर्लभत्वमुपपादयति॥ तत्र तं बु
द्धिसंयोगं लभते पौर्वदेहिकं पूर्वदेहे भवं तं बुद्धिसंयोगं तत्त्वविचारगोचरबुद्धिसंबंधं शीघ्रमेव लभते प्राप्नोति न केवलं बुद्धिसंब
मात्रेलाभः किंतु ततः पूर्वस्मात्प्रयत्नात् भूयो यतते चाधिकं प्रयत्नं करोति तस्मादेतज्जन्म दुर्लभमित्यर्थः भूयोभ्यासे कारणमाह

र्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः॥ अनेकजन्मसंसिद्धस्ततो याति परां गतिमिति॥१५०॥ सयोगभ्रष्टः तेन पूर्वाभ्यासेनैवाव
शोप्यस्वाधीनोपि ह्रियते आकृष्यते एव अनेकेषु जन्मसु कृतेन प्रयत्नेन संसिद्धः तत्वज्ञानसंपन्नः ततस्तस्मात्तत्वज्ञानात्परं गति
मुक्तिं याति प्राप्नोतीत्यर्थः॥ आगामिप्रतिबंधांतरं दर्शयति॥ ब्रह्मलोकाभिवांछायां सम्यक् सत्यां निरुध्यतां॥ विचारयेद्यआ
त्मानं न तु साक्षात्करोत्ययमिति॥१५२॥ ब्रह्मलोकप्राप्तीच्छायां दृढायां सत्यां तां निरुध्य य आत्मानं विचारयेत्तस्य साक्षात्कारो नैव जा
यत इत्यर्थः॥ ननु तर्हि तस्य कदापि मुक्तिर्न स्यादित्याशंक्याह॥ वेदांतविज्ञानसुनिश्चितार्थ इति शास्त्रतः ब्रह्मलोके स कल्पांते ब्र
ह्मणा सह मुच्यत इति॥१५३॥ वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः ते ब्रह्मलोके तु परांतकाले परामृतात्प
रिमुच्यंति सर्वे ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमित्यादिशास्त्रवशाद्ब्रह्मलोकप्रा
प्त्यनंतरं तत्त्वज्ञानात् कल्पांते ब्रह्मणा सह मुक्तिर्भविष्यतीत्यर्थः॥ एवं तत्त्वविचारे क्रियमाणेपि प्रतिबंधवशात्तत्वसाक्षात्कारो न जायत इत्यभि
धाय तीव्रपापिनां तु सोपि विचारो दुर्लभ इत्याह॥ केषांचित्तद्विचारोपि कर्मणा प्रतिबध्यते इति॥ तत्र प्रमाणमाह॥ श्रवणाया
पि बहुभिर्यो न लभ्य इति श्रुतेरिति॥१५४॥ यः परात्मा बहुभिः पुरुषैः श्रवणायापि श्रोतुमपि न लभ्यो दुर्लभ इत्यर्थः एतावतास
प्रतिबंधे तत्त्वसाक्षात्कारे तत्साधनभूतो विचारश्च न संभवतीत्यभिधायेदानीं विचारासमर्थेन पुरुषेण किं कर्तव्यमित्य
पेक्षायां विचारासमर्थस्य तत्कृतोपासनं गुरुरिति यस्याकर्तृत्वात्तदुपपादयति॥ अत्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्य
संभवात्॥ यो विचारं न लभते ब्रह्मोपासीत सोनिशमिति॥१५५॥ सामग्र्यसंभवो नाम तदुपदेष्टुर्गुरोरध्यात्मशास्त्रस्य
देशकालादेर्वासंभवः तस्मादित्यर्थः॥ ननु निर्गुणब्रह्मतत्त्वस्य गुणरहितस्यैकत्वान्नदुपासनं न घटत इत्याशंक्योपास
नस्य प्रमयाविरूपत्वात् सगुणब्रह्मणीव निर्गुणेपि तत्संभवतीत्याह॥ निर्गुणब्रह्मतत्त्वस्य न ह्युपास्तेरसंभवः सगु

ला ब्रह्मत्वी वा च प्रत्ययत्वं विशिष्टं स्याद्विति ॥ ५५ ॥ ननु निर्गुणस्य ब्रह्मणो वाङ्मनसागोचरस्यैवात्मत्वात्तस्यैवोपास्यत्वमित्या
शंक्य वेदनपक्षे पर्यदोषः समान इत्याह ॥ ७ ॥ यद्वाङ्मनसगम्यं तस्योपास्यमिति चेत्तदा ॥ ७ ॥ यद्वाङ्मनसगम्यस्य वेदनं न
च संभवेदिति ॥ ५८ ॥ ननु ब्रह्म वाङ्मनसागोचरमिति श्रुत्यैव ज्ञातं केनाकारेणोपास्यमित्याशंक्य एवमेवोपासितुमपि न शक्यमित्याह ॥
वागाद्यगोचरं ब्रह्म ज्ञातमिति चेत्तदा तस्यैव वागाद्यगोचराकारमित्युपासीत तन्नो कुत इति ॥ ५२ ॥ ब्रह्मणो न उपास्यत्वे सगुणत्वप्र
सज्येते त्याशंक्याह वेद्यत्वे पि तत्सगुणत्वे स्यादित्याह ॥ सगुणत्वमुपास्यत्वाद्यदि वेद्यत्वतोपि तदिति ॥ तत्सगुणत्वमिष्टं चेत् न
नन्वेवं सति तत्रोपाधि प्रत्यगात्मनो वेद्यत्वे सगुणत्वप्रसंगः स्यादित्याशंक्योपासनमपि तत्रैव क्रियतामित्याह ॥ वेद्यं चेद् लक्षणाद्य
र्थात् लक्षणे समुपास्यतां ॥ ५ ॥ ननु ब्रह्मणो नोपास्यत्वं श्रुत्या निषिध्यत इत्याशंक्याह ॥ ब्रह्मत्वं विद्धि न तदेव त्वं नेदं यदुपासते इति
नेरुपास्यत्वे निषिद्धं ब्रह्मणस्तदा यदीति ॥ ५९ ॥ यन्मनसा न मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति
श्रुतिरुपास्यस्य ब्रह्मत्वं निषेधतीति यर्थः । त्वं विद्धि वाङ्मनसागम्यं तदेव ब्रह्म विद्धि निर्गमतेत्यर्थः यदुपासते पुरुषाः तन्न विद्धीति योजना ॥ उपा
स्यत्ववद्वेद्यत्वमपि तत्र निषेधः समान इत्याह ॥ विदिताद्यदेवेति श्रुत्या वेद्यत्वमस्य नेति यदन्यदेवत्तं विदिताद्योर्वक्तादपि ब्रह्म
णो वेद्यत्वमपि निवारयतीत्यर्थः विदितान्यनादित्यर्थः विदिताविदिताभ्यामन्य इत्येतदश्रुतिः प्रतिपादयतीति चेन्नहिं तत्पदं
ज्ञानीयात्त इत्याशंक्योपासनेऽप्येतत्समानमित्याह ॥ यथा श्रुत्यैव वेद्यत्वं तथा श्रुत्याप्युपास्यतामिति ॥ ६० ॥ ननु वेद्यत्वं ब्रह्मस
णो वास्तवं न वा स्तवं न वास्तवं न ब्रवीति त्याशंक्योपास्यत्वमपि तथैवेत्याह ॥ यथा श्रुत्या अवास्तवी वेद्यता चेदुपास्यत्वं तथा न किमिति ॥
ननु वेदनपक्षे तत्र ब्रह्माकारत्वमस्ति नोपासन इत्याशंक्य शब्दलाभादाकारत्वमुभयत्र समानं इत्याह ॥ ब्रह्मत्वाप्तिर्वेद्यता चेदुपास्य
ते पि तथास्त्विति ॥ ६१ ॥ युक्तिभूम्यनुपालम्भः तत्पदे पि समान इत्याह ॥ यत्तेर्व्याप्तिर्वेद्यता च काले तज्ज्ञत्वमुपास्तौ चेत्कस्ते दोषः सदार

८२

येति॥ ननु निर्गुणोपासने प्रमाणं नास्तीत्याशंक्यानेकासु श्रुतिषूपलभ्यमानत्वान्नैवमित्याह॥ मानेनेत्यादिना वाक्यो
क्त्या बहुश्रुतिषु दर्शनादिति॥ ६२॥ बहुश्रुतिषु दर्शनादित्युक्तमर्थं विवृणोति॥ उत्तरस्मिंस्तापनीये शैब्यप्रश्नेथ
काठके॥ माण्डूक्यादौ च सर्वत्र निर्गुणोपास्तिरीरितेति॥ ६३॥ तापनीयोपनिषदि तावद्देवा ह वै प्रजापतिमब्रुवन्
? अणोरणीयांसमिममात्मानमोंकारं नो ब्रूहीत्यादिना बहुधा निर्गुणोपासनमभिधीयते॥ शैब्यप्रश्नोपनि
षदि च मे य एवं यः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीतेति काठके कठवल्ल्यां सर्वे वे
दा यत्पदमामनन्ति इत्युपक्रम्यैतद्ध्येवाक्षरं ब्रह्म एतदालम्बनं श्रेष्ठमित्यादिना प्रणवोपासनं विस्पष्टमुच्यते॥ माण्डूक्यो
पनिषदि ओमित्येतदक्षरमिदं सर्वमित्यादिना वस्यात्र यातीत तु र्योपासनमेव विधीयत इत्यर्थः॥ आदिशब्देन तैत्तिरीय
मुण्डकादयो गृह्यन्ते॥ ननु निर्गुणोपासनं कथमनुष्ठेयमित्यत आह॥ अनुष्ठानप्रकारोऽस्याः पञ्चीकरण ईरित इति॥ ननु
तदुपासनं ज्ञानसाधनं मुक्तिसाधनमनुष्ठेयमित्याशंक्य ज्ञानसाधनत्वोपास्यामि मुच्यते इति वदतामस्माकमननुकूलमित्या
शंक्य साधयेतच्चेन्नेति केनात्र वारितमिति॥ ६४॥ ननु सगुणोपासनमेव सर्वैरनुष्ठीयते न निर्गुणोपासनमित्या
शंक्य तस्य प्रमाणसिद्धस्याननुष्ठानाभावेनाज्ञानेनापरित्याज्यत्वादपलापो न युक्त इत्याह॥ नानुतिष्ठति कोऽप्येन
दिति चेन्नानुतिष्ठतु पुरुषस्यापराधेन किमुपास्तिः प्रदुष्यतीति॥ ६५॥ प्रमाणसिद्धस्याननुष्ठानाभावेनापरित्याज्यत्वे दृ
ष्टान्तमाह॥ इतोप्यतिशयं मत्वा मन्त्रान्वश्यादिकारिणः। मूढाः कर्षमुपासनमिति॥ ६६॥ अयमभिप्रायः यथा सम्यग्

लोपासनेनस्य कालांतरभाविफले मोचनरूपादिकार्ये मंत्रेषु दृष्टोऽहिकफलप्रदत्वमतिशायेन तु दृष्टं ह्यमूढानां नानामंत्रजपादौ प्रवृत्ता
वपि विवेकिनः सगुणोपासनेन परित्यज्य तेन यथावाविनियमानुष्ठापयेद्येभ्यः ते मोऽपि मंत्रेभ्यः कृष्णादावतिशायेनित्य
मंत्रे रूपे स्तेमत्वामृतत्वराणां तत्र प्रवृत्तावपि न तन्मंत्रानुष्ठानं तत्सगुणोपासनं तेन यथा संसारिकफलप्रेप्सूनां निर्गुणोपासनानु
ष्ठानावपि न मुमुक्षूणां निर्गुणोपासनं त्यजते इति ॥ एवं प्राक्शरीरसंबंधस्य मायाप्रकरणमनुसरति ॥ ८ ॥ तिष्ठंतु मूढाः प्रकृतानि
गुणोपासिस्तरीरितां यंत इति ॥ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषादित्युक्तन्यायेन निर्गुणोपासनं सकलानां सगुणा
वा मुमुक्षूणामनुपास्य गुणोऽनेकत्रोपसंहृतः उपासनं कर्तव्यमित्याह ॥ विद्विद्वित्सर्वशाखास्थान् गुणान् मंत्रोपसंहरे
दिति इति ॥ ते च गुणाः द्विप्रकाराः विधेया निषेध्याश्चेति तत्रानंदो ब्रह्म विज्ञानमानंदो ब्रह्म नित्यः शुद्धो बुद्धः सत्यो
मुक्तो निरंजनो विभुरद्वयः आनन्दः परः प्रत्यगेक इत्येकरसत्वादयो ये विधेयगुणाः तेषामुपसंहार ॥ आनंदादयः प्र
धानस्य सर्वत्र ह्यधिकरणेऽभिहित इत्याह ॥ आनंदादेर्विधेयस्य गुणसंघस्य संहृतिः ॥ आनंदादयः प्रधानस्येति सूत्रे
व्यासेन वर्णितेति ॥ ९ ॥ ये चास्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमस्पर्शमरूपमव्ययमित्यादयो नि
षेध्यगुणाः तत्र तत्र श्रुताः ते चामुपसंहारो ह्यक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तमित्यस्मिन्सूत्रे
धिकरणेऽभिहित इत्याह ॥ अस्थूलादीनां निषेध्यस्य गुणस्योपसंहृतिः पतञ्जलिव्यासेन सूत्रे स्मिन्नुक्ता ह्यक्षरधियां
त्विति ॥ १० ॥ ननु निर्गुणब्रह्मविद्यायां निर्गुणोपसंहारणं युक्तं निर्गुणविद्यात्वाविशेषात् तस्मात् सगुणे सत्र ८३

कारेणान्तर्हितस्योपसंहारस्यास्मान्निरभिधीयमानत्वाच्चास्माभिस्तदिदं चोद्यमनुचितमित्याह॥ निर्गुणब्रह्मतत्त्वस्यैव
द्यावंधुत्वात्संस्मृतिः॥ नयुक्तेतेषूपात्तत्वेनोभासप्रसंगेवमांतु नेति॥ ७१॥ हिरण्यश्मश्रुत्वादिगुणविशिष्टमूर्तीनामु
मनसि ध्यानादिदोनिर्गुणोपासनमेवेति चेत्तर्हि नविरोध इत्याह॥ हिरण्यश्मश्रुसूर्यादिमूर्तीनामनुदाहृतेः
प्रविसृष्टे निर्गुणत्वमिति चेत्तुष्पत्तात्वचेति॥ ७२॥ हिरण्यश्मश्रुसूर्यादिमूर्तीनां हिरण्मयानि श्मश्रूणि यस्या
सौ हिरण्यश्मश्रुः तथाविधः सूर्यो हिरण्यश्मश्रुसूर्यः सत्यादि येषां ते हिरण्यश्मश्रुसूर्यादयः तेषां मूर्तयो हिरण्य
श्मश्रुसूर्यादिमूर्तयः तासामिति विग्रहः॥ नन्वादित्यादीनां स्थूलादीनां च गुणानामुपासनत्वेतः प्रवेशाभावान्नु
तद्विशिष्टत्वेन कथमुपास्यत्वमित्याशंक्य तेषां तत्कृतः प्रवेशाभावेपि तेषां तद्वैकत्वसंभवाद्विवक्षितं ब्रह्मोपास्यमि
त्याह॥ गुणानां तत्कृतत्वेन तत्वेतः प्रवेशनं॥ इति चेदस्त्वेवमेवं ब्रह्मतत्त्वमुपास्यतामिति॥ तस्योपासनप्रकारमेवदर्शय
ति॥ ब्रह्मैवाहमिति स्थूलमिरस्थूलत्वादिभि[illegible]मात्रलक्षितः॥ ब्रह्मैकरसः सोहमस्मीत्येवमुपासत इति॥ ७३॥ ब्रह्मास्मु
स्मृतनुयोरखंडैकरसत्राक्षात्रानंदादिभिरस्थूलत्वादिभिश्च गुणैर्लक्षितः॥ सोहमस्मीत्येवमुपासते मुमुक्षुव इति
शेषः नन्वेवमपि विद्योपासनयोः कुतो भेदः इत्याशंक्य वस्तुतंत्रत्वकर्तृतंत्रत्वाभ्यां भेद इत्याह॥ बोधोपास्त्योर्वि
शेषः क इति चेदुच्यते[illegible]॥ वस्तुतंत्रो भवेद्बोधः कर्तृतंत्रमुपासनमिति॥ ७४॥ वेदान्तवाक्यात्तत्त्वमस्यादेर्यो बोधस्सहि
त्वादिकं[illegible]॥ विचाराज्जायते इत्यादिना श्लोकद्वयेन॥ विचाराज्जायते बोधो निच्छा यं न निवर्तये
त्॥ स्वोत्पत्तिमात्रात्संसारे दहत्यखिलसत्यतां॥ ७५॥ नावता कृतकृत्यः स्यान्नित्यमुक्तिमुपागतः जीवन्मुक्तिमनु
प्राप्य प्रारब्धक्षयपर्यंतं दत इति॥ ७६॥ विचारादुत्तत्त्वविचाराद्बोधो जायते किंच विचारवतां ज्ञायमानं यद्बो

श्र

धर्मानिष्ठा बोधो मा भूदित्येवं रूपान्न निवर्तयेत् न निवारयेत्॥ तत्त्वपदार्थमात्रबोधः स्वजन्ममात्रात् संसारे खिलस्य प्रपंचस्य
स्वरूपान्तं रहितं नाशयति॥ तावता तत्त्वज्ञानोत्पत्तिमात्रेण निरतिशयं सुखं प्राप्नोतीत्यर्थः॥ उपासनायाश्च बोधो हेतुत्वे द्वै
त्यां नरोऽभिद्रुयेत हर्षयति॥७५॥ शास्त्रोपदेशो विश्वस्य शुद्धात्मरूपं विचारयन्॥ चिंतयेत् प्रत्ययैरन्यैरनंतरितवृत्तिभिरि
ति॥७६॥ शास्त्रस्य गुरोरुपदेशात् मुपास्यस्वरूपं प्रतिपादकवाक्यजातं विश्वस्य विश्वासं कृत्वा विचारयन्नुपास्यतत्त्वं
प्रत्ययैरन्यैर्घटादिविषयैरनंतरितवृत्तिभिरनवच्छिन्नवृत्तिभिः चिंतयेदिति किंयत्कालं चिंतयेदित्याशंक्याह॥ याव
द्विस्मयस्य रूपाभिमानः स्वस्य जायते तावद्विचिंत्य पश्चाद्बुद्धत्यैवामृतिधारयेदिति॥७७॥ उपासकस्य तद्रूपकाभि
मानमुदाहरणप्रदर्शनेन स्पष्टीकरोति॥ ब्रह्मचारी मित्रमातापूतः संवर्गविद्यया॥ संवर्गरूपतां चितेधारयित्वा
ह्यभिमन्यते॥७८॥ कश्चित् संवर्गविद्यानुष्ठाता उपासको ब्रह्मचारी भिक्षाहरणार्थं मागत्य अभिप्रतारिणा
म्ना राज्ञः पुरतो महात्मनः चतुरो देव एकः कः स जगार भुवनस्य गोपाः तं कापेय नाभिपश्यंति मर्त्या अभिप्रतारिन् बहु
धा वसंतमिति मंत्रेणात्मनः संवर्गरूपत्वं चत्तं प्रकटीकृतवानिति छांदोग्ये श्रूयत इत्यर्थः॥ श्रवणमननधारणेनि
श्चितं देहात्म्यवत्कालावधिं निवर्तयेदित्यन्तो हि धर्मी द्वैतत्वं च लयमाह॥ पुरुषस्येच्छया कर्तुमकर्तुमन्यथा॥ शास्त्रोपा
स्ति रत्रोऽनिसंकुर्यात्प्रत्ययावर्तनमिति॥७९॥ उपास्तिः पुरुषस्योपासकस्येच्छया कर्तुमकर्तुमन्यथा वा प्रकारांतरे
ण वा कर्तुं शक्या॥ अतः पुरुषस्येच्छाधीनत्वादुपासनं सर्वदा कुर्यादित्यर्थः॥ एवं सदा चिंतनेन किं भवतीत्यत आह
वेदाध्यायी ह्यप्रमत्तोऽधीते स्वप्नेऽपि वासितः॥ जपिता वा जपत्येवं तथाध्यातापि वासयेदिति॥८०॥ अप्रमत्तो वे
दाध्यायी सदाध्ययनशीलः जपिता सदा जपशीलो वा वासितेदृढवासनया स्वप्नेऽपि अध्ययनं जपं वा करोति॥ एवमु

पामस्क्वोपवासनाद्वासी स्वप्नादावपि ध्यायती स्पर्धः स्वप्नादावपि ध्यानानुवर्तने कारणमाह ॥ विरोधिप्रत्ययं त्य-
क्त्वा नैरन्तर्येण ध्यायन् नरः तत्त्वैव वासनावेशात्स्वप्नादावपि भावनामेति ॥ ८२ ॥ वासनावेशात् संस्कारपाटवात् स्व-
वानाध्यानेन नानुप्रारब्धकर्मफलं भुञ्जानस्य ध्यानानुभवतः कथं नैरन्तर्येण ध्यावनासिद्धिरित्याशङ्क्य तत्र सम्यगाति येरा
भर्तीविषयव्यसनवद्भावनासिद्धिः स्यादित्याह ॥ भुञ्जानोऽपि निजारब्धमास्थातिशयतोऽनिशम् ॥ ध्यातुं शक्तो
न संदेहो विषयव्यसनी यथा ॥ ८३ ॥ दृष्टान्तं विवृणोति ॥ परव्यसनिनी नारी व्यग्रापि गृहकर्मणि । तदेवास्वाद-
यत्यन्तः परसङ्गरसायनम् ॥ ८४ ॥ परसङ्गास्वादनेन गृहकृत्यविच्छेदः स्यादित्याशङ्क्याह ॥ परसङ्गं स्वादयन्त्यपि
नो गृहकर्म तन्नैति । कुण्ठीभवेदपि त्वेतदापातेनैव वर्तते इति ॥ ८५ ॥ आपातेनैव वर्तते इत्युक्तं प्रपञ्चयति ॥ गृहकृत्यव्यस-
नी यथा सम्यक्करोति तत्तथा । परव्यसनिनी तद्वन्न करोत्येव सर्वथा इति ॥ ८६ ॥ दार्ष्टान्तिके योजयति ॥ एवं ध्यानैकनिष्ठोऽपि
लेशाल्लौकिकमाचरेदिति ॥ ननु तत्त्वविदोऽपि लौकिकव्यवहारे किं लेशेनाचरति किं वा सम्यगिति विषये व्यवहारस्य
तत्त्वज्ञानाविरोधित्वात्सम्यगेवेत्याह ॥ तत्त्वविदविरोधित्वाल्लौकिकं सम्यगाचरेदिति ॥ ८७ ॥ अविरुद्धत्वमेव
दर्शयति ॥ मायामयः प्रपञ्चोऽयमात्मा चैतन्यरूपधृक् ॥ इति बोधाविरोधः को लौकिकव्यवहारिणः ॥ ८८ ॥
विरोधाभावमेव प्रपञ्चयति ॥ अपेक्षते व्यवहृतिर्न प्रपञ्चस्य वस्तुताम् ॥ नात्मजाड्यं किं त्वेषा साधनान्येव कां-
क्षतीति ॥ ८९ ॥ कानि तानि व्यवहारस्य साधनानीत्यत आह ॥ मनोवाक्कायतद्बाह्यपदार्थाः साधनानि तान् ॥ तत्त्वविन्नो-
पमर्दाति व्यवहारोऽस्य नो कुत इति ॥ ९० ॥ तत्त्वबोधोऽप्यपदार्था मनआदयः तान्मनआदीन् तत्त्ववित् नोपम-
र्दातीति तत्त्वज्ञानिनि व्यवहारप्रतिबन्धकत्वाभावाद्व्यवहारः कुतो न भवेत् भवत्येवेत्यर्थः ॥ ननु विषयाननुपमर्दयन्नेव तत्त्व

विशिष्टचित्तोपर्हि नैकार्थमित्याशंकात उपाधिकरणोत्तरत्वविशेषेणस्यादित्याह॥ उपमर्द्दाल्लिंगं चतन्यतेच्छा तासौ ततत्वं वित स्यते॥ न
तु तत्त्वविदा चित्तं नोपमृद्यते इत्येतत्कुतः दृष्टमित्याशंक्याह॥ न बुद्धिमर्दयन् दृष्टो घटतत्त्वस्य वेदितेति॥ १९॥ घटतत्त्वस्य
वेदिता बुद्धिमर्दयन् पीडयन् कामं कुर्वन् पुरुषो न दृष्टो न प्रत्यक्ष इत्यर्थः॥ ननु घटस्य स्थूलत्वेन स्पष्टत्वात् तत्तद्दर्शने
चित्तपीडनं नापेक्षते॥ ब्रह्मणस्तु सूक्ष्मत्वात् तज्ज्ञाने तदपेक्षा इत्याशंक्याह॥ तस्मात् सप्रकाशत्वेन घटादेरपि स्पष्टतरत्वाद्धि
तत्पीडने चित्तं नैवापेक्ष्यत इत्याह॥ सकृत्प्रत्ययमात्रेण घटस्फुरणं सततं यदा॥ स्वप्रकाशोऽयमात्मा किं घटवन्न प्रमेयत इ
ति॥ २०॥ ननु ब्रह्मणः स्वप्रकाशत्वेपि तस्य चरमवृत्तिवेद्यत्वं नेत्यात्मस्यास्मद्दर्शित्वात् कार्येण ब्रह्मणः पुनःपुन
रवस्थानमपेक्ष्यत इत्याशंक्याह बोधं घटादिष्वपि स्मार्तमित्याह॥ स्वप्रकाशतया किंतु तद्बुद्धिस्तत्त्ववेदनं॥ बुद्धिक्षयेपि
नाश्यर्तानि बोधस्तु तुल्यं घटादिष्विति॥ २१॥ घटादिज्ञानस्य सत्यत्वेपि सकृत्प्रवृत्तस्य घटस्य सर्वदा व्यवहारहेतुत्वाक
त्वात् एतत्तुल्यमित्येव ब्रह्मबोधस्य ध्यानापेक्षा नास्ति कार्यादिव्यवहारसिद्धिरित्याह॥ घटादौ निश्चिते बुद्धिर्न नश्यत्येव यद्य
घट॥ इष्टोपि न तु तदा शंकावतीति चेत्समं मातरि॥ २२॥ प्रमात्मतत्वनीत्युक्तमर्थविवक्षितेति॥ निश्चयस्य सत्कदाचित्तेनैव दर्श
नात्तदेव तन्न॥ वक्तुं मतं तत्त्वात् ध्यानात्कतृत्वेनैव हि तत्त्वविदिति॥ २३॥ ननु तत्त्वविदुपासकवदात्मानुसंधानवशात्तु गद
नुसंधानरहितो दृश्यत इत्याशंक्यानुसंधानाभावो ध्यानप्रयुक्तो न वेदनप्रयुक्त इत्याह॥ उपासक इव ध्यायन्लौ
किकं विस्मरेद्यदि॥ विस्मरत्येव सा ध्यातृहिस्मृतिर्न तु वेदनादिति॥ २४॥ ध्यानवृत्तिदापि मुक्तिप्रसिद्धये ध्यानेकर्तव्य
मित्याशंक्य ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते॥ तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय॥ ज्ञानादेवं
मुच्यते सर्वपापैरितिसादरात्मा सद्भावान्मोक्षसिद्धये ध्याने कर्तव्यमित्याह॥ ध्यानं त्वैच्छिकं मेतत्स्य वेदनान्मुक्ति

। सेवितः॥ हीनादेव तु केत्यर्थमिति शास्त्रेषु दृढि रिमः॥ ननु तत्वविदो ध्यानानभ्युपगमे तस्य समाधावहिः प्रवृत्तिः स्या
दित्याशंक्याबाधकत्वात् कैवल्य तैः प्राप्य येत इत्याह॥ तत्वविद्यादि नध्याये स्व वैतन्तदावहिः॥ प्रवृत्ते
तां मुखे नाथ दोषा यो मम प्रवर्त्तने इति॥ ९८॥ ननु बहिः प्रपंचस्याभ्युपगमे तद्विप्रसंगोऽस्मादित्यात्माशंक्य प्रसंगस्य
दुर्निरूपत्वाच्चैवमिति परिहरति॥ अविद्यमाना इति चेत् स्मान्ता वदीरे रतिः॥ न प्रसंगो दुर्निरूपः॥ विधिशास्त्रस्य प्र
संगाशंके न विवर्त्तिततत्त्वादिति चेत् तस्य हानिर्विषयत्वेन तत्त्वविद्विषयत्वाज्ञावादित्याह॥ प्रसंगो विधिशास्त्र
चेन तत्वविदं प्रतीति॥ ९९॥ विधिशास्त्राणि स्वफलसाधनत्वे बाधसे [illegible] स्याविधिया [illegible] स्याप विधि [illegible]
विद्विषयत्वे मेवदर्शयति॥ वर्णाश्रमवयोवस्थानि मानीयस्माद्विद्युते॥ तस्येवनिष्ठा [illegible] विधयः स्वकल्पिता
॥ १००॥ ननु तत्वविदोपि देहधारित्वेन वर्णाश्रमाद्यभिमानित्वमस्तीत्याशंक्याह॥ वर्णाश्रमादयो देहमा
यया परिकल्पिताः॥ नात्मनो बोधरूपस्येत्येवं तस्य विनिश्चय इति॥ १०१॥ ननु तत्वविन्निश्चय स्याव [illegible]
सेवतु तस्य कर्तृत्वं प्रतिपादयतीत्याशंक्य तदपि तस्याकर्तृत्वमेव बोधयतीत्याह॥ समाधिमथकर्माणि मा
करोतु करोतु वा॥ हृदयेनास्तसर्वास्थो मुक्त एवोत्तमाशय इति॥ १०२॥ यो हृदयेन बुद्ध्या अस्तसर्वास्थः अस्ता
परित्यक्ताः सर्वा [illegible] आस्था [illegible] विधः अत एवोत्तमाशयः उत्तम [illegible]
वो निर्मलज्ञानं यस्य स तथोक्तः स मुक्त एव अतः समाधिमथकर्माणीत्यत्र च यः विदुषः कर्तृत्वं मास्तां स त्वं च त
तरमुदाहरति॥ नैष्कर्म्येण न तस्यार्थस्तस्यार्थो न कर्मभिः॥ न समाधानजाप्याभ्यां यस्य निर्वासनं मन इति॥
१०३॥ नैष्कर्म्येण कर्मराहित्येन कर्मत्यागेन सर्वैः समाधानेन समाधिः जाप्यं जपः॥ ननु विदुषा मपि वासनानिव

तेये ध्यानेकर्तव्यमित्याशंक्य समस्त[illegible]नोवामनेनैव नाडीत्याह॥ अत्राभ्यासं गरस्ततो मत्स्यादिं दृष्टान्तमाह माधिकं॥ इत्य
वंचलानि स्तीति कुतोमनसैवा मनेनेति॥२०॥ मवत्येवं प्रकृतोकस्मा यात्तमित्यत आह॥ एवंमासि प्रसंगोपिकुतोस्याति
प्रसंगजनमिति॥ कस्मात्तर्हि प्रति प्रसंगा इत्यत आह॥ प्रसंगो यस्मात्तस्मैव त्रोकेनातिप्रसंगजनमिति॥२१॥ एवं कृष्ट
मित्यत आह॥ विधियावान्नेवास्त्यस्माह तृपतेति प्रसंगेति॥ दार्ष्टान्तिके योजयति यस्मात्कुतोतिप्रसंगोयस्मा विधयमावे
प्रयोजकं सर्वं तत्रमस्ती) समेमतीति॥२२॥ वास्तर्विधयभावेप्रयोजकमस्त्वेव यस्तेनचिदुष्ट इत्याशंक्यतस्मात्
तमावोपिविधयभावप्रयोजके सर्वंतत्वमस्तीत्याह॥ नान्यो चर्तित्वालस्मेव्यवं वेसेवतत्त्वोवादिति॥ तर्हि विध्यायकारः
कस्येत्याशंक्याह॥ [illegible]स्यैव विधयः सर्वे सन्त्वन्यथा योरिति॥२७॥ ननु व्यासादिवत्कृपानुग्रहसाम
र्थ्यं यस्यैवं एव तत्रैव चिन्त्राम्य इतिचेत्कृते॥ ज्ञापानुमहसामर्थ्यं यस्यैतत्त्वं चिदिति॥ परिहरति॥ नतदिति
तत्र हेतुमाह॥ शापानुग्रहसामर्थ्यफलं यस्मात्तपसो यत इति॥२८॥ ननु व्यासादीनां तत्र विदामपि शापादि
सामर्थ्यं दृश्यते इत्याशंक्य तेषांनत त्वज्ञानफलमपितु तपसः फलमित्याह॥ व्यासादेरपि सामर्थ्यं दृश्यते
तत्रकोत्कर्षरिति॥ ननु तर्हि बुद्धत्वं जितात्मस्यैवेति प्रश्नस्य यो रहितस्य तत्त्वज्ञानमपि नघटते इत्याशंक्याशापादि
कारणात्स्यमातपसः सत्वान्नेवमित्याह॥ शापादिकारणादन्य तद्बोधानस्यकारणमिति॥२९॥ तर्हि तेषांव्या
सादीनां तत्रबत्वानि त्वं शापादिकारणत्वं च कथं दृश्यत इत्याशंक्यान्यविध तपसः सङ्गाद्वादित्याह॥ द्वयं समस्या
स्तिनत्सेव सामर्थ्यं ज्ञानशापयोः॥ एकैकं तु तपः कुर्वन्नैकैकं लभते फलमिति॥३०॥ ननु यः शापादिशक्तिसामर्थ्य
रहितः तस्य विधयभावोपि विहितानुष्ठानत्वं निषिद्धत्वं स्यादित्याशंक्य तेषामपि चिरपलं पवेर्त्तिध्य त्वेस्यादित्या

यां कुतेषां मर्त्यविषयत्वं सर्वैर्विधेयं तस्यादित्याह ॥ स्वाम ही नो निराकृते धर्तानिर्विधिवर्जितः ॥ नियत्ते यत्स्वाप्य
मेरनिरंजनं गत्वसंपटे रति ॥ २२ ॥ एतेत्विरागत्वस्य विषयासंपादयेयुरित्याशंक्य तदात्तेषां यस्तित्वमेवहीये
तेरत्र प्राप्येत्यहसर्तति ॥ निर्धसवः स्मादिर द्वेयुर्यद्वेते रागतुष्टये ॥ महायस्तित्वमेवेषांन्वेरायत्न रमत्यमिति
॥ २३ ॥ विषयलंपटैः पामरैः क्रियमाणया निंदया क्रियापराणां विशिष्टानां हानिर्नास्ति ॥ मुक्तस्य तु चेन्नास्ति हि देराग्नि
मर्ग्याचि: पामरैः क्रियमाणया निंदया तत्त्वविदोपि न हानिरित्याह ॥ वर्णाश्रमपरान्मूढान्निंदंत्वि स्तुच्य तेयदि
देहात्ममत योनिदित्ताश्रममानि न इति ॥ २४ ॥ प्रपंचगोकंपरिसमाप्त्यश्रकृतमनुवर्तते ॥ तदिन्द्र्य तत्त्वविज्ञाने
साधनानुपमर्दनात् ॥ ज्ञानिनाचरितुं शक्यमस्मगृज्ञापादि लौकिकर्मिति ॥ २५ ॥ तत्त्व समात्कारणादित्य मुक्तेन प्रकार
रणात्तत्त्वविज्ञानस्तसाधनानुपमर्दनात् ॥ लौकिकमपि कारस्साधनमंगमनस्मादी नामविलापमाद्यैर्विकं राज्या
दिराज्यपरिपालनादिकर्म तत्त्वविनासम्यगाचरितुं शक्यमित्यर्थः ॥ ननु तत्त्वविदः प्रपंचमिथ्यात्वज्ञानेन तन्नैर्षेचेना
दि यादिलिख्ने तर्हि स्वनिसारे वर्ततामित्याह ॥ मिथ्यात्वबुद्ध्यातत्रेच्छु नास्ति चेन्नर्हि समस्तु तत्वाद्ध्यायद्वेष्यमव
हरन्यायाप्राप्तं वसत्त्वयमिति ॥ २२ ॥ इदानीमुपासकस्य तत्त्वविदं दर्शयति ॥ उपासकस्तु सततं ध्यायन्नेव से
दिति ॥ तत्रोपपत्तिमाह ॥ यतः ध्यानेनैव कृतं तस्य ब्रह्मत्वमिति ॥ यतः कारणात्तस्य ब्रह्मत्वं ध्यानेनैवकृतं न स्वभा
वानसिद्धमिति प्रतोध्यायिना सदाध्यानं कर्तव्यमित्यर्थः तत्रदृष्टान्तः विष्णुत्वादिवदिति ॥ २६ ॥ यथा सर्वस्मिन्ध्याने

न संपादितस्य विष्णुत्वादेः पारमार्थिकत्वं नास्तीत्यादिस्वर्थः ध्यानसंपादितस्यापि तस्य पारमार्थिकत्वं किं न स्यादि
त्याशंक्य ध्यानसंपादितस्य वाग्धेनुत्वादेर्धर्मो नापायोऽपामरदृष्टान्तेनैवमित्याह॥ ध्यानोपादानकं यत्तद्ध्यानाभा
वे विलीयते इति॥ ज्ञानेन प्रकाशितस्य तु ब्रह्मत्वस्य ततो वैलक्षण्यमाह॥ वास्तवी ब्रह्मता नैव ज्ञानाभावे विलीयते इ
ति॥ ज्ञानेन न प्रकाशितेति(ति)॥१२६॥ ननु जन्मिति विरोधाग्नेयतो ब्रह्मत्वं वास्तवमत्ते ज्ञानेनाविर्भवति नैव विलीयते
वास्तवत्वादेव ज्ञानेनैनैव जन्यत इत्याह॥ ततोऽपि ज्ञापकं ज्ञानं न निर्जनयत्यदः इति॥ यतोऽदो ब्रह्मत्वं नित्यं ततो
ज्ञानं तस्याभिज्ञापकमव बोधकमेव न जनकमित्यर्थः। तत्रोपपत्तिं व्यतिरेकमुखेनाह॥ ज्ञापकाभावमात्रेण न हि सत्यं वि
लीयत इति॥१२८॥ अथ ... ब्रह्मत्वे यदि ज्ञानजन्यत्वं स्यात्तर्हि ज्ञानाभावे स्वयं विलीयेत न च विलीयते अतो न जन्य
त इत्यर्थः। ननु ज्ञानिवदुपासकस्यापि ब्रह्मत्वं वास्तवमस्त्येवेति शंकते॥ अस्त्येवोपासकस्यापि वास्तवी ब्रह्मतेति चेदिति
अत्रस्यास्त्येवेदमुच्यते इत्याशंक्याह॥ पामराणां तिरश्चां च वास्तवी ब्रह्मतास्ति किमिति॥१२९॥ पामरादीनां विद्यमानमपि ब्रह्म
त्वमज्ञानान्न पुरुषार्थाय यथा तथोपासकस्यापि समानमित्याह॥ अज्ञानादपुरुषार्थत्व
मुभयत्रापि तत्सममिति॥ ननु तर्हि उपासनं किमर्थमभिधीयते इत्याशंक्य इतरानुष्ठानेभ्यः श्रेष्ठत्वाभिप्रायेणोक्तमि
ति दृष्टान्तपूर्वकमाह॥ उपवासाद्यपेक्षया भिक्षा वरं ध्यानं पामरस्यत इति॥१३०॥ इतरानुष्ठानेभ्यः श्रेष्ठत्वमेव दर्शयति॥ पामराणां
व्यवहृतेर्वरं कर्माद्यनुष्ठितिः॥ ततोऽपि सगुणोपास्तिर्निर्गुणोपासना तत इति॥१३१॥ उत्तरोत्तरश्रैष्ठ्ये कारणमाह॥

८ज

यावद्विज्ञानसामीप्यं तावच्छैघ्र्यं विवर्धत इति॥ निर्गुणोपासनस्य सर्वश्रेष्ठत्वे कारणमाह॥ ब्रह्मज्ञानायते मुक्तिसाक्षान्नि
र्गुणोपासनं शनैरिति॥१२१॥ उक्तमर्थं दृष्टान्तप्रदर्शनपूर्वकं द्रढयति॥ यथा संवादिविभ्रान्तिः फलकाले प्रमायते। विद्यायते तथो
पास्तिर्मुक्तिकालेऽतिपाकत इति॥१२२॥ ननु संवादिविभ्रान्तिः स्वयमेव प्रमा न भवति। किंतु तया प्रवृत्तस्येन्द्रियार्थसन्निकर्षात्प्रमा
जायत इति शंकते॥ संवादिभ्रमतः पुंसः प्रवृत्तस्यान्यमानतः। प्रमेति चेदुच्यते॥ अस्ति तर्हि निर्गुणोपासनमपि निदिध्यासन
रूपस्य श्रवणजन्यपरोक्षज्ञाने कारणं विस्पष्टमित्याह॥ तत्रोपास्तिर्मुक्तेरेकारणं वस्त्वमिति॥१२४॥ न चैवं सति मूर्तिध्यानादेरपि
विहितकाम्यसंपादनं नहि गान्यवत्तत् ज्ञानसाधनत्वं स्यादिति चेन्न दत्वं गीयत इत्याह॥ मूर्तिध्यानस्य मंत्रादेरपि कारणता यदि॥ अस्तु
नाम तर्हि निर्गुणोपासनेऽतिरस्यत्ता हा॥ तत्पाप्यत्र प्रत्यासत्तिर्विद्यत इति॥१२५॥ प्रत्यासत्तिः स्थितिं व्याख्यानेन प्रत्यासत्तिविशेषः प्रत्या
सत्तिप्रकारमेव दर्शयति॥ निर्गुणोपासनं पक्वं समाधिः स्याच्छनैस्ततः। यः समाधिर्निरोधाख्यः सोऽनायासेन लभ्यत इति॥१२६॥
निर्गुणोपासनं यदा पक्वं भवति तदा सविकल्पकः समाधिः स्यात्ततः सविकल्पकसमाधेः निरोधाख्यायः तस्यापि निरोधे सर्वनि
रोधान्निर्बीजः समाधिरिति स्मृतोऽत्र लक्ष्यते निर्विकल्पकः समाधिः सोऽनायासेन लभ्यते भवत्येवं निर्विकल्पकलाभः ततः किमि
त्यत आह॥ निरोधलाभे पुंसोऽन्तरसंगं वस्तु शिष्यत इति॥ ततो विकिमित्यत आह॥ पुनःपुनर्वासितेऽस्मिन्वाक्याज्जायते तत्त्वधीरिति॥
१२७॥ ब्रह्मण्यस्मिन् संगवस्तुनि पुनःपुनर्वासिते अस्मिन् वाक्याज्जायते तत्त्वधीरिति॥ वासिते सति वाक्यात्तत्त्वमस्यादिलक्षणात्तत्त्वधीस्तत्व
ज्ञानं महद्ब्रह्मास्मीति साक्षात्कारं जायते तेन जायते तत्त्वज्ञानं स्वरूपमेव विशदयति॥ निर्विकारासंगनित्यस्वप्रकाशैकपूर्णताः
बुद्धौ झटिति शास्त्रोक्ता आरोहन्त्यविवादत इति॥१२८॥ ननु निर्विकल्पकसमाधिवशादपरोक्षज्ञानमुदेतीत्यत्र किं प्रमाणमित्या
ह॥ योगाभ्यासस्यैतदयो मतं चिंदादिषु श्रुतिरिति॥ फलितमाह॥ एवं च दृष्टद्वारादहेतुत्वाद्ध्यानतो वरमिति॥१२९॥ एवं च

सर्तिनिर्गुणोपासनमपरोक्षज्ञानद्वारा निदिध्यासनमेव सति दृष्टद्वाराविनिर्विकल्पकसमाधिलाभद्वारेणापि श्रवणादृष्टद्वारापि हे
तुत्वाज्ज्ञानप्रत्यासत्तिसंभवे सति दृष्टद्वारापि निर्विकल्पकसमाधिलाभद्वारेणापि श्रवणादृष्टद्वारापि हेतुत्वाज्ज्ञानसाधनत्वा
दस्मृतः सगुणोपासनादिरपि वक्ष्यते इत्यर्थः । एवं निर्गुणोपासनस्यापरोक्षज्ञानसाधनत्वसिद्धे सति तस्मादयमुक्तमपरोक्षज्ञानोदयः प्र
मः स्यादिति लौकिकस्यापि दर्शनेन ॥ उपेक्षन्ते ये बाह्यजपादीनेव कुर्वन्तो ॥ किं तु समुत्सृज्य कदले दीप्तिमायान्त्यापतेदिति ॥२४॥
मकस्मात्तत्त्वविचारपरस्य निर्गुणोपासनं कुर्वतामप्यवैन्याय: प्रमाद इत्यातो कुतो भवतीति ॥ उपासकानामप्येवं विचारस्यागतो
बद्धि ॥ वाद्दीमति ॥ नर्षिनिर्गुणोपासनं कुतः प्रतिपाद्यते इत्यत आह ॥ तस्माद्विचारस्यासंभवे योगमीड्डतद्दृति ॥२४॥ यस्मादुक्ते
स्याद्युद्योगस्तस्माद्विचारासंभवे योग उपास्यमुक्तमित्यर्थः । विचारासंभवे कारणमाह ॥ बहुव्याकुलचित्तानां विचारात्तत्त्वधी
नेहीतिाघतोविचाराभावे संभवत्यतो योगः कर्तव्य इत्याह ॥ योगो मुख्यस्तस्तेनामिति ॥ मुख्यत्वे कारणमाह ॥ धीदर्पो नश्यति
॥२३॥ तेन योगेन यतो धीदर्पो नश्यति अतो मुख्य इत्यर्थः । एवं व्याकुलचित्तानां योगस्य मुख्यत्वमभिधाय तद्रहितानां विचार एव
मुख्य इत्याह ॥ अव्याकुलधियां मोहमात्रेणाच्छादितात्मनाम् ॥ सांख्यनामा विचारः स्यान्मुख्यं इति ॥ सांख्यनामा विचा
रः सांख्यसंज्ञको वाच्यः तत्त्वविचारो मुख्यः कुत इत्यत आह ॥ झटिति सिद्धिदः इति ॥२३॥ योगसांख्ययोरुक्तयोरुपलत्त्वज्ञानद्वारा मुक्ति
साधनत्वे तौ तावत्प्रमाणमिति ॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥ एकं सांख्यं च योगं च यः पश्यति स पश्यतीति ॥
रेप्या ॥ सांख्यं च योगं च कालनार्थकं पश्यति सप्रमाणस्थानं सम्यकानुपलीत्यर्थः । नकेवलं गीतावाक्यं प्रमाणं किं तु तन्मूलभूत
॥२५॥ सांख्ययोगे च ... निपदामवेतिहि श्रुतिरीति ॥ ननु सांख्ययोगयोस्तत्त्वज्ञानस्य साधनत्वेना
वाक्यातिरथाश्रमाह ॥ तत्कारणं सांख्ययोगाभिपन्नमिति ... प्रसङ्गादित्याशंक्याह ॥ यस्तु श्रुतेर्विरुद्धः स आभासः सांख्ययोगयोर
गीकारे न शास्त्रप्रतिपादिता संततामिति मीकार्यत्वं स्यादित्याशंक्याह ॥ यस्तु श्रुतेर्विरुद्धः स आभासः सांख्ययोगयोः